ॐ। ततः सर्वेषां सत्यवदननियमं॥ ततोध्वर्युराज्यं संस्कृत्य प्पाकृतिं जुहोति। उत्विक्षु विति। तत्रोहः। पुष्ट्रयज्ञपतींस्ति रेति। षटकासादने
यजमानाः वाचं यच्छेतेति॥ येयजमानाः पदार्थेष्वव्याहृता नभवन्ति ते सर्वे विहारस्य दक्षिणातः क्रमेणाध्रत्यक् संस्थाय थावकाशमुपविशंति।
प्रोक्षणीनामुदिंगने अग्ने यज्ञयतीन्तु धा तुन्यज्ञपतिदेवयुवश्तिजुह॥ परिग्रहप्रसवेनाकस्य पृष्ठे यजमानाः संतु॥ इमंयज्ञं यजमानां
श्च धेहीति॥ एवं प्रणाय यज्ञं प्रोक्षजज्ञं प्रजापते त्वबृहीत्यादिमंत्रे घ्वपिज्ञेयं॥ वेदवंधः सर्वैरन्वारब्धो गृहपतिः करोति॥ तन्मंत्रे च ते नास्म
भ्यंवेदो भूयादित्यूहः॥ नानागार्हपत्यपक्षे स्वस्वगार्हपत्यं समीपे उपविष्टानां पत्नीनां सन्नहनं क्रमेण। एकगार्हपत्यपक्षे तत्समीप एव
वोपविष्टानां पत्याज्यमवेदास्वेत्यनूहितस्वपैषः गृहपतिपत्नीसर्वाभिः पत्नीभिरन्वारब्धासती अदब्धेनेत्याज्यमवेक्ष्यते॥ परिधि
परिधानेयजमानानां परिधिरसीति॥ सर्वत्रालंभेताविष्णो पाहि पाहि यज्ञपतीन्पाहि मां यज्ञन्यमिति॥ एवमेववपापुरोडाशहृदया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.स.प घवदानेप्यूहः। पूर्णान्वारंभं च खालेक्षणांपदार्थत्वाद्गृहपतिरेव करोति। वाचनमंत्रांते इति ब्रूते इति प्रैषः। सर्वे यजमानास्तं मंत्रं पठंति। एवं सर्व
७ वाचनेष्वज्ञेयं॥ पत्नीनां वाचनेऽप्येवमेव। यूपस्य परिव्ययणोपरि मान्यजमानान् त्रायइति। अग्निमंथनानंतरं मथितस्याग्नेः प्रास्तनमं
त्रेमायज्ञपती न्ज्ञातवेसाविति॥ संततन्वन्निवर्वेति प्रैषाऽऽकविंशे नवज्ञेशोत्यववाधनं च क्रत्वर्थत्वाद्गृहपतेरेव॥ ॥नमर्वेषां॥ नह्यु
त्रमेत्स्यात्माभिवादिपदसंवंधे थात्मनः क्विंचित्प्रार्थते॥ यदत्तुच्चारणे यजमानानां संस्कारपरिलोप आशक्यते तस्माद्गृहपतेरेव हिरण्य
गर्भइत्युत्तराधारः। पशुश्रोणेः समंजने संयज्ञपतय आशिषागहुतामिति॥ अग्निर्देव इति दीक्षाक्रमेणासर्वे यजमानार्षेयन्तुच्चारणं.
तत्राव्यवहितानां तंत्रेणाव्यवहितानां तु प्रतियजमानं भेदेन॥ होतृवरणानंतरं अग्निर्हि दैवीनामिति यजमानवरणे। अग्निर्हि दैवीनां विशां राम:
पुरएते मे यजमानामनुष्याणां तेषामस्यूर्गार्हपत्यं दीदयछत ८ हिमा अष्टादशायवो राधा ८ सीत्संपृंचानानसंपचानानात्तन्व इत्यू ७

हः॥ एवं सर्वेषामभिधानसमर्थो भवति। अत्र वषट्कृते होमनियमः। तथा सति प्रक्षेपात्पूर्वं सर्वैस्त्यागाः सह कर्तुं शक्यते॥ सर्वैर्हि परि
त्यक्तस्य हविषः प्रक्षेपः कर्तव्यः। प्रयाजानुमंत्रणस्योभयार्थत्वादेकस्यानुमंत्रणस्य सर्वैः कर्तुमशक्यत्वाद्गृहपतेरेव सर्वैरन्वारब्धः प्र
याजानुमंत्रणं कुर्वंति॥ तत्र चैकोनमेत्यत्रास्य शाखप्रयोगे सत्यपथ्यमनो न किंचित्प्रार्थ्यते॥ यदनुच्चारणे यजमानानां संस्कारपरिलो
पआशंकेत्॥ तस्मादेक एव करोति। अत एवानूहश्च द्वितीयानुमंत्रणे दुहे भवति। त्विषिमंतो भूयास्मा अपचितिमंतो भूयास्म॥ यश
स्विनो भूयास्म। ब्रह्मवर्चसिनो भूयास्म। अन्नादा भूयास्मेति। शामित्रस्य पश्चात्तृणापासनमंत्रे यज्ञे यज्ञपतीन्धा इति पशोः प्राणानां
शोधनं परार्थत्वाद्गृहपतिपत्न्येव करोति। अनन्वारब्धैव शेषेणा यजमानशिरः प्रभृत्यनुविंध्यत इत्येतदपि गृहपतिरेवाध्वर्युः सहितः
इदमहमितितृणाभिष्ठानं कृत्वर्थत्वात् गृहपतिरनन्वारब्धा एव करोति। वपाश्रपणादाने प्रजापतिं गच्छत्स्वर्यजमानेभ्यो विंदेति। एवं स

का॰ सू॰ प
८

वैत्रग्रहणदानेषु ज्ञेयं। सर्वेषां यजमानानां सर्वासां पत्नीनां चेदमापवृतिवात्वा त्वेमाज्जनं भवति। प्रणीताप्रणयने यजमानाः वाचं यच्छन्तेति प्रैषः॥
हविर्गृहणकाले पात्नी विलेजपेमाने यज्ञपतयोर्ह्वार्षुरिति॥ पुरोडाशप्रथने बृहते यज्ञपतयः प्रथंतामिति। पुरोडाशाभिवासने अन्तमेरु
र्यजमानानां प्रजा भूयादिति। उद्दिंगन प्रोक्षणाप्रतिप्रसवप्रणदानालंभनेषु उरुहाऽक्ताः॥ मयीदमिति जपः सर्वेषां पुरुषस्याशीः प्रार्थना
र्थत्वात् ऋत्विजामभावाद्वनुर्द्धीकरणाभावः॥ पशूषाधिश्रयणेमाने यज्ञपतयोर्ह्वार्षुरिति पवित्रप्रतिपत्तौ॥ यजमानानां प्राणापानौ पा
तमिति॥ अनुयाजप्रसवमंत्रेतेन यज्ञपतीं स्तेनमामवेति। व्यूहनं यजमानकर्तृकपक्षे गृहपतिः सर्वैरन्वारब्धकरोति॥ प्रजापतेर्व
नस्पते रुज्जितिमनुज्जेयास्म वाजस्यास्मान्प्रसवेनप्रोहामि। उपभृद्व्यूहने तु विशेषो नास्ति॥ अध्वर्युकर्तृकपक्षे उज्जितिमनुज्जयंति राम:
मे यजमाना वाजस्यैनान्प्रसवेन प्रोहामि॥ प्रजापतिर्वनस्पतिस्तमनुपनुदर्तापयि मे यजमानाद्विषंति यश्चैतान्द्वेष्टि वाजस्यैनं प्रसवे ८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नापोहामि ॥ गृहपतेरेववेद्यालंभः स्विष्टेनःसंतिष्ठस्वेति · इतरेषामन्वारंभः ॥ नाना गार्हपत्यपक्षे गृहपतेर्जाघन्यापत्नीसंयाजांतं ॥ आ
ज्येनेतरेषांइडावदानंजाघन्याएवकार्यं · नास्यात् · अदष्टाकृतिर्न भवति ॥ सर्वेषांसहैवस्वस्वगार्हपत्येपत्नीसंयाजकरणपक्षेस्रुक्स्रु
वानांतावत्संख्यानांप्रथममेवासादनादिसंमार्गांतासंस्काराः कर्त्तव्याः पिष्टलेपाकृतिमंत्रेसत्याः संतुयजमानानांकाम इति । वेदविमो
केनोहः ॥ ॥इतिसंप्रदायः॥ ॥गृहपतिपत्न्यैवेतरान्वारब्धावेदविमोकंकरोति ॥ वंधनवद्बहुत्वंभवतीत्यपरे ॥ समिष्टयजुषाहोमे
षुयज्ञ यज्ञपतीन्गच्छेति । एषवोयज्ञोयज्ञपतयःसहसूक्तवाकः सर्ववीरस्तंजुषध्वंस्वाहेतिभूलावनपेगृहपतिराहवनीयेतत्पत्नी
चसर्वगार्हपत्येषुसमिदाधानंकरोति ॥ समिदाधानस्याग्नींधनार्थत्वेनपरार्थत्वात्मुख्यःकुर्यात्परार्थानितिवचनात् ॥ सर्वेयजमाना
उपर्युपर्यंजलीकृत्वापूर्णपात्रस्यप्रतिग्रहणंकरोति ॥ सर्वेषांमुखविमार्जनं ॥ अध्वर्युःसर्वेषामंजलीनामुपरिस्थीयमंजलिंकृत्वाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नयनंपुत्रिगृहणं वोपाये नोभयंकरोति॥ विहृतक्रमभागभूमिप्राक्सूर्यावेक्षणादक्षिणावर्तनप्राग्गमनेषु आन्वारंभः॥ आहवनीयावेक्षणागार्ह
पत्योपस्थानपुत्रनामग्रहणतूष्णीमाहवनीयोपस्थानवृतविसर्गभागप्राशनानि भेदेन॥ यजमानभागंसप्तदशधाविभज्यसर्वेत्वां प्रावे
शणंप्राशनंच कुर्वंतीत्यपरे आहुः सूर्यावेक्षणेवर्चोनोदेहीति॥ प्रागमननमंत्रेप्रप्रयज्ञपतीस्तिरेति॥ पुत्रनामग्रहणमंत्रेततोसितंतुर
स्यनुनस्तनहत्येस्मिन्निति॥ तदुमस्तिकोध्यतस्यघृताक्तस्पशिरसः सुगुप्तदेशेनिधानं॥ आजस्रोपस्थापुप्राशनंचदीक्षादिनएवेष्ट
कापथकरणपक्षेनानागार्हपत्यपक्षेगृहपतिगार्हपत्यादुःखासंभरणार्थमाहवनीयंदक्षिणाग्निंचोद्धरेत्यध्वर्युः॥ वुल्लादयश्च स्व
स्वगार्हपत्यादेकैकमंगादमाहवनीयेदक्षिणाग्नौचप्रक्षिपंति॥ ॥ततउखासंभरणं॥ एकगार्हपत्यपक्षेपिगार्हपत्यंविभज्योखासं
भरणार्थंपुनः संनिवापः तत्रोखासंभरणमजापयसावसेकांतं॥ तत्रगृहपतिपक्षेवान्वारब्धाआषाढांकरोतिपरार्थत्वात्॥ उपायावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चज्योतिषांचकरणंगृहपतेरेव॥अथातोऽग्निमग्निष्टोमेनानुयजति॥तमुक्थेनतमतिरात्रेणतमेकरात्रेणतंद्विरात्रंतेष्वग्निरूपदेशो
नैवविधीयते।तेनतंद्वादशरात्रेणोत्पनेनवचनेनैकयजमानकेष्वनेकयजमानकेनद्वादशाहेऽपदिष्टएवाग्निर्नीतिदिष्टः।तेनप्र
कृतावपूर्वत्वाद्यस्तनेनन्यायेनअनेकयजमानकेपिद्वादशाहेचयनसंबंधिषुमंत्रेषुयजमानाभिधायीनिनोह्यंते।पत्नीशब्दवत्॥
दीक्षादिनेपशुकरणशक्तौपशुस्तत्रस्यांफाल्गुन्यांपौर्णमासेनइत्यादिप्रसिद्धेस्वकालेएवभवति॥तदाचपशुसमाप्तिरनंतरंस्वान
स्वानग्नीन्समारोप्यस्वस्वगृहेगत्वाग्निहोत्राद्यानित्यक्रियाःकुर्वंति॥एकगार्हपत्यपक्षेपितंविभज्यस्वस्वारण्योःसमारोप्यगृहेगमना
दि।पशोःस्वकालेकरणंपक्षऽपासंभरणमपिफाल्गुनकृष्णाष्टम्यामेवाग्नीनांस्वनापंकृत्वाकर्त्तव्यं॥ततश्चैत्रशुक्लसप्तम्यांदेवय
जनजोषणादिकर्मक्रियतेतत्रमानुषर्त्विग्वरणाभावेपिदैवर्त्विग्वरणंभवत्येव॥अग्निर्नोहोता॥आदित्योनोध्वर्युरित्याद्यूहयुक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा अग्निर्नो होता स नो देवयजनं ददात्विति एतद्देवर्त्विग्भ्यो देवयजनप्रार्थनमपि भवति॥ ततो देवयजनजोषणं॥ उद्धतो वध्रिमू
लकरणं॥ ततः पक्षद्वयेपि उदग्वंशशालाकरणं॥ प्रतियजमानदशदशारत्नी प्रमाणां उदीचि वर्द्धते॥ प्राचीनुविंशत्यरत्निरेव॥ एकाह
नद्वीक्रय इत्यास्मिन् पक्षे प्राग्वंशेन प्रकृतिवद्दशारत्निविपुला भवति॥ तत्पूर्वं गृहपतिर्गार्हपत्यायुपाकृत्यर्थमाहवनीयमुद्धृत्य पूर्ववदे
कैकं गार्हमाहवनीये प्रास्य उपाकृतिहोमः॥ ॥ततइष्टकापशुवत्समारोपः॥ ॥एकारणिपक्षे गृहपतेः अरण्योः संवादे पशुबंधे
न इत्यस्यस्थाने सत्रेणेति पदप्रयोगः ततः पूर्ववत्समारोप उदवसानं॥ देवयजनमागत्य पूर्वया द्वारा पत्नीशालां प्रविश्य पूर्वयोः
पक्षयोः सर्वे यजमानाः स्वे स्वे अरणिपाणौ कृत्वा शालास्तंवग्रहणं कुर्वाणं गृहपतिमन्वारभंते॥ तृतीये पक्षे गृहपतिरेवारणिपाणिर्ने
तरे। संवत्सरश्चातु- इपपक्षाहिताग्नयश्चेत्सत्रं कुर्वंति। तदा गृहपतिरेव लौकिकारणिपाणिः शालास्तंभं गृहीत्वेदमगमेति पठंति॥ ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोमनिधानंवा ॥ मंथनमिष्टकापश्रुवत् ॥ इष्टकापशौयः पक्षोंगी कृतोभवति । सएवात्रापिभवति । प्रथमपक्षश्चेदत्रगार्हपत्येंगारमि
तिविशेषः ॥ ततोर्द्ध्वामाधिकेषुसप्तसुप्रक्रमेष्वाहवनीयस्योद्धरणं ॥ द्वितीयेदक्षिणाग्नेः । प्रमाणंसर्वत्र गृहपतेरेव । क्रत्वर्थमेगोपा
येतिक्रत्वर्थोपदेशः ॥ अत्रोपहारः ॥ ॥ सर्वेषांसपत्निकानां इष्टाशनं ॥ ॥ ततोभ्युदीक्षैकैकस्यप्रपादनांता ॥ अत्राध्वर्युर्गृहपतिंब्र
ह्माणमुद्गातारंहोतारंवदीक्षयति । अनुपतिरेषांपत्नीः प्रतिप्रस्थातादीक्षयति ॥ ततोध्वर्युर्ब्राह्मणाछंसिनंप्रस्तोतारंमैत्रावरुणंचक्र
मेणप्रथमशोधप्रतिप्रस्थातादीक्षयति । अनुपतिरेषांपत्नीर्नेष्टादीपयतिद्वितीयशोध । ततःप्रतिष्ठातारंपोतारंप्रतिहर्त्तारमछा
वाकंचक्रमेणनेष्टादीक्षयति अनुपत्येषांपत्नीः क्रमेणोन्नेतादीक्षयति । ततोनेष्टारमग्नीधंसुब्रह्मण्यंग्रावस्तोतारंचक्रमेणोन्नेतादी
क्षपयति ॥ अनुपत्येषांपत्नीः क्रमेणोन्नेतोपनीतः । स्नातकोवाब्रह्मचारीवान्योब्राह्मणोवादीक्षयति ॥ उन्नेतारमुन्नेतुः पत्नीवब्रह्मचर्या॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीनामन्यतमराववदीक्षयति॥ ॥ततो दीक्षणीया॥ तत्रनानागार्हपत्यपक्षेप्यग्न्यन्वाधानंपरिस्तरणंच गृहपतिगार्हपत्यस्यैव॥होमा
भावान्नेतरेषु॥गार्हपत्यस्यैवांगारप्रासनेगृहपतिगार्हपत्यस्यसाधारणीकृतत्वात्॥जुहूस्थानानि तु प्राजापत्यं प्रज्ञावेनोक्तानि॥ततो
वेद्योक्तविमोकांतेनवनीतदीक्षासर्वेषां।तत्रभ्यंजनादेकैकस्यप्रवेशनांतं।पूर्वोक्तक्रमेणपूर्वोक्तन्तत्कर्तृकत्वं॥अत्रवोत्वाप्रहृंजनं
तस्ययजमानकर्तृकपक्षेगृहपतिहस्तामाहवनीयेधिश्रयति॥ समिदाधानं॥ततओजुहूणाहोमः॥ ॥दीक्षणीयाशेषसमाप्तिः॥ ॥
ततः कृष्णाजिनदीक्षाः सर्वेषां॥ तत्रैकस्यकृष्णाजिनास्तरणादिदंडोच्छ्रयणांतमप्सुदीक्षोक्तक्रमेण।तत्रवाउखाधिश्रयणादिसमि-
दाधानांतं॥ सर्वेषांकंठेस्वयमेवहृक्मप्रतिमोकः॥अतद्दुर्ह्वहद्दितिमंत्रेणसंघापुखोनिधानपर्यंतंसर्वेषांमन्वारंभः॥सीदत्वमितु
मस्थानंसर्वेकुर्वंतिनात्मप्रोपस्थानंच।अत्रमानवसूत्रेविशेषः।हृक्मप्रतिमोचनादिवात्मप्रांतमेकैकस्येति।तेनप्रतिदीक्षाक्रमेणावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्रमवात्सप्रैभवतः॥ उद्वासनप्रैषो दीक्षिता इमे ब्राह्मणाः इति। प्राक्प्रैषात्स्वर्यास्तमयश्चेद्गृहपति। ब्रुयादय। तस्मिन्नेव विहारेऽग्निमे
णासर्वेऽग्निहोत्रं जुह्वति॥ आस्तमयाद्वाग्यमनं सर्वेषां॥ अस्तमिते भस्मोद्वापो गृहपतेः दीक्षिता वाचं विसृजध्वमिति वाग्विसर्गप्रैषः॥
पत्नी वाचं सृजस्वेत्यध्वानूहः। प्रकृतावसमवेकत्वात्॥ व्रतकरणप्रैषः सर्वेषां॥ वाग्विसर्गश्च समिदाधानं च॥ बहुवचनेनगोदोहन
प्रैषः। व्रतदुघा धुक्ष्वेति। व्रतानि सर्वेषां पृथक्पृथक्श्रपयित्वा यत्नेन रक्षणीयानि पत्नीनां च॥ अपरात्रे सर्वेभ्यो व्रतप्रदानं॥ व्र
ते दत्ते गृहपति। स्वकीये ज्ञने समिधं। त्यग्न्याधानं करोतीति॥ ॥ कर्कसंप्रदायकारे॥ २ ॥ सीये स्वीये व्रते त्यज्य सर्वेपि समिध
आदध्युरिति वासुदेवः॥ विवुद्धवाचने व्रूतेति प्रैषः सिर्ववाचने षेवं। वाग्वंधप्रैषे दीक्षिता वाचं यच्छतेति। पत्निशब्देवाग्विसर्गवंधनप्रैष
यो नोहं॥ उदिते भस्मोद्वपनादि समिदाधानांतं। एवं दीक्षितधर्मैरुपेता द्वादशाहान्यासने। ततो द्वितीयायां दीक्षायां विसृजकमात्। तीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰सू॰प यां वात्सप्रं ॥ चतुर्थ्यां विष्णुक्रमः ॥ पंचम्यां वात्सप्रं ॥ षष्ठ्यां विष्णुक्रमः ॥ सप्तम्यां वात्सप्रं ॥ अष्टम्यां विष्णुक्रमाः ॥ पंचम्यां वात्सप्रं ॥ दशम्यां विष्णुक्रमः ॥
१२ एकादश्यां वात्सप्रं ॥ द्वादश्यां विष्णुक्रमः ॥ इति एवं प्रत्यहं व्यत्यासेन विष्णुक्रमवात्सप्रे दीक्षासु भवतः ॥ तत्र द्वादशाहानां दीक्षाणां मध्ये यस्यां दी
क्षायां इष्टिर्भवति तस्यां स्फपच्छेदनमहावीरसंभरणावनीवाहनानि यथोक्तानि कर्त्तव्यानि ॥ दीक्षामध्ये भस्मापोभ्यवहरणमपोछ्या वनी
वाहनादूर्ध्वं कर्त्तव्यं ॥ मानवे विशेषः ॥ अहीने भृत्विति अहीन इत्युक्त्वात् स्वेवनीवाहनं नेन भवति ॥ इति गम्यते ॥ दीक्षाणां चतुर्मे हनि
उत्तरवाग्नेः स्थाने ईष्टामेन गार्हपत्यस्य परिलेखः ॥ मंडलादेवत्रीन् प्रक्रमान् अक्रम्यांतः पात्यशंकुनि खननं कुर्वंति । ततो ब्रह्मयजमानावा
हवनीयदेशं दक्षिणेन वेदेः संलग्नावुपविशतः ॥ यजमानावावं यच्छेति प्रैषः ॥ षट्कासादनादित्रिकः प्रोक्षणांतं । ततो वेदीमानं पृष्ठ्यामानं याम:
अग्निमानं परिग्रिहिन्त्रिखननांतं ॥ ततश्चैत्रकृष्णचतुर्थ्यामुदिते भस्मोद्वपनादिसमिदाधानांते त्रिस्तनं व्रतं दुधाधुक्ष्वेति । चतुर्थ्युपसत्सु १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रिस्तनंव्रुतकरणं॥ ततोभस्मापोभ्यवहरणाद्ध्रुवाग्निप्रायश्चित्तं तंकृत्वाक्रमप्राप्तंवात्सप्रोपस्थानं च कृत्वाततोविष्णुक्रमवात्सप्रस्तमा
संकुर्यात्॥ततः पलाशशाखयागार्हपत्यमूहूहनादिप्रायणीयहविष्कृदंतेविशेषः। उपवसथप्रभृति। नानागार्हपत्यपक्षेशाखायास्थाप
नमितरेषांगार्हपत्यानांगृहपतिगार्हपत्यवत्‌चयनपक्षेधिष्ण्यचयनपक्षेतुनिरसनमेव॥ ततोमहावेदेस्थ्याद्यासंमर्शनांतं। ततः भूर्यादा
नादिवेदविमोकांतंप्रायणीयं कृत्वासीवेंपंरयोजनादिसवौषधैवपनांतं॥ततपरवदेशोसोमनिवपनाद्यातिथ्यहविः कृदंतेविशेषः॥प
दाभिहोमार्थेचतुर्गृहीतेगृहपतेरेवान्वारंभः। भुंठाधीलोहाकर्णीसोमक्रयणी। अर्हगणेष्वविशेषादिष्टु कृत्वात्॥ भुंठाधीपीतमुखीवेषि
तमुखीतिकेचित्॥ पीतपुच्छीत्येके। लोहाकर्णी। लोहितकर्णी पदसमर्पणेन्वारंभः। युष्मात्तुरणोस्मात्तुरायरुत्वहश्च॥ गृहपतिपत्न्याए
वपदसमर्पणं॥पत्नीवाचनेषुकृतेति प्रैषः सर्वासामंत्रवाचनं। यजमानकर्तृकपक्षेसोमोपनहनस्यहरणंगृहपतिः करोति। सोमोपन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प इनेदशाहृत्वोमंत्रेणासोमंमितार्थवत्परिमाणास्यसोमस्योपर्येकादशोध्यावापः कार्यः।। आगतेसोमेउत्थानंचतस्वैर्षांउराबाधानंगृहपतेरेव।।
१३ स्वानभ्राजेतिजपश्चगृहपतेरेवशिरसोपोर्णवनंसर्वेषांपत्नीनांच।गृहपतेर्दरणोमैत्रावरुणायदेयः।।दीक्षिताः दंडान्प्रयछंतीतिमानवे।।
शीप्तिसोमकरणादिगृहपतेः।वाचनादिसर्वेषां।आतिथ्यायांहविर्ग्रहणोगृहपतिपत्नेवाध्वर्युमन्वारभते।हविर्ग्रहणोमुष्टिविसृज्याध्वर्यु
णाहविर्ग्रहणंकर्त्तव्यं।।ग्रहणानंतरंउनर्वधानं।। एवंसर्वत्रार्त्विज्यविरोधेसर्वैर्यजमानैस्याज्यं।।अत्रहविष्कृदंतेआहवनीयपरिश्रिता
मभिमंत्रणादिलोगेष्टकोपधानांतं।।ततःशम्यामादायोत्तरवेदिछदनांतं।।ततःसिकतानिवापाद्यालंभनांतं।।आतिथ्येडांतेवांतरदीक्षास
र्वेषांयजमानानां।आहवनीयेसमिदाधानांतापत्नीनांच।।ततोगार्हपत्येषुपत्नीनांस्वस्वगार्हपत्येसमिदाधानांतं।प्रवर्ग्यचरणोभूनाधवे रा॰
तिवाचनेअभ्रधिष्ण्यदेशधारणंगृहपतेः।वाचनंसर्वेषां।पाणिनिधानंविश्वाभ्योमानाष्टुभ्यइतिगृहपतेरेव।प्रादेशनिधानंच।गर्भेदेवाना १३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्युपस्थानं सर्वेषां ॥ अपां त्वामित्यनुमंत्रणं गृहपतेः सर्वैरन्वारब्धस्य । मधुहुतमिति भक्षणं सर्वेषां । उपसद्योमे गृहपतेरन्वारंभः । चर्मद्विति प्र
णयनाग्निभ्यो न्सर्गीतं । उत्तरवेदि प्रोक्षणादिनाभिव्याघारणांतं ॥ मयि गृह्णामीति जपः सर्वेषां । सत्यसामगानं गृहपतेः । पुष्करपर्णोपधानादि
लोकंपृणान्तामुपधानांते विशेषः ॥ सर्पनामोपस्थानं गृहपतेः प्राणनतः परिलेखश्च ॥ प्राजापत्यपशुशिरसि पंचशिरोन्याग्निश्चेत्यंचवारं
सप्तानां हिरण्यशकलानां प्रक्षेपः । सहस्रदाइत्युद्धरणं । आदित्यंगर्भमिति । पुरुषमंत्रेणोपधानं । अश्वादिशिरसामुपधानमंत्रैस्तस्यशिरसस्त
स्यां तस्यादिस्पंगुल्यास्पर्शः कार्यः ॥ चित्रं देवानामित्याहुतीश्च । सर्वैरुत्सर्गमंत्रैरुपस्थानं च । अपराह्णे तानूनप्त्रमध्ये गृहपतेर्व्रतमभ्युक्षिच्च त
स्य गृहपतय ब्रतप्रदानं । नेतरेभ्यः । ततः सायं प्रवर्ग्योपसदौ उपास्तमयमभ्यपरिणयनमितरथाग्नेयंतं ॥ ततो वाग्यमनप्रैषादि । प्रातरु
दिते प्रवर्ग्योपसदौ ॥ ततः प्रथमायां चितौ पुरीषनिवापः । वार्त्रहत्यायेति पुरीषवत्याः ॥ प्रथमायाउपस्थानं ॥ ततोपराह्णे द्विस्तनं व्रतकरणं ॥ त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का.सू.प १८ तः प्रवर्ग्योपसदौ ततः सायंकालेऽश्वपरिणायनं ॥ वाग्यधप्रैषादि । प्रातर्वाग्विसर्गान्ते त्रिस्तनं व्रतकरणं । प्रवर्ग्योपसदौ । आग्नाद्भुचतस्तुपसत्सु
अधःशयोपसदाकृतिः ॥ ततो द्वितीयायाश्चितेरुपधानं लोकंपृणोपधानान्तं ॥ ततो एवापराह्णे व्रतकरणं । प्रवर्ग्योपसदौ ॥ सायमश्वपरिणायनं ।
वाग्वंधादि प्रातर्विसर्गान्तं त्रिस्तनमेव व्रतकरणं ॥ ततः प्रवर्ग्योपसदौ ॥ द्वितीयायां पुरीषावापः ॥ सप्तचौपस्थानं ॥ अपराह्णे त्रिस्तनं व्रत
करणं ॥ ततः सायं प्रवर्ग्योपसदौ ॥ अश्वपरिणायनं ॥ वाग्वंधादि प्रातर्विसर्गान्तं ॥ प्रातश्चैव नक्तं त्वाष्टम्यां पंचम्यामुपदः प्रभृतिश्रुघमी
यावद्व्रजः शयेत्तुपसदाकृतिः ॥ ततः तृतीयाश्चितेरुपधानं ॥ ततोऽपराह्णे द्विस्तनं व्रतकरणं प्रवर्ग्योपसदौ ॥ अश्वपरिणायनं ॥ वाग्वंधादि
प्रातर्विसर्गान्तं प्रवर्ग्योपसदौ तृतीयायां पुरीषावापः । सप्तचौपस्थानं ॥ अपराह्णे व्रतप्रदानं ॥ प्रवर्ग्योपसदौ ॥ सायमश्वपरिणायनं ॥ वाग्वं रामः
धादि प्रातर्विसर्गान्तं । प्रातः प्रवर्ग्योपसदौ ॥ चतुर्थ्याश्चितेरुपधानं ॥ अपराह्णे व्रतप्रदानं ॥ प्रवर्ग्योपसदौ ॥ सायमश्वपरिणायनं ॥ वाग्वंधादि १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रातर्विसर्गांतं॥ प्रातः प्रवर्ग्योपसदौ॥ चतुर्थ्यां द्विगुणीबावापः। सप्तर्च्योपस्थानं। ततोपराह्णे व्रतकरणं॥ प्रवर्ग्योपसदौ॥ अभ्यपरिणायनं॥ वाग्
बंधादि प्रातर्विसर्गांतं। प्रातर्नवम्यामुपसदि एकस्तनं व्रतं दुग्धाधुत्वेति प्रैषः। प्रवर्ग्योपसदौ॥ नवमीप्रभृति चतस्रः षट्पलत्सु एकस्तनं व्रतं
हरिशपेत्तुपसदाकृतिश्च॥ ततः पंचम्यामग्निर्नेत्तृपधानं। अपराह्णे एकस्तनं व्रतप्रदानं॥ प्रवर्ग्योपसदौ॥ पंचम्यां त्रिनो द्विगुणीवनिवापः। अप-
राह्णे व्रतकरणं॥ प्रवर्ग्योपसदौ॥ अभ्यपरिणायनं॥ वाग्बंधनादि प्रातर्वाग्विसर्ग प्रैषांतं॥ प्रातः प्रवर्ग्योपसदौ॥ ततो विकर्णोपधानाद्यग्न्यु
-- शंसनप्रैषांतं॥ अपराह्णे व्रतकरणं। ततः प्रवर्ग्योपसदौ। अभ्यपरिणायनं॥ वाग्बंधादि वाग्विसर्गांतं रात्रौ आग्नीध्रामो डुंबरीणां घृतम
भ्येप्रक्षेपः। सकलां रात्रिं ताः समिधो घृतमभ्येति ष्ठंति॥ अनुदिने वाग्बंध प्रैषादि प्रातर्वाग्विसर्गांतं॥ प्रातः पंचगृहीतादि धिष्ण्यचयनांते
विशेषः। इमं स्तनमिति वाचनपक्षे ब्रूते ति प्रैषः। वसोर्धाराहोमं गृहपतेरेव सर्वैरन्वारब्धः करोति॥ वाजप्रसवीयहोमांते सर्वेषामभि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प
१५

षेकः। हविर्द्धानप्रक्षालनादिविशेषः॥ गृहपतिपत्न्यक्षोपांजनं करोति॥ उपरवावभिमर्षनेतन्न्तः॥ सह तत्र इति सर्वान्वारब्धस्य गृहपतेरध्व-
र्य्योश्वाभिमर्शनं॥ धिष्ण्यचयनानंतरमेवैकाहवत्सोमयज्ञसत्वे तन्मध्यव्यतिरिक्तेषु पक्षेषु शालाद्वार्यदक्षिणोत्तराणां सर्वेषां गार्हपत्यानां पू-
र्वोक्तप्रकारेणाचयनं॥ प्रथमपक्षे पूर्वं ब्रह्मादिगार्हपत्यानामुपद्यामनं॥ ततश्चयनमिति विशेषः॥ तत्र गार्हपत्यचितिवच्चयनपक्षे प्रथमं
सर्वेषां परिलेखः परिमंडलपक्षे। चतुरस्रपक्षे मंडलं चतुरस्रं विकीर्य्यंनिम्नुपायेन मंडलस्य चतुरस्रकरणं॥ ततः सर्वेषां शाखायाकूहनं॥ त-
तः शाखानिरसनं॥ ततः सर्वेषु घानिवापो मंडलाच्छादनांतः॥ ततः सर्वेषु सिकतानिवापो मंडलाच्छादनांतः। ततः सर्वेषु परिश्रिन्निखननं॥ अर्द्ध-
ष्टहत्नुपधानाभिसमविलकरणांतमेकैकस्य। अनंतरमूर्ध्वमनुदेशादिः धिष्ण्यवच्चयनपक्षे कृत्तीर्निवापं कृत्वा आग्नीध्रीयवत्सर्वेष्वष्टानामि- राम:
ष्टकानामुपधानं॥ तेषु लोकं पृणेषु सकृन्मंत्रः॥ ततः सर्वेषु यावदिष्टकं परिश्रितां परितो निधानं॥ ततः सर्वेषु तूष्णीं पुरीषनिवापः॥ अस्मिन्न १५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षेपलाशशाखाप्युदहनादेरभावः॥ततः संम्राडसीत्याहवनीयानुदेशादि॥ सप्तदशगार्हपत्यपक्षेसप्तदशानां शाखानां छेदनं॥ एकाहवत्पक्षेतु
एकैव शाखा॥ अपरेषु सर्वपक्षेष्वेकामेव शाखामिच्छंति॥ नानागार्हपत्यपक्षेप्रातः सवनदध्यर्थे सप्तदशानां षड्वर्णीनां सवनीयद-
ध्यर्थमपाकरणं। तत्रगोः शाखयोपस्पर्शने ध्रुवा एष्ठ गोपतिषु स्यात बह्वीरित्यूहः। यजमानानां पशून्पाहि इति च॥ यजमानपदास्य पशु-
विशेषणत्वेपि क्रत्वनुपयोगि पशूनां सर्वयजमानसाधारणात्॥ एकाहवत्पक्षेप्रकृतिवदेव॥ शालाद्वार्यमपरेणासादनं गृहपतेः। अपिवृ-
तान्वारंभो यथास्वं यजमानानामेकेन वा ससादनं॥ अग्नीध्रीयस्योद्यमनेकृते सर्वे ब्रह्मादयः। शालाद्वार्यादेकैकमंगारं हृत्वा स्वस्वधि-
तिषु स्थापयंति। विस्रंसोपस्थाने सर्वे गृहपतिमन्वारभंते॥ उपागा३दं वयं मनुष्यास्म हेति नविपरिणामः॥ निष्क्रमणप्रभृति अंगुलीविसर्गां-
तमेकैकस्य। नानागार्हपत्यपक्षे पत्नीनां स्वस्वगार्हपत्येषु समिदाधानं। सुब्रह्मण्याह्वाने सर्वेषां नामग्रहणानि॥ सवितान्वेतिवा ऊह्यग्रहणानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेषांभेदेन॥शालाद्वार्यमपरेणगृहपतिपत्नीआस्ते॥उत्तरवेदिमपरेणगृहपतिरुपस्थेसोपंकृत्वोपविशति॥वत्सांतरेणावध्यार्थंवत्सोमपरि
हरणं।यथोपाकृतंदोहः॥उरवाधिश्रयणेमातेयज्ञपतयोह्वार्षुरिति॥नानागार्हपत्यपक्षेपयस्यार्थेसन्नद्धानांषट्वर्गाणामपाकरणम्॥
आवसथ्यादीनांदानंनभवति॥अध्वर्योरदीक्षितस्येत्युक्तत्वात्॥ततःस्तृत्यायामपररात्रेस्वयमेवोत्थायाउपस्पर्शनपरिस्तरणादिसव
नीयपशुविकल्पाश्रयणापेक्षयापाशुकंपात्रासादनं॥आग्नीध्रीयेस्थापितसोमाद्रिस्योपावहरणं॥प्रातरनुवाकोपाकरणादग्नियोज
नं॥पूर्ववत्सुब्रह्मण्याह्वानं॥नानागार्हपत्यपक्षेप्रत्यग्निसवनीयानांनिर्वापः।तत्रगृहपतिर्गार्हपत्येग्नौत्।विरोधादन्येइतरेषुगार्हप
त्येषुपात्रासादनेपाशुकमस्त्येव।सवनीयनिर्वपत्यर्थमासादयति॥अर्थवत्परिमाणोजुहूपभृतौ॥भृतावदानंचेत्यधिकं॥इतरेषां
सवनीयानिर्वपत्युपयोगीनामेवासादनं।प्रोक्षणप्रैषेपिब्रह्मन्हविःप्रइत्येववक्तव्यः।अन्यथाप्रोक्षणेतिप्रतिप्रश्नोविरुध्यते॥यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयंन्वारब्धे दोहः॥ एकाहवत्पक्षे प्रकृतिवदेकैकपत्र्य पुरोडाशादिनिर्वपणानंतरं ऐंद्रं वार्हस्पत्यं वा पंचदशशरावमोदनं पुरोडाशं वा-
निर्वपेत्॥ तत्र सपादचतुःशरावमात्रेण चतुर्वीरं गृहराणां कर्त्तव्यं॥ अस्मिन् पक्षे पात्रासादने चरुश्चेच्चरुस्थाल्यधिका पुरोडाशश्चेद् द-
शैकपालानि॥ नानागार्हपत्यपक्षे आद्यंते अर्थवत्परिमार्गाद्यो जुहूपभृतोः संमार्गा- स्रुचौ संमृड्ढीति प्रैषः। तयोः संमार्जनं। गृहपते
गार्हपत्ये प्रतपनं॥ ततः स्रुचोरसिजुहूस्तुपभृत्यासादनं॥ ॥पात्न्योजनेयोडशिनः॥ ॥पात्रमधिकमनियतस्थाने खरे सादे-
नीयं॥ तथा चतुरस्रमौदुंबरमंथग्रहार्थं पात्रं चासादनीयं। सर्वाः पत्न्यो द्वौ द्वौ पान्नेजनानुन्नयंति॥ पान्नेजनः॥ पान्नेजनार्थमुदकः कलशं॥
एतस्मादेव प्रतिपत्निपान्नेजनद्वयोन्नयनं वचनात् सर्वाः पत्न्याः पशोः प्राणशोधनं कुर्वंतीति गम्यते॥ ॥इति हरिस्वामिनः॥ ॥गृह-
पतये निग्राभ्यासमर्पणं॥ यमग्र इति मंत्रेण छदिषमालंभनं। तूष्णीं हविर्धाने प्रवेशो वा॥ छदिरतिरात्रइत्युक्तत्वात्॥ एकधनस्थानं उभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.सू.प ७ यशेषंनिधायेत्यस्मानंतरमध्वर्युरंशुग्रहार्थअनामिकायांहिरण्यंवध्नीते॥ततस्तूष्णीम– दानंकरोति। तूष्णीमुपावहृतात्सोमात्सोमां
शूनधिषवणाचर्मणाऽपरिनिवपतति। तूष्णींनिग्राभ्या आसिंचति॥ततोग्रावाणंप्रहरणार्थमुद्यम्यविकल्पेनप्रहरणंकरोति॥उ
ग्रमनमात्रंवा॥ततःस्तूष्णींतदुदकंऔदुंवरेचतुरस्रेऽलखलेगृह्णाति॥ततःपरिमृज्योत्थायगत्वातूष्णीमाहवनीयेस्वाहेतिसर्वंजु
होति॥अनवानंवाजुहोति॥इदंप्रजापतये॥ततोयदनामिकयांहिरण्यंपूर्वंबद्धंभवति। तस्याचघ्राणंकरोतिसत्रात्अन्यत्राध्वर्युर्वे
ष्वाद्दशप्रथमगर्भावत्सतरीर्ददातिततोदाभ्यग्रहंगृह्णाति॥तत्रयजमानेच्छयाभूतिफलस्यवांछायेनपात्रेणांशुग्रहणंकृतं॥तस्मिन्नेव
पात्रेनिग्राभ्यास्तूष्णीमासींचति। उपयामगृहीतोसींद्रायत्वेतिद्वितीयं॥उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यइतितृतीयं। एवंत्रीन् राम: ७
सोमांशून्पात्रेऽवधायोत्थायाहवनीयंप्रतिगच्छन्तिवृत्रघ्नीनांत्वेतिमंत्रेणगृह्णामीत्यंतेनांशुभिस्तस्मिन्पात्रेगृहीतानिग्राभ्याअवधूनोति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आप्लावयति॥ ततस्तस्मै तेसोमेनेमं चेराजुहोति॥ इदंसोमाय नि: शेषस्य होम:।पूर्ववद्धिरण्यावघ्राणं॥ द्वादशसंख्यानांगर्भिणीनांवत्सतरी
णांअध्वर्यवेदानं॥सञ्चादन्यत्र।तत:पात्रस्थानसामांशून्क्रमेणोऽशित्वमितिप्रतिमंत्रमभिषवणस्थेसोमेप्रक्षिपति॥ अधिषवणाभि
ग्राभ्यानामुरसिग्रहणंगृहपते:वाचनंसर्वेषांमिज्ञालंभेतेनैभ्योयजमानेभ्योहरायइतिविशेष:॥प्रात:सवनेआग्रयणग्रहणानंतरंषो
डशिग्रहणं।प्रदक्षिणावृत्तौइतरथावृत्तिः।आसादनंषोडशिनोहोमंयावत्॥ ॥अध्वर्योर्वाग्यमनं॥आग्रयणोपाहियज्ञपतीन्विष्णु
स्त्वामिति॥तथाअस्मैक्षत्रायेभ्य:सुवभ्योयजमानेभ्य:पवतइति च॥ स्रुवहोमपर्यंतंमंत्रंपुरीषयोरकरणं॥सर्वेषांसमन्वारब्धनि:
क्रमणोविप्रुड्ढोमेकृत्वाब्रह्मायजमानोगृहपति:उभावपिप्रतिहर्तारंसमन्वारभेतामितिसंप्रदाय:॥आश्विनग्रहणेगृहपतेरंन्वा
रंभोवैकल्पिक:अवकाशावाचनेप्राणायमेवर्चो॰पवस्वेतिब्रुवंत:उपांशुमीक्षध्वंइति।एवंप्रथाग्रहंप्रयोग:॥भूर्भुव:स्वरितिज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰सू॰प पः सर्वेषां॥ ॥अथाच सवनीयपशुविकल्पा उच्यंते॥ प्रत्यहमैंद्राग्नः पशुर्भवति॥ अथवा प्रत्यहं स्तोमायनं भवति॥ अस्मिन्पक्षे ऽग्निष्टो
१८ मसंस्थेष्वेक आग्नेयः पशुर्भवति॥ उक्थसंस्थेष्वाग्नेयैंद्राग्नौ द्वौ पशू॥ षोडशीसंस्थे आग्नेयैंद्रास्त्रयः पशवः। अतिरात्रसंस्थे त्वाग्नेयैं
द्राग्नैंद्रसारस्वताश्चत्वारो यथोक्तजातीयाः॥ अथवा एकादशस्वहःसु प्रत्यहमेकादशिना आग्नेयादयो विहृता भवंति। क्रमेण प्रत्यहमे
कैकः। अस्मिन्पक्षे ऽदयनीयातिरात्रे द्वादशेऽहनि एकादशिना नामाद्य आग्नेयः पशुः। अथवा सर्वे आग्नेयादय एकादशापि॥ ॥
अथवा सैन्द्राग्न इति॥ अतः प्रापणीयप्रभृति सर्वेष्वहःसु च यो विकल्पाः॥ अतश्च प्रापणीये ऐंद्राग्नो वा सवनीयः। एकादशिनि पक्षे
आग्नेयः॥ स्तोमायनं चेति पक्षे आग्नेयादयः श्रुत्वा र इति॥ तत्रैंद्राग्नपक्षे इंद्राग्निभ्यां जुष्टं॥ इत्यादि निरूढवत्। एकादशिनि पक्षे रामः
ऽग्निष्टोमवत् स्तोमानयनपक्षे तिथ्यावत्॥ नियोजनादि सर्वैः अनुयाज्यावरणे॥ अग्निर्हि देवीनां विशां पुर एतेमे सुन्वंतो मनुष्या १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णां तेषामस्त्वित्यादिपञ्चवत्॥ एतेमेभूत्वंतोय[redacted]जमानामनुख्याणामितिवा॥ब्रह्मत्वहोमं तुपरार्थत्वादितरत्वाद्ध्वर्युर्गृहपतिः करोति॥
॥ ॥तत्रोहः॥ जुष्टोवाचेभूयास्मजुष्टोवाचस्पत। वपामार्जनांतेधिष्ण्योपस्थानादेसर्पणेअध्वनामध्वपतइत्यादीनित्रीण्यभिमंत्रणानि य
जमानकर्तृकाणिभवंतीतिसंप्रदायः॥अतश्च सूर्याभिमंत्रणेधिष्ण्याभिमंत्रणेचोहोनवति॥अध्वनामध्वपतेप्रस्वास्तिरः स्वस्तिनोस्मिन्
पथीति। सूर्य। अग्नयः सगराः ऐन्द्रेणानीकेनपातास्माग्नयोगोपायतास्मान्नमोवोस्तुमास्माहिंसिष्टेति॥ऋत्विगभिमंत्रणंसचेनभवति.
ऋत्विजामभावात्।अपरेभिमंत्रणमध्वर्युः कर्तृकाणीत्याहुः॥ऋत्विगभिमंत्रणएवयाजमानमिति॥नानापुरोडाशपक्षेअर्थपरिमा.
णेजुहूपभृताबादायतत्रसर्वेषांसवनीयानांसमवदायतंत्रेणयागः एकपुरोडाशपक्षेसैंद्रस्यपंचशरावस्यसहैवयागः।बार्हस्पत्य
श्चेत्सवनीययागानंतरंबृहस्पतयेनुब्रूहि इत्युक्तोपस्तीर्यतस्यावदायततउपभृत्युपस्तारादिसवनीयानांबार्हस्पत्यस्यचस्विष्टकृदर्थं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मवदानं द्विरभिधारणं ॥ ततऽष्याश्राव्य बृहस्पतिं यजेति प्रैषः तं चेगात्विष्टकृद्यागः ॥ पंचशरावस्य होतृधिष्ण्ये निधानं न भवति ॥ भुक्तामंथिप्र
चारे अभिरायस्पोषेण यजमानानिति । यजमानचमसे होतापद्धति । युवं तऽपह्वयध्वमिति । यजमानऽपह्वयध्वमिति वा ॥ सर्वे प्रत्याह्रु
तपह्वत इति गृहपति प्रभृतयो होतारं पृष्ट्वा पृष्ट्वा यजमानाऽपह्वयध्वमिति च पृथ्वा सर्वे यजमानचमसे भक्षयंति ॥ एवं सर्वे यजमानानां
प्रत्येकं भक्षः । एवं सर्वेषु भक्षेषु । वैश्वदेवग्रहणेन्वारंभः ॥ पक्षे गृहपतिरन्वारभते ॥ माध्यंदिनीयसवनीयनिर्वापे प्रथमं पक्षपुरोडाश
निर्वपणं । तत्र पात्रासादने दर्णी पात्रे कर्मापवर्गयोरनासादनं ग्रागुदयनीयाद् इतिरात्रात् ॥ माध्यंदिने सर्पणाभिषवसिग्राभ्यावचनायुक्तं
माध्यंदिने आग्रयणानंतरं षोडशिनो ग्रहणं । ततऽक्थ्यः । तस्मिन्पक्षे मरुत्वतीयो वृद्धिग्रहः नियमेन । अग्नीदग्निनिति प्रैषे दक्षिणाऽ
पवर्तये तस्याभावः दधिघर्मे सर्वेषां प्रत्यक्षभक्षो नियमेन । दक्षिणाया अभावा । दाक्षिणाहोमाभावः । तत्र गृहपत्यादयः सर्वे यजमानाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृत्स्नानितानिधृत्वानागवादिदक्षिणानयनमार्गेण॥ यन्मेगदाप्रुषइतिमंत्रंजपंतोगच्छंति। अत्रमंत्रेअमुकामुष्यायणमित्यत्रामुकगोत्रअ
मुकशर्मणाअमुकस्यपौत्रममुकस्यपुत्रममुष्यापुत्रंकायायेतियथास्वमुच्चारणं॥ मंथौदनतिलमाषाणांनयनंभवतिपुरुषार्थत्वपक्षे॥
मंथादीनामपिप्रकृतौहिरण्यादिवद्दक्षिणात्वेनैवदानमितिहरिस्वामिनः॥ तन्मताश्रयणेगवादीवन्मंथादीनामप्यभावइत्यवसत्रेसदोगम
नसदस्यप्रेक्षणात्रेयप्रासर्पकदानादिगृहपतेः॥ तृतीयसवनार्थानांसवनीयानांनिर्वपणानंतरंसौम्यंचरुंनिरुप्याग्नीदाभ्रिनंद्विकपा
लंपुरोडाशंनिर्वपति। तत्रसवनीयपात्रासादनेत्रयोदशकपालानि। पुरोडाशपात्रीचेत्येतावदधिकं। अवभृथार्थवारुणनिर्वापः। प्राग्
दयनियादजिराच्चान्नभवति। प्रागग्न्यावाहकविग्रहाद्वसतीवर्यासेकः। ततःशाखाछेदः सन्नमनं॥ द्वितीयस्याग्न्योर्थेवसतीवरिग्रहणमत्रवा
सादनांतं। आदित्यग्रहार्थंगृहपतेर्हविर्धानप्रवेशनं। अन्वारंभश्च। तृतीयसवनेआग्रयणउत्तरंवाषोडशिनोग्रहणं॥ ॥आसादनांतं॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ततउक्थ्यग्रहणं॥ आशिरावेक्षणोपत्न्या अन्वारंभो नचोहः। प्रकृतावसमवेतत्वात्॥ अविरुद्धो नमध्ये पिंडपितृयज्ञवद्दाने प्रणेडाशस्य सप्त
दशादिचतुर्विंशतिपर्यंतायजमानसंख्ययाभागाः कर्त्तव्याः॥ तेषांभागानांमध्यादेकंभागमवदायसप्तदशधाविभज्य ब्रह्मणांपितृभ्यः
सर्वे प्रकृतिवत्पिंडदानं कुर्वंति॥ इयांस्तु विशेषः॥ ब्रह्मयजमानत्वेनयजमानचमसे पिंडदानं करोति। ब्रह्मपदार्थकर्तृकत्वात् ब्रह्मच
मसे च॥ ततस्तृतीयं सप्तदशभागमादायोन्नेत्रा पितृभ्यः सर्वेपिंडदानप्रकृतिवत्कुर्वंति॥ ॥उद्गाता च ब्रह्मवत्॥ यजमानचमसे स्वचम
से च पिंडदानं करोति॥ ततश्चतुर्थभागमादायहोतृपितृभ्य एव॥ होता च ब्रह्मवत्॥ उभयचमसे॥ ततः पंचमंभागमादायाध्वर्युः पितृभ्यः
एवमुन्नेतृपर्यंतं सर्वेषांपितृभ्यः। सर्वेपिंडदानं कुर्वंति। एकाधिकगृहपतिपक्षे प्रथमं सर्वेगृहपतिपितृभ्यो दत्वा ततो ब्रह्मादिपितृ
णामिति॥ सावित्रग्रहणोर्जिन्वयज्ञपतीन्भगायेति। प्राग्यज्ञायज्ञीयोपाकरणादग्निविमोचनवा॥ यज्ञायज्ञीये गृहपतिपत्नीः सर्वाभिः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पत्नीभिरन्वारब्धासती। उन्नातामीक्षन्ते उर्वसेकः सर्वासां पात्रप्रक्षालनांते उक्थ्यविग्रहणं। ततः सर्पणपूर्वकः षोडशी॥ प्रातःसवनाद्
दिग्रहगृहीतश्चेत्स्यात्तन्मतोग्रहणं॥ वाग्यमनं। न्वयसोन्नयनं। उपस्थानं। उपात्तमयं कृत्स्नेभ्य उपतिष्ठति। तृणाहिरण्ये हृपाकरणादि
भक्षांतं॥ ततःपुनः सर्पणपूर्वकाश्चतुःस्तोत्रस्त्रयः पर्यायाः। तत्रचमसैरेव सर्वेषु चतुर्णां स्तोत्राणामंतेषु प्रतिस्तोत्रमेकैकं शस्त्रं॥ तत्र
प्रथमस्तोत्रांते होतुः॥ द्वितीयस्तोत्रांते मैत्रावरुणः। तृतीयांते ब्रह्मणाच्छंसिनः। चतुर्थ्यांते छावाकस्येति॥ होतृप्रशास्तृशस्त्रयोरध्व-
र्योः प्रतिगरो होमश्च। इतरयोः शस्त्रयोरुभयं प्रतिप्रस्थातुः। सर्वेषु यज्ञायज्ञीयवत्पूतभृतश्चमसोन्नयनं॥ पर्यायाणां त्रयाणामा
दौ पृथक्पृथक्सर्पणं॥ ततः॥ पर्यायत्रयांते सर्पणं कृत्वा॥ होतृचमसाद्दीश्च मसानुन्नीय संधिस्तोत्रोपाकरणं॥ स्तोत्रांते होतुरा
श्विनंशस्त्रं॥ तत्राध्वर्योः प्रतिगर होता सूर्योदयानंतरं शस्त्रं समापयति॥ ततः शस्त्रांते प्रतिप्रस्थाताश्चितमासाद्य कंभ्यात्मानलभ्यापः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का.सू.प स्वष्वाजुहूयन्नतावदन्ते।चमसाध्वर्यवश्चमसात्॥अश्विभ्यां तिरोह्न्यानाथ सोमानामनुहूहीत्यध्वर्युराह॥ततःप्रतिप्रस्थाता जुह्वामुपस्ती
२१ र्यं सर्वमप्याश्विनं जुह्वामवधायद्विरभिघार्य प्रथमेवषट्कारेचमसैः सह जुहुयात्॥अध्वर्युराश्राव्याश्विभ्यांतिरोह्न्यान्सोमान्प्रस्थि
तान्प्रेष्येत्याह।वषट्कारानुवषट्कारयोःसर्वचमसानां होमः।अग्निमाहुतवच्छेषभक्षणं।सर्वभक्षाश्चमसामार्जालीयेचमसप्रक्षालनं
चात्वालमपरेणानिधानं॥ततऽल्पकसमासाद्यनुयाजाः॥बृहन्नंतैन्द्राग्नसवनीयपक्षेरिंद्राग्न्योर्वनस्पतेरिंद्रस्यवसुमतइत्यादि॥ए
कादशिनिपक्षेत्वग्नेर्वनस्पतेरिंद्रस्येति॥सौमायनपक्षेअग्नेरिंद्राग्न्योरिंद्रस्यसरस्वत्यावनस्पतेरिंद्रस्यवसुमतइत्यादि॥बार्हस्पत्यप
क्षेविश्वदेव्यावतोबृहस्पतेःसोमस्याश्विनोरुज्जितिमिति॥एवमिंद्राग्नीवनस्पतिरिंद्रोवसुमानितिच॥अग्निर्वनस्पतिरितिवा॥अग्निरिं राम:
द्राग्नीइंद्रःसरस्वतीवनस्पतिरिंद्रोवसुमानिति॥विश्वेदेवावान्बृहस्पतिःसोमोश्विनोतमपतुदंत्विति॥सर्वशाखाभिःसहप्रस्तरानु २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रहरणं॥ उदयनीयेग्निविमोकपक्षेन परिधिप्रक्षेपः॥ सर्वोपवेषहोमः।हारियोजनांते अग्नीन्द्धेष्यतिश्वसुत्यामिंद्राग्निभ्यामित्यादिवाचंय
छेत्संतं वसतीवरीपरिहरणपर्यंतं वृत्सणोवाग्यमनं॥ ॥तथाचछंदोगसूत्रं॥ अहर्गणेष्वेनंसदावाचंजछेति प्रैषेण प्रशास्तावाचं-
यमयतिराज्ञानंरक्षेतिन्वा हत्तुभयंकुर्यात्॥ आवसतीवरीणांपरीहरणात्तत्सत्रे पर्यायेणकुर्युरहीनेत्तुव्रह्मैवेति॥ ॥तथाचमात
वे॥ अतिप्रेषिते आग्नीध्रः स्वस्वधिष्ण्यस्यपश्चात्सभ्वः सुत्यामिंद्राग्निभ्यान्तुहलन्वाचंयच्छेत्यावेदयति॥ पत्नीसंयाजांतान्महात्निति छंति॥ तद
त्रुवाचंयच्छति॥ परिहृतास्तुवसतीवरीषुवाचंविसृजतइति॥ ॥शाखायनेन॥ अनुवषट्कृत एवमैत्रावरुणसंप्रेषित आग्नीध्रः स्वस्व
धिष्ण्यस्यपश्चादुपविश्यभ्वः सुत्यामित्याहेति॥ वेशालंभः॥ कर्कमतेसमिष्टयजुषोभावे वेशालंभाभावः। पत्नीसंयाज्ञाः पशुवत्।ना-
नागार्हपत्येगृहतेर्जाघन्यास्तथामाज्येन।पत्नीसंयाजांतानिसर्वाण्यहान्युदयनीयातिराश्चवर्जं॥ तेनसर्वेषुदक्षिणाग्निहोमः।पर्णा

का·सू·प पात्रादिकर्मापवर्गांतानामर्थकर्मणामभावः। प्रतिपन्नयत्नप्रवर्त्तंते। वेदयोक्तविमोकपक्षेयोक्तृणां च। एकहृद्दर्हिर्होमः पशुपुरोडाशभा
२२ गावेक्षणाभगप्राशनादि॥ पुनः शाखाछेदनाद्युपगूहनांतमुक्तन्यायेन॥ वसतीवरीग्रहणमत्रावसरे वा निधानांतं। युक्तामनेतिप्रैषः।
वसतीवरीपरिहरणं शालाद्वार्यमपरेण गृहपतिपत्न्यास्ते। उन्नरवेदिमपरेण गृहपतिः॥ एवं सर्वत्र वस्त्वांतरेवध्वाध्वर्थतः। सोमप
रिहरणं। वाग्यतस्य ब्रह्मणो रक्षणमाबोधनात्। इतरे दीक्षिताः समिदाहरणार्थं उन्नरहः श्रोषभूतस्वाध्यायार्थं च गच्छंति। सोमरक्षिता
तु तत्रस्य एव स्वाध्यायं करोति। इतरे च तस्य समिध आनीयार्पयंति॥ समिदर्थं स्वाध्यायार्थं च जगतां नां यदि कश्चिद्दर्शनार्थमप्पूपमो
दकादिकमर्पयंति॥ तदा तदहः हविरुच्छिष्टमपि ते भुंजंति॥ तत्राप्यश्नंति विधिबलात्॥ ततः समिदाहृत्यागच्छंति॥ ततः पूर्ववत्सुब्र राम:
ह्मण्याह्वानं॥ ततः सर्वे दीक्षिताः आहृताः समिधो हस्ते कृत्वा सर्वेष्वग्निष्वाहवनीयगार्हपत्याग्नीध्रीयदक्षिणाग्नीषु क्रमेण समिधादा २२

नं कुर्वंति। ततोपाकृतदोहः आतंचनं। निधानं। ततः पयस्यार्थं वत्सापाकरणं तस्मिन्नेवाहनि तदेव पष्ठस्य षडहस्य प्रथमाह्नोग्निष्टो
मसंस्थस्यारंभः। तत्र वैकल्पिकमग्नियोजनं। ऋतुकरणमग्निष्टोमिकं॥ अतिग्राह्यपात्रमधिकं पात्रयोजने॥ अंशुग्रहपात्रं च॥ आपोनि
धायांश्च दाभ्यौ· ततोधिषवणोपर्युपवेशनादि प्रातः सवने॥ आग्रयणग्रहणानंतरं वैकंकतेऽलखले अग्ने पवस्व स्वपा इत्यतिग्राह्य
ग्रहणं परिमार्जनं॥ एषते योनिरिति सादनं। ततऊक्थ्यादि। प्रातः सवने हविष्पवमानोपाकरणं· सदसि सर्वे षहः सुप्रायणीयोदय
नीयौ वर्ज्जयित्वा। पशुरैंद्राग्नो वा एकादशिनि पक्षे सारस्वतः॥ सरस्वत्यै जुष्टं। सरस्वत्यै छागस्य वपायै वपां हविषे। हविरित्यादि अतिरा
त्रवत् ऐंद्राग्नस्तोमायनपक्षयोः क्रतु प्रतिवत्सर्वं प्रैषता तं स्तोमापनपक्षे आग्नेयः सारस्वतपक्षे तत्पशुपुरोडाशो ष्टाकपालः॥ माध्यंदि
नेवांशुं ग्रहीत्वा तिग्राह्यकरणं। पृष्ठोपाकरणात् पूर्वं पृतभृतोतिग्राह्यग्रहणं वा॥ पष्ठकाले वेदिं दक्षिणेन रथसंसारणं॥ अत्र स्तु

का॰ क॰ प त्रांतरे विशेषः॥ पक्षे रथमपि वहेयुः पश्चात्प्रांचं दक्षिणतो वोदंचं वा बर्हिर्वेदिरथंतरस्य स्तोत्र इति॥ माहेंद्रमन्वतिग्राह्यहोमः॥ प्रतिप्रस्थातुः। इदम
२२ ग्नये वर्चस इति त्यागः। आगे वर्चस्वान्निति मंत्रेण सर्वैर्यजमानैरतिग्राह्यस्य भक्षणं कार्यं॥ प्रागच्छावाकविग्रहाद्वसतीवरीणामाधनीये वनयनं॥
अत्र चोन्नराहरथ्यैर्वसतीवरीणां ग्रहणं निधानांतं॥ बृहने सारस्वतपक्षे सारस्वत्या वनस्पतेरिंद्रस्येति। सरस्वतिर्वनस्पतिरिंद्रो वसुमानिति॥
पक्षांतरे इंद्राग्न्योर्वनस्पतेरिंद्रस्य वसुमतः॥ इंद्राग्नी वनस्पतिरिंद्रो वसुमान् सोमापन पक्षे अग्निष्टोमवत्। प्रतिपत्तिसमाप्तिः। शाखाच्छे
दनादि वत्सापाकरणांतं। वसतीवरीग्रहणादि निधानांतं॥ ततः परिहरणादि सुब्रह्मण्यांतं॥ समिदाधानं सर्वेषु। यथोपाकृतदोहादि पयः
स्यावत्सापाकरणांतं। सोमरक्षणमुज्झातुर्वाग्यतस्याबोधनात्॥ अन्यत्सर्वं प्रायणीयातिरात्रवत्। प्रातर्द्वितीयं पार्श्विकमहः संस्थं। क्रतुकर राम:
णे प्रथमपरिध्यालंभनं। अपररात्रे अपो निधायांश्वदाभ्यग्रहणं॥ प्रथमाहर्वत्॥ अतिग्राह्यग्रहणं ऽग्निष्टं नोजसेति मंत्रेण एषवनेयो नि रि २२

तिसादनं॥ इदमिंद्रायेजसेतिप्रयागः॥ सवनीये ऐंद्राग्नो वा। एकादशिनिपक्षे सौम्यः। तत्र सोमायजुष्टं। सोमायछागस्य वपायैः वपां हविषो।
हविरिति। अष्टाकपालः पुरोडाश आग्नेयविकारः। सोमायपुरोडाशस्यानुपुरोडाशं प्रस्थितमिति॥ पक्षांतरयोः प्राग्वत्। सोमायनपक्षे आ
ग्नेयैंद्राग्नौ छागौ पृष्ठकाले दुंदुभिशब्देनोपाकरणं॥ माहेंद्रमन्वतिग्राह्यहोमः। इंद्रौजिष्ठेतियजमानानां भक्षणं। यथादैवतं व्यूहनं॥ एकादशि
नावेतिपक्षे सोमस्य वनस्पतेरिंद्रस्य वसुमतः। सोमो वनस्पतिरिंद्रो वसुमानिति। ऐंद्राग्नपक्षे इन्द्रं॥ ॥सोमायनपक्षे॥ अग्नेरिंद्राग्न्यो वन
स्पतेरिंद्रस्य वसुमतः। अग्निरिंद्राग्नी वनस्पतेरिंद्रो वसुमानित्यादि॥ पत्नीसंयाजांते प्रतिपत्तिपरिसमाप्त्यादि पयस्यावत्सापाकरणांतं। सो
मरक्षणं होतुरवेधनात्॥ प्रातः पृष्ठ्यान्तीयमहड् - मेवा॥ यमग्न इति प्रथमपरिधानालंभनं। अंभ्वदाभ्यातिग्राह्याः पूर्ववत्। अदभ्रमस्य
ति अतिग्राह्यग्रहणमंत्राः पशवो द्वितीयाहर्वत्॥ एकादशिनिभ्रेत्योत्स्नः॥ तत्र पूष्णे जुष्टं नियुनज्मि। पूष्णे छागस्य वपाया इत्यादि अष्टाकपा

का॰सू॰प
२४

लः पुरोडाशः। आग्नेयविकारः सूक्ते पुरोडाशस्येत्यादि। माहेन्द्रमन्विति ग्राह्यहोमः। सूर्यभ्राजिष्ठेति मंत्रेणायजमानानामतिग्राह्यभक्षणं। इदं सू
र्याय भ्राजिष्ठायेति त्यागः। पशुकाले उपवाजनैः पश्वोपाकरणं॥ वूहने॥ सूक्तो वनस्पते रिंद्रस्य वसुमतः। पूषा वनस्पते रिंद्रो वसुमानित्यादि॥
पयस्यार्थवत्सापाकरणं मंत्रवर्ज्जवत्॥ सोमरक्षणमध्वर्योः प्रातः पशुश्चतुर्थमहः षोडशिसंस्थं॥ यमग्नइतिरराटपालंभनं॥ तूष्णीं प्रवेशो
वा। तत्राऽपरराात्रे पात्रासादने षोडशिपात्रमधिकं॥ अहूश्च दामोऽदयतीयातिरात्रपर्यंतं प्रत्यहं भवत एव॥ अतिग्राह्यस्य पक्षस्य प्रथम
एवत्र्यहे ग्रहणं॥ उत्तरत्र्यहे वा। उभयोर्वा उभयोस्त्र्यहयोर्ग्रहणपक्षे अस्मिन् त्र्यहे आदितात्र्यपात्रं प्रत्यहमेकैकस्य ग्रहणादि पूर्ववत्। पञ्चमे
ऽग्नौ वा एकादशिनीवार्हस्पत्यः। तत्र बृहस्पतये जुष्टं बृहस्पतये छागस्य वपाया इत्यादि। अष्टाकपालः पुरोडाशः आग्नेयधर्मकः। सोम
यनपक्षे आग्नेयैन्द्राग्नावजौ॥ तृतीय ऐन्द्रो मेषः॥ पशुकाले अरणिभ्यामुपाकरणं। उप्तानुकरणमंथनं॥ सोत्रांते आहवनीये भवतं न इति प्र

राम:
२४

हरणमग्नावग्निरिति होमपक्षे ॥ प्रातःसवनेति ग्राह्यग्रहणोत्तरकालं विकल्पेन षोडशिनो ग्रहणं ॥ माध्यंदिने वा ग्रहणं गृहीत्वा षोडशिनं
गृह्णीयात्। ततउक्थ्यं। ततो निग्राह्यं। ततो मरुत्वतीयं। एतौ द्वौ मुख्यग्रहौ। माहेंद्रस्तोत्रे होतुर्मुखाः॥ तत्र होतृप्रभृतयः प्रतिगरः॥ उ थो ३
३ ३ ३ ३ु ३ ३ ३ ३ु ३ ३ ३ ३ु मो दैवेति। यावतीषु ऋक्षु उक्थास्तावतीष्ववसाने ईदृशः प्रतिगरः॥ एवं वेषाकृतः॥ तृतीयसवने आग्रयणं गृ
हीत्वा षोडशिनो ग्रहणं। उपाकरणकाले वा प्रभृततः। अस्तमयसमये षोडशिन उपस्थानादि भक्षांतं॥ षोडशिनि विहृतासु ऋक्षु उ
थामो दैवम देइत्यवसाने। मोदमो दैवो थो इति प्रणवे। ऊहने यथा देवता। एकादशिनादेति पक्षे बृहस्पतेर्वनस्पतेरिंद्रस्य वसुमतः। बृह
स्पतिर्वनस्पतिरिंद्रो वसुमानिति। स्तोमायन पक्षे षोडशिवत्। ऐंद्राग्नपक्षे तु तं॥ ॥शेषसमाप्तिः॥ ॥सोमरक्षणं। ब्राह्मणाच्छंसितं.
प्रातर्वैश्वानरभुक्पंचमांप्रथमस्य पंचममहतभ्यसंस्थं। यमग्न इति परिधानं लंभनं। एकादशिनीपक्षे सवनीयो वैश्वदेवः। अन्य तृतीयाहवत्.

का.तू.प सावकयोदपाद्याप्रष्ठस्योपाकरणं॥यथादेवतंव्यूहनं॥विश्वेषांदेवानांवनस्पतेरिंद्रस्यवसुमतः॥ ॥इत्येकादशिपक्षे॥ ॥इन्द्राग्न्योर्व-
२५ नस्पतेरिंद्रस्यवसुमत इतिवा॥अग्नेरिंद्राग्न्योर्वनस्पतेरिंद्रस्येतिवा॥विश्वेदेवावनस्पतिरिंद्रोवसुमानितिवा॥इंद्राग्नीवनस्पतिरिंद्रोव-
सुमानितिवा॥अग्निरिंद्राग्नीवनस्पतिरिंद्रोवसुमानितिवा॥सोमरक्षणंप्रस्तोतुः॥प्रातःप्रभृत्यस्यषष्ठमहत्त्वसंस्थं॥तत्रैकादशिनिवे-
त्रिपक्षेसवनीयपुरोडाशः।तस्यभुपुरोडाशोष्टाकपालः।अन्यत्सर्वंतृतीयाहर्वत्॥अध्वर्योर्यजमानस्यचस्वयंकृतुयाजेषुयाज्यापाठः॥ततो
त्युग्रहयोर्वषट्कारनिमित्तंतयोरेवभक्षणं॥नहोतुः॥सांवाशिनेनपशूनामुपाकरणं॥तत्रसदसःपुरस्ताद्गत्वास्वस्वमात्रभिःसंयोज्यवियोज-
यंति॥वत्सानुत्तरस्यान्नयंति॥दक्षिणस्यांमातुःएवंक्रियमाणेगावोवत्सांश्चशब्दंकुर्वंति॥तत्सांवाशनं।तेनपशूपाकरणं॥ ॥अत्रच्छं- राम:
दोगसूत्रेविशेषः॥वारवंतीयस्यस्तोत्रेधेनुःसंवाशायेपुर्दक्षिणातःकृत्वोत्तरतोवत्सान्।ततःसमाप्तेस्तोत्रेपूर्वेणासदसंसप्रपाश्चिमेनाग्नीध्री २५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमुदीचीमस्तजेदिति॥ तृतीयसवनेत्थाविगृहे शस्त्रेषु सर्वेषु होतृप्रत्ययः प्रतिगरः॥ ॥तद्यथा॥ तत्रमैत्रावरुणो त्का उक्थ्शस्त्रे विहृतास्व
धु॥ अवसाने। ओ३थामोदैवमदे॥ मोदामोदैवोथोरति॥ प्रणवे विहृतासु प्राकृतः। ततो ब्राह्मणाच्छंसिनः शस्त्रे विशेषः। तत्रविहितेसोरस्व
क्षते त्याया सुचयो विंशतिसंख्यास्वृक्षु न्यूङ्खाः॥ ॥ततः प्रतिगरः॥ ३३३३३३३३३३३३३३३३मदेथमदैवो३३३३थामोदैवैत्यवसाने। प्रण
वेत्याकृतः। ततो राज्ञो वैश्वजनिनस्येति च तस्यः पारिक्षित्यआसां चतुर्थे पादे प्रथमचतुर्थयो रक्षयो वैश्वर्यं। तत्र ओ३थामोदैवेत्यस्मिन्प्रतिगरेति
प्रथमचतुर्थयोवैस्वर्यमेव भवति॥ ततआदित्याहृञ्जरितरंगिरोभ्य इत्याद्यासुचतसृषु शस्यशस्यमानासु रावाहृञ्जरितरोथामोदैवेत्यवसाने॥
तथाहृञ्जरितरोथामोदैवेति प्रणवे॥ ततः इहेत्थ प्रागपागुदगंधराग् इति च तस्रः प्रवह्लिकासंज्ञा॥ भुगित्यभिगरइतिति स्त्रः प्रतिगराः। आसांसप्ता
नांसत्तप्रतिगराः क्रमेण मलाकृति जरितरोथामोदैव ४ भ्वाजरितरोथामोदैव ५ शोधपंच मर्यंक्ति ५ पर्यासादोजरितरोथामोदैवः ६ गो३ फो३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रितरोथामोदैवेतिप्रगावे। ततोविमेदेवाइत्यस्यांपत्तौचीयप् यमप्ना जरितरोथामोदैवेत्यवसाने १ होताविष्टीमे २ जरितरोथामोदैवेतिप्रगावे। २॥
ततोयदेवासोललामगुमित्यास्या सुम्नूंखाः॥ तचावमानेप्रतिगरः॥ विइइई ३ इइइई १ इइइई २ किमयमिदमाहो १। ३ थामोदैवइति॥ ततोछ्र
वाकशास्त्रेप्रवोमहेमतयोयंविप्रा सुम्नूंखाः॥ तचावमानेप्रतिगरः॥ २॥ इहमदो ऽ ऽ ऽऽऽऽऽऽ ऽऽऽ ऽऽऽ ऽऽ मदेमधोर्मदस्यमदिरमदेवो ३ ऽ ३
ई थामोदैवेति। व्यूहने॥ एकादशिनावेतिपक्षे। इंद्रस्यवनस्पतेरिंद्रस्यवसुमतः। इंद्रोवनस्पतिरिंद्रोवसुमानिति। ऐंद्राग्नमपक्षे इंद्राग्न्योर्वनस्प
तेरिंद्रस्यवसुमतः॥ इंद्राग्नीवनस्पतिरिंद्रोवसुमानिति॥ सोमरक्षणंमैत्रावरुणस्य। षड्हेसंस्थितेवक्तनवदेत्। स्वाध्यायार्थनात्यंपृछेत्। ता
न्यस्मैप्रब्रूयात्। मधुप्राशनंसर्वैर्दीक्षितैः कर्त्तव्यं॥ घृतप्राशनंवा॥ ततः क्रमेणाग्निषुदिनेषुत्रयंछंदोमाउक्थ्यसंस्थाभवंति॥ तत्रप्रथ
मंचतुर्विंशतिस्तोमोद्दशरात्रस्यसत्रमगह:। तत्रैकादशिनावेतिपक्षेमारुतः सवनीयः तत्रमरुद्भ्यो जुष्टं मरुद्भ्यस्त्वाजुष्टंमरुद्भ्यः छागस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वपायै । वपामिति मरुद्भ्यः पुरोडाशस्यानु० पुरोडाशं प्रेष्य इति च ॥ द्वादशकपालः पुरोडाशः ॥ मरुद्भ्यः छागस्य हविषो ॥ हविः प्रस्थितमिति ॥
ब्रूहि नेम मरुतां वनस्पते रिंद्रस्य वसुमत इति । मरुतो वनस्पतिरिंद्रो वसुमानिति ॥ ऐंद्राग्नस्तोमायनपक्षे योरुत्क्थ्यसंस्थावत् द्वितीयश्चतुश्च
त्वारिंशस्तोमउक्थ्यसंस्थच्छंदोमा दशरात्रस्याष्टममहः ॥ ॥ तत्रैकादशिपक्षे ऐंद्राग्नयः पशुः ॥ तत्रैंद्राग्निभ्यामित्यादि प्रैषजातं ऊह्यं ॥ ऐंद्रा
ग्नस्तोमायनपक्षयोरप्युक्थ्यसंस्थावत्त तृतीयोष्टाचत्वारिंशस्तोमश्छंदोमाउक्थ्यसंस्थो दशरात्रस्य नवममहः ॥ तत्रैकादशिनायेति पक्षे सा
वित्रः पशुः तत्र सवित्रे जुष्टं । सवित्रे त्वा जुष्टं । सवित्रे छागस्य वपायै ॥ वपामिति ॥ सवित्रे पुरोडाशस्यानु० । पुरोडाशमिति च । अष्टाकपालः पु
रोडाः । सवित्रे छागस्य हविषः । हविः प्रस्थितमिति । ब्रूहि नेम । सवितुर्वनस्पते रिंद्रस्य वसुमतः ॥ सविता वनस्पतिरिंद्रो वसुमानिति । ऐंद्राग्नस्तो
मायनपक्षौ उक्तौ ॥ ततश्चतुर्थः छंदोमसंज्ञकमेव दशरात्रस्य दशममहरग्निष्टोमसंस्थं भवति ॥ ॥ तत्राग्निष्टोमवद्धर्माः ॥ ॥ एष्वध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·सू·प
३

र्मवर्ज्जं। एकादशिनावेति पक्षे वारुणः पशुः वरुणाय यजुषं। वरुणाय छागस्य इत्यादि। पशुपुरोडाशोष्टाकपालः। पक्षे ऐंद्राग्नः। सौमायन पक्षे आ
ग्नेयः। अत्राग्निमारुतस्य पात्रप्रक्षालनांते सुपानादि॥ नभ्यष्कषोडशी। अत्रात्याग्निष्टोमत्वं। सत्रोत्थानांतर्गतमानस्तोत्रकग्रहयागाभ्यासेनैव
संपद्यते॥ ॥नभ्यष्कषोडशिना॥ ॥सर्वशाखांतरविरोधात्॥ ऊहने वरुणस्य वनस्पतेरिंद्रस्य वसुमतः। वरुणो वनस्पतिरिंद्रो वसुमानिति·
पक्षांतरयोरूहः॥ दशमेहनि पत्नीसंयाजांते· सत्रोत्थानं॥ पुरापत्नीसंयाजेभ्यः संस्थाप्यवेति शांखायनः॥ तत्र गृहपतिप्रभृतयः सर्वे यजमानाः अ
पराह्णेशालाद्वार्यसमीपे आगत्य अपामुपस्पर्शनं कृत्वा शालां प्रविशंति॥ ततो ध्वर्युः॥ शालाद्वार्यस्य वाज्यं संस्कृत्य तमेव परिस्तीर्य समिधमाधा
य सकृद्गृहीतेनाज्येन हरति रिति शालाहार्ये सर्वे प्रयजमानेषु त्वारब्धेषु जुहोति। इदं पशुभ्यः॥ पुनः सकृद्गृहीत्वा उपस्तर्ज्ञं धरुणामिति तथै सत्रः २७
व द्वितीयामाहुतिं जुहोति॥ इदमग्नये इति त्यागः॥ ततो विहारमुत्तरेण परिक्रम्य धिष्ण्यावाव्यवायेन गत्वा परेण द्वारेण हविर्धानं प्रविश्यो त्तरस्या ह

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विर्द्धानस्यापरकूबरीमपराभृश्रंभिकामालभ्य सत्रस्य आद्विरसीन्यस्याम्नविसर्वे दीक्षिताः। तत्रस्यद्विसं ज्ञासामगायन्ति॥अथवोत्तरवेदेह्
त्तरवेदिश्रोरापामेतत्सामगायंति॥ततोयुवंतमिंद्रापर्वतेतिमंत्रेण दक्षिणस्य हविर्द्धानाक्षस्याधस्तान्मार्गेणप्राङ्मुखाहविर्द्धानपूर्वद्वारेण
निष्क्रामंति। ततः सर्वेपूर्वद्वारेणसदः प्रविश्यस्वासनेषूपविशंति॥ ततोध्वर्युः पृथिव्यापात्रेणवायुं द्रव्यभूतं प्रजापतिदेवतं गृहं गृह्णाति.
अत्रवायुग्रहेग्रहणंसादनं। स्तोत्रोपाकरणंहोमभक्षाहरणंभक्षणंच। एतानिसर्वाणिमनसामनोव्यापारेनैवकार्याणि। मनसैवैतद्व्रत
नीयंयदेतदेतच्चकरोतीति॥ तत्रपूर्वंपृथिवीपात्रत्वेनमनसाचिंतयित्वावायुद्रव्यंगृहीत्वाप्रदक्षिणावृत्तिःइतरथावृत्तीकृत्वामनसैवसादनं
चिंतनीयं॥ ततस्तृणाभ्यांमनसैवग्रहमुपस्पृश्यसदस्यागमनतणौसमर्पयेत्॥ मनसैवस्तोत्रोपाकरणंचिंतयेत्॥ ततउद्गातारः सर्परा
ज्ञाःऋक्षुआयंगौरित्यायाऋतिस्तुवते॥ ततोहोताचतुर्होतृन्व्याचष्टे।होतायदिनजानातितदायजमानश्चतुर्होतृव्याख्यानंकरोति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰व तत्राध्वर्यो होइ होतः ईहोतस्तथा होतरित्येवं होतः प्रत्ययः प्रतिगरः ॥ अत्र शांखायनो व्यवस्थामाह ॥ अध्वर्यो इत्यामंत्रितो होतरिति सर्वत्र प्रतिगृ
२८ णाति ॥ ईहोतस्तथा होतरित्याचक्षीरोत्तु गृणाति । ओमित्येकस्मिन्नवसाने । तथाहोतरिति अपरस्मिन् एवं वक्ष्यमाणं प्रजापतिरकामयतेत्या
चक्षाणे होतरिति गृहपतौ वा प्रतिगृणाति ॥ हो इगृहपतेरिति पक्षे इति शांखायनभाष्ये । अरात्सुरिमे यजमाना भद्रमेभ्यो यजमानेभ्यो भू
दिति एवमध्वर्युवेदविहितश्च प्रतिगरः ॥ ततः शस्त्रांते प्रदक्षिणहृत्नीतरथा हृत्नीकृत्वा मनसा ग्रहमादाया हवनीये गत्वा मनसैव हुत्वा मन
सैव भक्षमाहृति ॥ उपहवपूर्वकं मनसैवाध्वर्युर्होता च भक्षयति ॥ ततः सर्वे यजमाना ब्रह्मोद्यं वदंति ॥ निर्णयस्य ब्रह्मणो वदनं ॥ तत्र प्रथमं
यूपस्य दक्षिणतो ब्रह्मा । उत्तरतो होता । एवमुपविश्य ब्रह्मा होतारं पृच्छति ॥ कःस्विदेकाकी चरतीति ॥ ततो होता सूर्य एकाकीति प्रतिवच राम:
नं ददाति ॥ ततो होता कास्विदासीदिति ब्रह्माणं पृच्छति ॥ ब्रह्मा द्यौरासीदिति प्रत्याह ॥ तत उत्थाय पूर्वद्वारे सदः प्रविश्य स्वासने पूपविशंति ॥ त २८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रे पूर्वं होताध्वर्युं पृच्छति॥ कः स्विदेकाकी चरति। अध्वर्युः सूर्य एकाकी चरतीति प्रत्याह॥ ततोऽध्वर्युर्होतारं पृच्छति किं स्वित्सूर्यसमं ज्योतिरिति॥ ततो हो
ताध्वर्युं प्रत्याह॥ ब्रह्म सूर्यसमं ज्योतिरिति॥ ततो ब्रह्माणमुद्गातारं पृच्छति॥ उद्गाताऽपि वेत्थेति ब्रह्माणं प्रत्याह॥ तत उद्गाता केष्वंतरिति ब्रह्मा
णं पृच्छति॥ ब्रह्मा पंचस्वंतरिति प्रत्याह॥ तत उत्थाय उत्तरवेदिं परेण यथायतनं पर्युपविशंति॥ तत्र प्रथमं होता का स्विदासीदित्यध्वर्युं
पृच्छति॥ अध्वर्युर्द्यौरासीदिति तं प्रत्याह॥ ततोऽध्वर्युः का ईमरे इति होतारं पृच्छति॥ होता अजारे पिशंगिलेति प्रत्याह॥ ततो ब्रह्मा कस्य स्विन्मा
त्रामुद्गातारं पृच्छति॥ उद्गाता षडस्य विष्ठा इति तं प्रत्याह॥ तत उद्गाता कोऽस्य वेदेति ब्रह्माणं पृच्छति॥ वेदाहमस्येति तं प्रत्याह॥ ततो यजमा
नः पृच्छामि त्वा परमंतमिति अध्वर्युं पृच्छति॥ ततोऽध्वर्युरियं वेदिरिति तं प्रत्याह॥ ततो नस्तमिते सूर्ये सर्वे उदुंबरीं हस्तेन गृहीत्वा वाचं यच्छं
ति। अस्तमिते सूर्ये नक्षत्रदर्शनानंतरं सदसो निःक्रम्य परेणोत्तरवेदिमुपविशंति॥ ततोऽध्वर्यो रेकहविर्होमादि प्रवृत्ति समापयति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰स॰प ततः शाखाछेदनमवगूहनांतं। वसतीपरिग्रहणमत्रवा॥ अपरेणोत्तरेणवेदिं दीक्षितानामासनं। व्युत्क्रामतेतिप्रैषपूर्वकं प्रतिप्रस्थाताव
२२ सतीपरिग्रहणं॥ आग्नीध्रनिधानं तं करोति। गृहपतिस्तु सोमपुत्संगे कृत्वावापरेणोत्तरवेदिआस्ते। ततः सर्वे दीक्षिता येन कामेन सत्रं
कुर्वाणा भवंति। तेन कामेन वाग्विसर्गं कुर्वंति। ऋद्धिनः कामः सानः समृध्यतां। स्वर्गोनः कामः सनः समृध्यतां॥ ब्रह्मवर्चसमेवनः त
त्रः समृध्यतां॥ ~~अथवा॥गृहपतिर्यं प्रतिब्रूयात्।अमुकत्वं सुब्रह्मण्यामाह्वयेति॥ सुब्रह्मण्याह्वानं करोति~~॥ मितिएवं एतत्सर्वेषां मेककाम
नापक्षे नुभुर्भुवस्वः सुप्रजा इत्यनेन मंत्रेण सर्वेवाचंविसृजंते। भिन्नकामनात्वेवं। केचित्स्वर्गादिलोककामाः केचित्प्रजाकामाः केचित्प
शुकामा इति प्रतिहर्तुः सोमरक्षणं। समित्स्वाध्यायोपक्रमः। तत्राप्यशनं आगमनं। ततो गृहपतिः स्वयमेव सुब्रह्मण्याह्वानं करोति॥ राम:
अथवा॥ गृहपतिर्यं प्रतिब्रूयात्। अमुकत्वं सुब्रह्मण्यामाह्वयेति॥ सुब्रह्मण्याह्वानं करोति॥ तत्र सुब्रह्मण्याह्वाने सर्वेषां क्रमेणानाम २२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संकीर्त्तनं क्रीयते॥ ततः सर्वैऽपमाहृयस्व इत्येवमनुज्ञा सुब्रुह्मण्यातः प्रार्थयित्वायन्नैत्येकं सर्वे ष्वग्निषु अस्तमिते समिदाधानमुक्तं तत्कुर्व-
ति॥ आहवनीये समिधमभ्यादधातीति हरिस्वामिनः। ततो दोहाः पयस्यार्थं वत्सापाकरणं च। प्रातः उदयनीयो तिरात्रः॥ तत्रप्रायणीया
तिरात्रवत्सर्वं। यमग्नइति छुदिषश्चालंभनं। तूर्ष्णीं हविर्द्धाने प्रवेशो वा पात्रयोजने अंशुपात्र षोडशिपात्रे अधिके। सवनीय ऐंद्राग्नो वा।
अथवा तिरात्रिकं। स्तोमायनं वा। एकादशिनावेतिपक्षे आग्नेयादीनामेकादशानामेकादशस्वहःसु कृतत्वात्॥ द्वादशस्य चाभावात्॥ पु
नरेकादशिनानां प्रथमाग्नेयो द्वादशे हनि उदयनीयातिरात्रे कर्त्तव्यः। अथवा सर्वसमासः सर्वे आग्नेयादयो वारुणांता एकादशापि प
शवो द्वादशे हन्यालंभनीयः॥ अथवा एकादशिनावेतिपक्षेपि द्वादशेहनि ऐंद्राग्नः कर्त्तव्य इति त्रयः पक्षाः। माध्यंदिनसवनीयनिर्वापेः।
प्रथमं यथा पशुपुरोडाशनिर्वापः॥ तत्र पूर्णपात्रं कर्मापवर्गे चेतावदधिकमासाद्यते॥ तृतीयसवनसवनीयैः सहसौम्याश्विनवारु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·त्त·प
३०

णानीनिर्वापः॥ प्रणयनानंतः वसतीवरीग्रहणाभावः। नियमेनाग्निमोकः हरियोजनानंतरं श्वः सुत्यामिति प्रैषस्याभावः। वैशालंभादि॥ समिष्ट-
यजूंष्येकादश॥ तत्रयजमानेभ्योऽनुविशं दधातस्वाहेत्यहः। ततआसंद्योऽदुंवरीहरणादितत्रविषाणादिग्रासनेतासांवहुत्वेपिमाहिभूरित्य
स्यानूहः। प्रकृतौद्वयोर्मेखलाकृत्तविषाणयोरेकवचनांतस्यविनियुक्तत्वेनासमवेतवचनत्वात्। ऊहंछंहीतिवाचनमपोवक्रमणावाच
नंचसर्वेषां। सर्वेषामपोवक्रमणं। सर्वेषांसपत्नीकानांस्नानं। गृहपतेस्तस्यत्याश्चसमिदाधानं॥ ततोद्वादशानामपिगानंपूर्णपात्रादि-
कर्मापवर्गान्तानांसमापनंकार्यं॥ इतिसंप्रदायः॥ अनूवंध्यांतेसर्वसमापनीयमितियाज्ञिकाः। ततःकृत्स्नाजिनांकेकरणंगृहपते॥ ततः
स्रुवाहुतिः॥ सप्तदशगार्हपत्येसप्तदशोदयनीया॥ एवमधिकगार्हपत्यपक्षेअधिकाअपि। तत्रविरोधाद्बहवःकर्तारः। तत्रशालाद्वार्यास्पृ राम: ३०
थग्गार्हपत्यस्तुसाधारणएकएव॥ तेनहविःश्रपणपात्रप्रतपनादयः सर्वेषांतत्रैव॥ तत्रमुख्योऽध्वर्युः प्रणीताप्रणीय सर्वाहवनीयाऽ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तरेणानिदध्यात्॥ परिस्तरणं यथास्वं। हविर्द्धारणमनःपात्र्यादिकमेकमेव सर्वेषां साधारणमुपसर्जनीपात्रं होमदृषदनं च॥ शेषं पृथक्
पृथक् पात्रासादनं॥ धूरीषारोहणावेक्षणापङ्क्तिनिरसनालंभनान्यध्वर्योः आरोहणं सर्वेषां॥ ग्रहणं च॥ शेषाभिमर्षणमध्वर्योः। प्राडी
क्षणावरोहणागमनसादनानि भेदेन॥ ब्रह्मन्हविः प्रोक्षिष्याम इति प्रैषः एवं सर्वत्र। प्रोक्षतं यज्ञं देवता वर्द्धयत पृयं नाकस्य पृष्ठे यजमानाः
संतु॥ सप्तर्षीणां ६ सुकृतां यत्र लोकः स्तत्रेमं यज्ञं यजमानांश्च धत्तं। ई प्रोक्षतेति प्रसवः एवं सर्वत्र प्रोक्षणेषु। पूर्वान्परिग्रहान्परिग्रहीष्यामः
इति परिग्रहे। बृहस्पतयः परिग्रहीतवेदीः सुमा वो देवाः सदनानि संत्वासु वर्हिः प्रथताꣳ साध्वंतरिहिꣳ स्ना पृथिव्यो देव्यो देवं संतु दे
वतावर्द्धयतं पृयं नाकस्य पृष्ठे यजमानाश्च धत्तेति। प्रतिगृह्णीतेति निरु। प्रोक्षणीरासादयेध्मान्बर्हिꣳ ष्युपसादयः स्रुचः संमृड्ढि पत्नी
ꣳ सन्नह्याज्येनदेहीति॥ होतृषदनं उत्तरस्यां वेदौ। अग्निभ्यः समिध्यमानेभ्यो नुब्रूहि इति॥ अग्नीनग्नीन्संमृड्ढीति। अनुक्रमेणा सर्वेषां।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰स॒॰प
३१

संमार्गः॥होतृवरणमध्वर्योरेव॥ प्राशित्रग्रहणमेकं॥इडापात्री चाध्वर्योरेव।सर्वपवित्रैर्मार्जनं॥ पवित्रप्रतिपत्तिर्यथास्वं।अनुयाजप्रैषे तु
ब्रह्मन्प्रस्थास्यामः।समीधआधायाग्नीत्सम्मृड्ढिऽ प्रतिष्ठेति प्रसवः।समिद्वन्मंत्रणे एतावोअग्नयः समिधस्ताभिर्वर्द्धध्वं चाप्यायध्व
मिति।तत्प्रैषेश्च नुप्रहरतइति संवादेषुश्चोध्वर्योरेव।स्वस्वभागवेक्षणं प्राशनंच।भागावेक्षणस्य गृहपतिकर्तृत्वपक्षे सर्वाने
कीकृत्वावेक्षणं विभज्यप्राशनमिति।गृहपतेर्गार्हपत्ये एकाअनूवंध्या॥प्रथमयोः पक्षयोः प्राजहितं विभज्य सर्वास्वरणिषु समारोप्य
निर्मथ्यसमन्वथोदवसानीयाइति संप्रदायः।पृथक्पृथक्सर्वैषामुदयनीया भवंतीति शांखायनमानवादिसूत्रेषु।एकगार्हपत्यप
क्षे एकारणिपक्षे च प्रकृतिवत्॥पुनरुद्धृत्य मैत्रावरुणीपयस्या॥ततः सहस्वद्वयं ब्राह्मणान्भोजयेत्।ततो गार्हपत्यं विभज्य यथास्वं सा रामः
यमाहुत्यः।आदीपनं।स्वस्वगार्हपत्यान्गृहीत्वा प्रवेशनं।अग्न्यंगभूतासौत्रामणीऽदवसानीयेष्टकापशुपयस्यावदग्नींसमुप्य सर्वैः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहकर्त्तव्या। तत्रापि यजमान एव ऋत्विजं अदक्षिणा प्रयोगः। षड्भ्योतिरिक्ता द्वादशकापक्षु दीक्षणीयादाविव यजमानमात्रं कुर्वन्ति॥ इति के
चिदाहुः। अपरे तु पृथगेव सौत्रामणीमिच्छन्ति॥ ❀ ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिक
देवेन कृतायां कात्यायनसूत्रपद्धतौ सत्रात्मको द्वादशाहः समाप्तः॥ १२ ॥ अथाहीनात्मको द्वादशाहेभिधीयते॥ तत्रैको यजमानो
भवति द्वौ वा। बहवो वा। त्रिप्रभृतिसंयतसंख्या बहवोपि परार्द्धपर्यन्तयजमाना भवन्ति। ऋत्विजस्तु यजमानव्यतिरिक्ता एव। एको द्वौ वा
बहवो वा अहीनेन यजेरन् तान् दीक्षिता याजयेयुरिति शाखान्तरात्॥ तत्रानेकयजमानपक्षेग्निसाधारणकरणादि सर्वं सत्रात्मकद्वादशा
ह्नवति॥ इयत्तु विशेषः। ऋत्विजस्तु अदीक्षिता ब्राह्मणा भवन्ति॥ दक्षिणादानं च भवति त्रिप्रभृतिबहुयजमानपक्षे अस्माकमप्येवं वर्द्द
न्तूहः। सत्रवत्। द्वियजमाने केतु सर्वाणि यजमानाभिधायीनी यद्यानि द्विवचनान्तानि उच्चारणीयानि॥ ॥ तत्र दीक्षा द्वादश॥ उपसदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशस्तुत्या द्वादशाह एवं षट्त्रिंशदहो हीनो द्वादशाहो भवति॥ तत्र गवां सहस्रदक्षिणा भवति अस्मिन्पक्षे हिरण्यादीनामन्य दक्षिणानां नि-
वृत्तिः॥ अथवा प्रत्यहं प्राकृती अग्निष्टोमिका दक्षिणा भवति। काठके दक्षिणाः प्राकृती रोन्वह। मनूक्त दक्षिणो यथोक्त पूक्त दक्षिणो वृत्ति॥
तत्र प्रत्यहं। प्राकृतं दक्षिणापक्षे अश्वदाश्चैति स्त्रोन्तं वध्यात्वे धातवी त्वेन तत्र भवति किंचिदधिक सहस्रदक्षिणापते अश्वदाश्चवर्जं ए-
तत्सर्वं भवति। तत्र द्वियजमाने दैवर्त्विग्वरणे। अग्निर्नो होता॥ अदित्यो नावध्वर्युः। चंद्रमा नो ब्रह्मा पर्जन्यो नोद्गाता॥ आपा नो होत्राशंसि-
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰स्रु॰प ५ र्जुः द्वितीया चोभयतः प्रांतयोर्मुखे वंधनार्थ्यांत्वगा चक्षुः श्रोत्रयोरंतरालेन शिरस्थापनाय तृतीया चक्षुर्योर्धस्तान्मुखस्याग्रे प्रांतयोः पूर्वक्रम
ज्वामुभयतो वद्धा चतुर्थी चक्षुःश्रोत्रांतरालवर्त्तिन्यां दक्षिणतो वध्वा मुखे र्यामुखे प्रवयणानंतरं ग्रीवाया अधस्तान्नीत्वाऽन्तरप्रदेशे वंधनार्था
पंचमी चावलंबनरज्जुवलासंज्ञा ॥ एवं मुखेर्यः पंचांगः कार्यः । तत आहवनीयस्योत्तरतो रत्निमात्रे वंशमयीअरत्निमात्री प्रादेशमात्री वाऽभ
यतस्तीक्ष्णा सुषिरा सच्छिद्रा अभ्रिः स्थापनीया ॥ सा च कल्माषी स्वभावतः परिपाकवशेन विचित्रवर्णा अभावे अकल्माष्यपि भवति ॥ केचित्
सुवर्णमयीमभ्रिमिच्छंति । तत आहवनीयस्योत्तरतोऽर्थात्वरिमाणं चतुरस्रं परिहृतं कृत्वा तन्मध्ये सप्तसंस्कारान्कृत्वा सिकतानामुपकीरणं कु
र्यात् ॥ तत एकस्मिन्पात्रे आर्द्राः पालाशत्वचः कृत्वा तस्मिन्नुदकमासिच्य तत्पात्रं दक्षिणाग्नावधिश्रित्योदकमुत्कालयेत् ॥ ततः पूर्णाहुतिव राम: ५
दाज्यं संस्कृत्याष्टगृहीतं जुह्वां गृहीत्वाहवनीये परिस्तरसमिदाधानपूर्वकं प्रजानः प्रथमं मनः इत्यादिभिरष्टाभिर्ऋग्भिः संततमविच्छिन्नं स्रुच

मूर्द्धानमुदग्रकृन्तजुहोति॥ अष्टानामंत्रेष्वेकः स्वाहाकारः इदंसवितुरितित्यागः। अथार्चीत एव संततं जुहुयान्नादित इतिसंप्रदायः। युंजान
इत्यत आरभ्यांतपर्यंतं संततमित्यपरे॥ ततो देवस्यत्वेति मंत्रेण गायत्रेण छंदसांगिरस्वदित्यंतेनाभ्रिमादाय। दक्षिणहस्तस्यामेव हस्ताभ्या
धायेत्यभिमंत्रयते॥ ततोभ्रीं हस्तस्थितायामेवाश्वादीनभिमंत्रयते। प्रतूर्त्तमित्यश्वं युंजाथामितिरासभं। योगेयोग इत्यजं। ततोश्वादी
नांस्पर्शमकुर्वन्नेव पाणिमुद्यम्यमंपप्रकाशने नैवाश्वादीन्प्राच्यां ऽक्रमयति गमयतीत्यर्थः॥ प्रतूर्वन्नित्यर्द्धर्चेनाश्वं। ऽउर्वंतरिक्षमित्यर्द्धर्चे
नरासभं॥ पृथिव्याः सधस्थादित्यजं आभरंते॥ ततो गार्हपत्याग्नय इंधनानि प्रक्षिप्य प्रदीप्ताः कार्याः। ततो ज्वलत्स्वग्निष्वाहवनीयमु
त्तरेण ब्रह्मयजमानाध्वर्यवोग्निपुरीष्यमंगिरस्वदच्छेम इति मंत्रेण पिंडं प्रतिगच्छंति सर्वे। अश्वादयश्च दक्षिणतो वस्थिता एव ब्रह्मा
दिभिः सहैव पिंडं प्रतिगच्छंति। ततो गमने प्रारब्धेध्वर्युरग्निं पुरीष्यमंगिरस्वद्भरिष्याम इति मंत्रेण देवपितृमनुष्याणां शं ऽ इत्यर्थ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निः प्रयोजनमनवद्या पुरस्तदमीक्षते। ततो वल्मीकवपासमीपे गत्वा तां मूर्ध्ना हस्तेन गृहीत्वा तिष्ठन्नेव तस्याश्छिद्रेण पिंडं विलोकयति। अन्वग्नि
रिति मंत्रेण पिंडं दृष्ट्वा॥ वल्मीकवपां स्वस्थान एव अधो निदधाति॥ ततः पिंडसंनिधौ गत्वा। आगत्य वाजीत्यश्वमभिमंत्रयते॥ ततः आक्र
म्य वाजिन्निति मंत्रेणाश्वस्योत्तरपूर्वपादेन पिंडमधिष्ठापयति॥ अश्वस्याग्रिमं सव्यपादं गृहीत्वा पिंडस्योपरि स्थापयतीत्यर्थः॥ ततोऽश्व
पादे पिंडोपरि स्थित एवोत्थायाश्वस्योपरि दक्षिणं हस्तमसंस्पृशं धारयन्॥ द्यौस्ते पृष्ठं पृथिवी निमंत्रं पठेत्॥ ततउत्क्रामममहत इ
ति पिंडादश्वमुत्क्रमयति। अवतारयति। तत्र दवतारितमश्वमुदक्रमीद्रविणोदा इत्यभिमंत्रयते॥ तत आहवनीयवत् पिंडस्य दक्षि
णतोऽश्वं प्राङ्मुखं स्थापयति। ततः पश्चाद्ब्रह्म। ततः पश्चाद्यजं। तौ पूर्वतश्च स्थितावेव भवतः ततो ब्रह्म यजमानौ पिंडस्य दक्षिणत
उपविशतः ततः साज्यसंस्कारः। स्रुवस्यैव संमार्गः। पिंडस्य परिस्तरणं। ततः स्रुवेणाज्यं गृहीत्वा पिंडस्योपरि यदश्व पदं प्राक्कारितं तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वेआहुती जुहोति ॥ तत्र मंत्रे संहितापाठद्वयं विशेषः आ त्वा जिघर्मि मनसा घृतेन प्रतिक्षियंतं भुवनानि विश्वा । मर्यश्रीस्पृहयद्वर्णो
अग्निर्नाभिमृशे तन्वा जर्भुराणः स्वाहेत्येवं । व्यतिषक्तायां प्रथमं इदमग्नये ॥ आ विश्वतः प्रत्यंचं तिघर्मरक्षसा मनसा तज्जुषेत ॥ पृथुं
तिरस्वा न यमा द्रुहं तं व्यविषमन्नैरभसं दृशानं ॥ स्वाहेत्येवं ॥ व्यतिषक्तायां द्वितीयं ॥ इदमग्नये ॥ ततोऽभिं गृहीत्वा पिंडं त्रिः परिलि
खति ॥ तत्र परिवाजपतिरिति पिंडं परितः प्रथमां लेखां प्रदक्षिणां सर्वतो लिखति ॥ ततः परि त्वाग्न इति पूर्वरेखाया बहिर्द्वितीयां
लेखां करोति । ततस्त्वमग्ने द्युभिरिति द्वितीयलेखातो बहिः तृतीयां लेखां करोति ॥ ततो भ्यादेवस्य त्वेति द्वाभ्यां खनाम इत्यंताभ्यां
पिंडगर्तं पिंडांतरालप्रदेशे सर्वतः खनति । ततः पिंडस्योत्तरतः प्राग्ग्रीवमुत्तरलोम कृष्णाजिनं कृष्णग्रीवा स्तीर्य अपां पृष्ठमसि त्वनेन
पुष्करइत्यंतेन कृष्णाजिनस्योपरि पुष्करपर्णं छिन्नाग्रं निदधाति । ततो दिवो मात्रपेति पुष्करपर्णं विमार्ष्टि विमार्जने पृष्ठ विपुलं क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰ सू॰ प
७

णेनेत्यर्थः। ततः शर्मवर्मस्थ इति द्वाभ्यां कृष्णाजिनपुष्करपर्णे तद्देवाभिमन्त्रयति॥ ततः पुरीष्योसीत्यनेन पिंडमभिमन्त्रयति॥ ततः पिंडं दक्षि
णप्रदेशे अग्निसहितेन दक्षिणहस्तेन गृह्णाति॥ उत्तरप्रदेशे केवलेन सव्यहस्तेन एवं दक्षिणोत्तराभ्यां उभाभ्यां हस्ताभ्यां समग्रं निः
शेषं पिंडं परिगृह्यैकवारेणैव तूष्णीं सर्वं पिंडं हृत्वा मग्नइति षड्भिर्मंत्रैर्दर्शतमित्यंतैः पुष्करपर्णस्योपरि निदधाति॥ ततः श्वभ्रम
ध्येऽपो देवीरुपसृज इत्युदकं निनयति॥ ततो हस्तेन वा न मृत्पाघ्रसंते वा पुरिति मंत्रेणावटमध्ये प्रक्षिपति॥ ततस्तूष्णीं सर्वादिग्भ्यो
दिग्भ्यः सकाशादवटमध्येऽनामिकया पुरीषं प्रक्षिपति। प्रथमं पूर्वतः ततोऽपरस्याः ततो दक्षिणतः ततऽउत्तरतः ततआसीनयोः कृ
ष्णाजिनपुष्करपर्णयोः प्रांतात्सर्वतऽउद्गृह्णाति॥ बंधनार्थं मूर्ज्जान् करोति॥ मुंजानोऽप्योतिषेत्यर्थेन। ततस्त्रिगुणेन मुंजमयेन योक्त्रेणावासो   राम:
ऽग्नश्च इति द्वैवेन ततान्मूर्ज्जान् कृतान् कृष्णाजिनपुष्करपर्णयोरंतान्बध्नाति। ततस्तूष्णीं पिंडमादायोदुतिष्ठ स्वध्वरेति मंत्रांतेऽत्तिष्ठति॥   ७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः ऊर्द्ध्वबाहुः प्राच्यां दिशि पिंडमुच्चं धारयति ॥ ऊर्द्ध्व ऊषुण इति ॥ ततस्तस्मात्तु देशात्पिंडमवहृत्य नीचैरानीयनाभेरुपरि पिंडं धारयन्
अश्वादीनभिमंत्रयते । तत्र सजातो गर्भ इत्यश्वं । स्थिरोभव वीड्वंग इति रासभं ॥ शिवोभव प्रजाभ्य इत्यजं ॥ ततोऽश्वादीनामुपरि पिंडं धार
यति ॥ तत्रप्रैतुवाजीकनिक्रदद् इति मंत्रेणप्रेर्यं तेनाश्वस्योपरि पिंडं धारयति ॥ ततो वृषाग्निमित्यर्द्धेन रासभस्योपरि पिंडं धारयति ॥
ततोऽग्न आयाहीति पादेन खरात् पिंडमाहृत्याहृत ७५ सत्यमृत ७६ सत्यमित्येतावता मंत्रेणच्छागस्योपरि च्छात्पिंडं परिहृतमध्ये तिधा
न पर्यंतं संततन धारयति । ततोऽजं तत्रस्थितमेव प्रदक्षिणमावर्त्य प्रत्यङ्मुखं कारयित्वास्तत्रस्थितमेव गर्द्दभं तथैव कारयित्वा
श्वमपि स्वस्थानस्थितमेव प्रदक्षिणमावर्त्य प्रत्यङ्मुखं कारयेत् । एवं कारयित्वाऽजस्योपरि च्छात्पिंडं धारयन्नेव प्रत्यश्वादिभिः समहितो
श्वादिभिश्चाहवनीयं पूर्वेणैव परिहृतं प्रतिगच्छति ॥ तत्र परिहृतं प्रतिगमनेन्त्वारश्चे पूर्ववदग्निमुज्ज्वलन्तमाहवनीयसमीपमाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

का.क्र.प
८

तः सव्यहस्तपृष्ठवमीक्षतेऽस्मिंश्चरीप्यमंगिरस्वद्गतमद्दमंतेन ॥ ततस्तत्र रतो गत्वा श्मशानद्वारेण परिहृतं प्रविश्य दक्षिणतो वस्थितादजास्विंदु मुत्तरतो वता
र्यङ्गो यथय: प्रतिमोदध्वमिति द्वाभ्यां मृगभ्यां परिहृतमध्ये निदधाति ॥ अस्मिन्नेवावसरे परिहृतं कृत्वा सप्त संस्कारान् कृत्वा सिकतो पकिर
णंच कृत्वा ततः पिंडनिधानमिति संप्रदाय: । ततो विपाजसा पृथुनेति मंत्रेणायोक्तवि मुंचति ततोऽजस्य लोमान्याच्छिद्याद पा। श्वरासभ छाग
नैशाली दिशं प्रत्युत्सृजति ॥ ततो यद्दक्षिणाग्नौ ग्नौ पूर्वमधिश्रितमुक्तालनार्थमुदकं तपेण कषायपक्वोदकं ॥ तस्मादुदकात्केन मुद्गलपात्रां
तरे स्थापयेत् ॥ ततआपो हि ष्ठेति तिसृभिः तर्पणाकषायपक्वमुदकं पिंडस्योपर्यासिंचति ॥ ततः केनं न्ह्लीं पिंडस्योपर्यासिंचति । ततो मित्रः
संसृज्येति मंत्रेणाजलोमभिः पिंडं संसृजति संयोजयति ॥ ततो रुद्राः संसृज्य पृथिवीमित्यनेन शर्कराचूर्णैरयोरसचूर्णैरश्मचूर्णैः सह पिं राम:
डं संसृजति ॥ शर्कराः सूक्ष्माः कंडुका । अयोरसः कीटअस्माहृदृ पाषाण ॥ ततः स ठंस्पष्टां वसुभी रिति त्रिभिः पिंडं संयोतिमिश्रयति ॥ ततो य ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जमानस्य प्रथमपरिगीता· पत्नी अथाढासंज्ञामिष्टकां यजमानपादप्रमाणाभ्यालिखितां करोति॥ ॥ततो यजमान उखां करोति॥ तत्र पूर्वं उखा
तलस्य करणपर्याप्तां मृदं मखस्य शिरोसीत्येतावता मंत्रेण मृत्पिंडमादत्ते। ततस्तां मृदं भूमौ निधाय वसवस्त्वेति मंत्रेण प्रथयति विस्तारयति·
प्रथमेन प्रादेशमात्रं समचतुरस्रमुखायास्तलं करोतीत्यर्थः॥ तत एव मुखोतलं निष्पाद्य सर्वतश्चतुर्ष्वपि पार्श्वेषु तस्य प्रथितस्य तलस्यांता
दुन्नयति मध्यमप्रदेशापेक्षयांगुलमात्रमुच्चां करोतीत्यर्थः। ततो रुद्रास्त्वा कृण्वंत्विति मंत्रेण प्रथमं धातुमादधाति॥ तेषामुन्नीयतामंतानामु
रि सर्वतः प्रथमां पिंडिकां संयोजयतीत्यर्थः। ततः शिथिलयामृदा धातुसंधिं सम्प्लिंपति॥ ततो हस्तमुदकेनार्द्रीकृत्य सर्वतः श्लक्ष्णां सुकु
मारां करोति। तत आदित्यास्त्वा कृण्वंत्विति मंत्रेणोत्तरं धातुं उपरिवर्त्तमानां पिंडिकामादधाति॥ संयोजयति॥ ततो विश्वेत्वेत्यनेनोखां समाकरो
ति उखा हि द्व्यर्द्धप्रादेशमात्री भवति। यदि पूर्वोक्तधातुद्वयाधानेनाधिकप्रमाणा निष्पन्ना तदानेन मंत्रेणाधिकां छित्वा प्रादेशमात्री समां कुर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰सू॰प
२

त। यदि प्रदेशात् प्रमाणतो भाष्यां हस्तापार्श्वं प्रथमेन वर्द्धयित्वा अनेन मंत्रेण समां कुर्यात्॥ एवमेकपक्षप्रदेशमात्री ऊर्द्धा प्रादेशमात्रेव
तिरश्चीडरवा कार्याः पंचपक्षपक्षेतु पंचप्रादेशाइषुमात्रीना तिर्यक्प्रागुदगायता कार्या सा च पंचप्रादेशपक्षे पंचपञ्चालोकव्यापिनी क्षेत्रफ
लेन कार्या ऊर्द्धा तु प्रादेशमात्र्येव इषुमात्री पक्षे तु पंचप्रादेशप्रमाणया रज्वा साधनीया। सा च क्षेत्रफलेन पंचविंशति प्रादेशा संपद्यते॥ त
तडरवाया ऊर्द्धप्रमाणस्योपरि वर्त्तमाने तृतीये भागे सर्वतश्चतुर्थपि पार्श्वेषु वर्त्तिरेखां मेखलां मृन्मयीमेवकं दोरकाकारां करोति। एवं तिर
श्चीं। वर्त्तिं सर्वतः कृत्वा ततस्तलींच तस्रो वर्त्तीः प्रतिदिशम् ऊर्द्धाः करोति तत्र प्रथमं मुखायाः पूर्वपार्श्वमध्ये डरवा तलादारभ्य दूर्ध्वं कृतवर्त्ति
पर्यन्तमूर्द्धां वर्त्तिं कुर्यात्॥ वर्त्तिर्वर्त्याकारो मृदवयवः। एवं दक्षिणपार्श्वमध्ये द्वितीयां वर्त्तिं कुर्यात्॥ एवमेवापरपार्श्वमध्ये तृतीयां एवमेवो राम:
त्तरपार्श्वमध्ये चतुर्थं। एवं सर्वासु दिक्षु लंभाकाराश्चतस्रो वर्त्तीः कृत्वा तासांच तस्तणामपि वर्त्तिनामग्रेषु मस्तकेषु स्तनाकारान्मृदावयवान् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

करोति प्रतिदिशमेकैकं ॥ एवं चतुस्तनोखा भवति । केचिद्द्विस्तनामुखां कुर्वंति । तस्मिन्पक्षे एकस्यामेव वर्त्तौ द्वौ स्तनौ कार्यौ केचिदष्टस्तना
मुखामिच्छंति । तस्मिन्पक्षे एकैकस्यां कुर्द्ध्व वर्त्तौ द्वौ द्वौ स्तनौ कार्यौ । ततोऽदितिष्टेतिमंत्रेणोखायाविलं मुखं गृभ्णाति । अभिपद्यते आलभत
इत्यर्थः । अन्यत्रापि अथास्यै स्तनमभिपद्यत इत्युक्ते स्तनमालभत इति स्वरणात् ॥ ततः कृत्वायेति भूमौ निदधाति ॥ केचित्त्रिस्तडखाः कुर्वं-
ति । अस्मिन्पक्षे मन्त्रग्रहणादि निधानांतमेव परं द्विः कर्त्तव्यं । ततो यजमान एव तिस्रो विश्वज्योतिष इष्टकाः । पद्यास्त्वालिखिताः करोति ।
तासु च पृथक्पृथक् चिह्नानि कार्याणि । प्रथमाद्वितीयादि विवेकज्ञानार्थं । ततोऽवश्चिद्रां मृदमुपशयां संज्ञां क्वचित्सुगुप्ते देशे निदधाति
॥ ॥प्रायश्चित्तार्थं ॥ ततः सप्तसंख्यान्यश्वशकृंतानि दक्षिणाग्न्यादीप्यते षां मेकैकेन स्वस्या नाभिं तमेवोखां सप्तवारं धूपयति ॥ त
त्रैकं धूमायमानमश्वसकृत्पिंडस्तेन गृहीत्वा तेन वसवस्त्वा धूपयंत्विति मंत्रेणोखां धूपयति ॥ तद्धूयमानमुखायामध्ये परितश्च भ्रमयती-

वा.सू.प १० त्मर्थः॥ रुवैरुद्रास्त्वेति द्वितीयेन। आदित्यास्त्वेति तृतीयेन। विश्वेत्वेति चतुर्थेन। इंद्रस्त्वेति पंचमेन। वरुणास्त्वेति षष्ठेन। विष्णुस्त्वेति सप्त
मेन॥ ततोभिमासयादिति स्त्वा देवीति मंत्रेण अर्थान्यरिमाण चतुःकोणं गर्त्तं खनति। ततस्तत्स्थलीं तृणकरीषादिकं अपणं गर्त्तमध्ये आस्तीर्य
प्रथमं तत्स्थलीं अषाढां अपस्योपरि गर्त्तमध्येऽवदधाति। ततो देवानां पत्नीरिति मंत्रेण अधोमुखां अषाढायाऽन्तरतोऽवदधाति॥ ॥तत्रैव॥
ततस्तत्स्थलीं विश्वज्योतिषोवदधाति यथावकाशं। ततस्तत्परित्वात्करीषतृणादिना अपणेन तत्सर्वमवच्छाद्य दक्षिणाग्नेरग्निना आपाक
मादीपयति॥ तत्र पूर्वं तत्स्थलीमषाढायादीपनं। धिषणास्त्वे त्युखायाः। तत्स्थलीमेव विश्वज्योतिषां। अथवा तत्कालमेवाग्निर्निमथ्यतेना
ग्नीनाधूपनं। अपणं च कर्त्तव्यं। तद्दक्षिणाग्न्यग्निना। ततो दंडादिनो परिस्थितं अपणोच्छिद्रं कृत्वा तेन छिद्रेणोखामीक्षमाणो वरुत्रीष्ट्वादि रामः १०
वीर्णियत्रू ई. घिस्वरेण जपति॥ ततोऽभित्रस्य चर्षणीधृत इति मंत्रेण पुनः अपणमुपरिष्टात्प्रक्षिपति। अधस्ताच्च प्रवेशयति। एवं पाकपर्यं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तंयावत्क्रियच्छुपणप्रक्षेपणं तावदनेनैवमंत्रेण। उखायाः पचनं॥ पकायाआपकादुद्धरणं च। दिवसएवकर्त्तव्यं। न रात्रौ। ततोऽपाढाया
स्तूष्णीं श्रपणमपनयंति। ततो देवस्त्वा सवितेत्युखायाः श्रपणमुद्वपति॥ ततो विश्वज्योतियस्तूष्णीं श्रपणमुद्वपति॥ ततउखां तत्रस्थामे
वपर्यावर्त्तनेनोत्तानां करोति। अव्यथमानेति। ततस्तूष्णीमेवाषाढामुत्तरतउखास्य भूमौ निदधाति। ततएकं विपुलं पीठादिपात्रमुत्तरतो नि
दधाति। उखास्थापनार्थं। ततो द्वाभ्यां हस्ताभ्यां तूष्णीमुखां गर्त्तमध्यस्थितां परिगृह्योत्थाय गृहीतामुखां यमुपहूतिमुद्धर्गृह्णाति। ततउखा
मुत्थायमित्रैतां तइतिमंत्रेणोत्तरतः पूर्वस्थापितस्य पात्रस्योपरि निदधाति॥ ततस्तूष्णीं विश्वज्योतिषामुद्वासनं॥ ततो वसवस्त्वा छृंदंत्विति
प्रतिमंत्रमजायादुग्धमुखामध्ये चतुर्धारं निनयति॥ तिसृष्वेदुखाः क्रियंतेतदा एकैकस्याऽन्नानकरणं अजापयोवसेकांतं कांडानुसमये
नकर्त्तव्यं॥ ॥इत्युखासंभरणं॥ ॥अतऊर्ध्वं सर्वासां पूर्वोक्तानामिष्टकानां करणं॥ यास्वपुषमशेषः प्रक्षिप्तः। ततोमृदमादायोदकं चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णयस्तर्वी दष्टकानिष्पादनीयाः। तत्रैव काकरणस्यायं प्रकारः। पूर्वं यजमानेनोर्द्ध्वबाहुः प्रपदोच्छ्रितेन समस्थितेन वा समं वंशं मित्वा पुरु-
का.सू.प ११ षः प्रमाणस्य विंशांशं वा निरिक्तं कृत्वा वंशच्छेदनेन तावत्प्रमाणं कुर्यात्॥ ततस्तस्य वंशस्य समा दश विभागाः शलाकादिभिर्वा मित्वा कार्याः
दशस्वपि भागेषु वंशे पृष्ठुरिकादिना वंशस्य त्वचं। छित्वा चिह्नानि कार्याणि। तस्य वंशस्य दशमेन भागेन पदं भवति। पदस्य द्वादशो भागो-
ऽंगुलं॥ एवंविधैरंगुलैर्द्वादशांगुलं समचतुरस्रं पक्षाणां प्रमाणं सारदारुकाष्ठैः कारयितव्यं॥ षडंगुलं समचतुरस्रं पादभागानां प्रमाणं
द्वितीयं॥ षडंगुलं दीर्घं। अंगुलविस्तारमर्द्धपादभागानां प्रमाणं॥ त्र्यंगुलं समचतुरस्रं चतुर्भागानां। अष्टादशांगुलदीर्घं। द्वादशांगुलवि-
पुलमध्यर्द्धानां प्रमाणं॥ द्वादशांगुलं दीर्घं षडंगुलविस्तारं अर्द्धपद्यानां प्रमाणं। अष्टादशांगुलं समचतुरस्रं जंघामात्रीणां। चतुर्विंश- राम: ११
त्यंगुलं समचतुरस्रं बृहतीनां प्रमाणं। चतुर्विंशत्यंगुलं दीर्घं अष्टादशांगुलं विपुलं त्रिज्याहिनीनां प्रमाणं चतुर्विंशत्यंगुलं दीर्घं द्वादशांग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लंविस्तारं अर्द्धबृहतीनां प्रमाणं ॥ अथ वक्राणां प्रमाणसाधनोपायो च्यते । पूर्वं चतुर्विंशत्यंगुलं । समचतुरस्रं साधयित्वा तस्योत्तरां स्रेशंकुं निखा
य अर्द्धव्यासप्रमाणां रज्जुमुभयतः पाशां कृत्वोत्तरांसशंकौ एकं पाशं प्रतिमुच्य दक्षिणांशस्योपरि लंबायमानां तां रज्जु दक्षेण तआकृष्य अर्द्ध
व्यासप्रमाणां रेखां कृत्वा पाशप्रोतशंकुनाप्रदक्षिणां तावच्छन्नं लिखेत् ॥ यावत्सा अर्द्धव्यासपरिमिता रज्जुस्तस्य चतुरस्रस्य दक्षिणश्रोणोर्
पर्यायाति ॥ ततो दक्षिणश्रोणेरारभ्य रज्जुप्रांतं यावद्रेखां कुर्यात् ॥ ततश्चतुरस्रस्य पश्चिमोत्तरपूर्वपश्र्वानिमार्जयेत् ॥ अवशिष्टं चक्रं
क्षेत्रं चक्राणां प्रमाणं ॥ एतादृशं क्षेत्रं विलोक्य वक्रस्य घटने न न वक्रा निष्पादनाय प्रमाणं । सर्वेषां प्रमाणानां चतुरंगुलं वा षडंगुलं
वा मत्वा वोच्छ्रायप्रमाणं भवति ॥ अर्द्धनार्द्धोत्सेधानां पथ्याई पथ्यानामुत्सेधो भवति । षडंगुलपक्षे त्र्यंगुलं ॥ चतुरंगुलपक्षे द्व्यंगुलं । तत्प्र
माणद्वयं पथ्यानामर्द्धपथ्यानां च पृथक्करणीयं । एवं च्चयोर्द्व्याप्रमाणानि समानिष्ठक्षणानि वक्रारयित्वा तैरिष्टकाः समभूमौ निष्पा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनीयाः। तत्र पट्केष्टकानां संख्योच्यते॥ तत्र वक्रालिखितानां पादभागानां सप्तदशशतानि संख्यानि सद्वात्रिंशानि। १७३२। सार्द्धसप्तसहस्र
संख्याः त्रिंशदधिकाऋज्वालिखिताः पादभागाः। ७५३०। द्वेशते द्वाषष्ठे वक्रालिखिता अर्द्धपादभागाः। २६२। षोडशाधिकानि चत्वारिंशता
नि ऋज्वालिखिता अर्द्धपादभागाः। ४०१६। चतुर्भागाश्चत्वारो वक्रालिखिताः। ४। अष्टौ ऋज्वालिखिताश्चतुर्भागाः। ८। एकोनषष्ट्यधिका
नि सप्तशतानि पूर्णोत्सेधा पद्याः। ७५९। अष्टादश पद्याः अर्द्धोत्सेधाः। १८। द्वानवत्यधिकमेकशतं अर्द्धपद्याः। १९२। तासां मध्ये चतु
र्विंशति पूर्णोत्सेधास्तिरश्चालिखिता अर्द्धपद्याः। २०। चतस्रश्चार्द्धोत्सेधा अर्द्धपद्यास्तिरश्चालिखिताः। ७। अष्टौ अर्द्धपद्या अर्द्धोत्से
धाऋज्वालिखिताः। ८। द्वे वक्रालिखिते अर्द्धपद्ये पूर्णोत्सेधे। २। पंचाशज्जंघामात्र्यः। ५। सप्ततिस्त्रियाहिराः। ७०। अष्टौ वक्राः। ८।
एकादशाधिकमेकशतमर्द्धाः। १११। बृहत्यः षट्सप्तवा। ७। चतस्रोऽर्द्धबृहत्यः। ४। द्वे पादोने। २। एवं सर्वासामिष्टकानां। इयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संख्याऽपधानकालीनानिष्पादनकालेमहत्त्वइष्टकाःश्चतुर्गुणाःकारयितव्याः।मध्येअर्द्धोत्सेधाचतुर्गुणांमध्यप्रमाणाद्विगुणाप्र
माणाद्विगुणापादभागाअर्द्धपादभागा।अथअर्द्धगुणानिह्रस्वपक्षे।तथापाकशोषाभ्यामिष्टकाप्रमाणस्यह्रासोभवति।तेनत्रिंशां
शेनद्वात्रिंशांशेनवापादभागस्याईप्रमाणमधिकं॥पद्याप्रमाणांद्वाभ्यांद्वाभ्यांत्रिंशाशाभ्यांवा।द्वात्रिंशांशाभ्यांवाअधिकंकार्यंजंघामा
त्रीप्रमाणंत्रिभिःत्रिंशांशैरधिकंत्रिभिर्द्वात्रिंशांशैर्वा।बृहतीप्रमाणंचतुस्त्रिंशांशैरधिकंकार्यं।चतुर्भिर्द्वात्रिंशांशैर्वा।वक्राप्रमाणंचा
एतेनैवार्द्धबृहतीत्रिग्राहिणीएपधर्द्धादीन्युक्तानि॥द्वितीयेचयनेसर्वासामिष्टकानांस्वस्वसप्तमभागेनवृद्धिः।द्वितीयादिषुचय
नेषुप्रतिचयनं॥प्रथमचयनेचेष्टकानांस्वस्वसप्तमोभागोवर्द्धितेष्टकाप्रमाणमध्येअधिकःकार्यःइतितत्वं।सर्वाइष्टकास्त्र्यालि
खिताःकार्याः।अथवात्रिस्त्रगांस्वयमातृणावतीनांइष्टकास्त्र्यालिखिताःकार्याः।द्वितीयाचतुर्थ्योरपरिमितालिखिताः।दक्षिणाग्न्याग्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प
१३

नैवतासां पाकः कार्यो निर्मथ्येन वा॥ ॥ततः फाल्गुनामावास्यायां पूर्वाह्ण एव पिंडपितृयज्ञवर्ज्जं सद्य एव दर्वीहोमं कृत्वा मातृश्राद्धं च कृत्वा
दीक्षा कार्या॥ ॥तत्र कृत्विग्वरणादौ विशेषः॥ साग्निचित्येनामुकसोमेनेति वरणं॥ विंशत्यरत्निदीर्घो दशारत्नी विस्ताराशाला कार्या
नविमितं। तदुपायश्च प्रमाणाद्वाभ्यस्याभ्यास षष्ठेन लक्षणं करोति तं निरंछनमिति॥ तत्र विंशत्यरत्निप्रमाणा। मूलरज्जुः॥ तत्रैकं
लक्षणं॥ ततो दशारत्निरभ्यासरज्जुः॥ तत्राभ्यासरज्ज्वोरग्रे षष्ठे भागे निरंछनार्थं लक्षणं॥ अभ्यासरज्ज्वोरर्द्धे पंचरत्नौ च श्रोण्यंसाकनार्थ
मिति॥ पूर्वदक्षिणापश्चिमदिक्षु गर्भे अरत्निद्वयविस्ताराणि द्वाराणि कार्याणि॥ तत्र गार्हपत्यखरं साधयित्वा तस्य मध्यात्त्रिषु पदेषु सत्र
प्रक्रमेषु तत उर्द्धमर्द्धमात्रे चाहवनीयदक्षिणाग्न्योरुद्धरणं॥ दीक्षणीयायां विशेषः॥ त्रीणि हवींषि उपांशु भवंति॥ आग्नावैष्णव एका रामः
दशकपालः प्रथमं हविः। वैश्वानरो द्वादशकपालो द्वितीयं॥ आदित्येभ्यश्चरुस्तृतीयं॥ तत्र पात्रासादने त्रयोविंशतिकपालानि॥ एकाद १३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्स्थाली।संयवनोदकं।चरुश्रपणार्थंघृतंच॥श्रृतावदानानंतरंमेक्षणं।द्वेपात्र्यौअन्यत्स्रुक्प्रकृतिवत्॥ग्रहणेअग्नाविष्णुभ्यांजुष्टं।वैश्वान
रायजुष्टं।वैश्वानरोत्रनिर्गुणः॥कर्कमतेऽत्रापिसगुणएव॥आदित्येभ्योजुष्टं॥प्रोक्षणे।अग्नाविष्णुभ्यांत्वाजुष्टं।वैश्वानरायत्वा।आदित्ये
भ्यस्त्वाजुष्टमिति।एकवीजपक्षेकरणंतेविभज्यालंभः।इदमग्नाविष्णोर्वैश्वानरस्यच॥इदमादित्यानांततस्तंडुलानांकोमलत्वसंपादना
र्थंदुग्धादौप्रक्षेपःकार्यः।ततःपेषणादिप्रारंभः।संवापकालेदुग्धादेस्तंडुलान्तिःकाश्यपसंवापःकार्यःघृतोपसर्जनीप्रतिग्रहे।संसृ
तमोषधीभिःसमोषधयोरसेन।सरेवतीर्जगतीभिःपृच्यतांसंमधुमतीर्मधुमतीभिःपृच्यतामित्राणादाने।अग्नाविष्णूगच्छ।वै
श्वानरंगच्छ।आदित्यान्गच्छेति।इदमहंसपत्नदशेनेत्यववाधनं॥उत्तमेप्रयाजे।इदमग्नयेसोमायाग्नाविष्णुभ्यांवैश्वानरायादित्येभ्यो
देवेभ्यइत्यादि॥प्रधानयागेअग्नाविष्णुभ्यां।अनुब्रूहि।अग्नाविष्णूयज।वैश्वानराय।अनुब्रूहि।वैश्वानरंयज।आदित्येभ्यः।अनुब्रूहि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्यान् यज। ततः स्विष्टकृदादि आग्नावैष्णवस्य चरोश्चतुर्द्धीकरणाभावः॥ अन्यत्सर्वं सर्वेषां। वैश्वानरस्य च चतुर्द्धीकरणं॥ ऊहने। अग्नाविष्णो
वैश्वानरस्यादित्यानामुज्जितिं॥ अग्नाविष्णू वैश्वानर आदित्यास्तमपनुदन्त्विति। प्रस्तरहोमे॥ इदमग्नये सोमायाग्नाविष्णुभ्यां वैश्वानरायादि
त्येभ्यो देवेभ्य इत्यादि। दक्षिणाग्नौ ऽलूखल इत्याकृतौ॥ इदमग्नाविष्णुभ्यां वैश्वानरायादित्येभ्यः। ततो वेदयोक्तविमोकान्तेन नवनीतदीक्षादि
प्रवेशनान्तं। तत औदग्रभ्रवेण स्विष्टकृतीयमभिपूर्यहोमः। ततः सप्तादिकान्यौग्रभणानि जुहोति॥ स्थाल्याः स्रुवेण। आकूतिमग्निं प्रयुजमिति प्र
थमं। इदमाकूत्या अग्नये प्रयुजे। १। मनो मेधामिति। द्वितीयं। इदं मनसे मेधाया अग्नये प्रयुजे। २। चित्तं विज्ञानमिति तृतीयं। इदं चित्ताय वि
ज्ञाताया अग्नये प्रयुजे। ३। वाचो विधृतिमग्निमिति चतुर्थं। इदं वाचे विधृत्या अग्नये प्रयुजे। ४। प्रजापतये मनव इति पंचमं। इदं प्रजापतये॰ गम:
मनवे। ५। अग्नये वैश्वानराय इति षष्ठं। इदमग्नये वैश्वानराय। ६। एतानि षट् स्थाल्याः स्रुवेण जुहोति॥ ततः सप्तमे अवशेषितं सर्वं ध्रौ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वंजुह्वा मासिच्य द्विर्भक्ष्याल्पाः स्रुवेण सिञ्चन् तृतीयं स्रुवमभिपूरयति। विश्वेभ्यो देवेभ्य इति जुहोति। इदं विश्वेदेव सवितृमित्र बृहस्पतिपूषभ्यो नमम॥ इदं सवित्रे इति वा॥ ॥ततो दीक्षणीयाशेष समाप्तिः॥ ॥कृष्णाजिनास्तरणादि दंडो स्रुग्ग्रहणांतं प्रकृतिवत्॥ ततोध्वर्युर्यजमानो वा उखामध्ये पूर्वं शरणचूर्णं प्रक्षिप्य तदुपरि मुंजचूर्णं च प्रक्षिप्याहवनीयं स्रुसमिद्धं कृत्वेशा। नाभिमुखत्वेष्टन्याभुमिं कृत्वा मातुरिव इति द्वाभ्यां तामुखामाहवनीये धिश्रयेत्॥ ततः उखामध्ये ग्नाडग्नन्तेभुक्तगोमयखंडादिभिस्तं समर्थं कृत्वाध्वर्यु रेकवक्ष्यमाणाः प्रादेशमात्रीन् यो दश समिध आदधाति॥ यदि वहुनापि कालेनाप्युखायामग्निर्नोत्पद्यते तदोपामध्ये आहवनीयांगारानोप्य समिदाधानादि कुर्यादित्येक आहुः। तत्र प्रथम ध्वर्यु घृताक्तां कार्मुकीं धमन हक्षोध्ववां द्रून इति मंत्रेण स्वाहाकारांतेनादधाति॥ उखायां समिदाधान मंत्रेषु स्वाहाकारः कर्तव्यः॥ वैकंकतीं परस्या इति द्वितीयां॥ औदुंबरीं चरमस्या इति तृतीयां अपरथ हृकुणांयदग्न इति अकुठार छिन्नां सौदुंबरीमेव तुर्यां॥ अधः शयां यदन्ती ति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प॰ ९५

अधः शायां भूमिसंलग्नामेव वृक्षात्प्रसृतामौदुंबरीमेव पंचमीं॰ ततोऽष्टौ पालाशीः प्रत्यृच प्रहरहरि । इत्याद्याभिरष्टाभिः प्रत्यृचमेकैकामादधाति ॥
एवं त्रयोदश समिधो भवंति ॥ एतासां मध्ये एकादश प्रथमाः समिधः सर्वेषां नित्यं भवंति । क्षत्रियस्य द्वादश्या विकल्पाः । पुरोहितस्य त्रयोदश्या
विकल्पाः । क्षत्रियपुरोहितव्यतिरिक्तानां द्वादशीत्रयोदश्योऽभे अपि विकल्पेन । ऽस्त्वाधिश्रयणो यजमानेन कृतेपि समिदाधानमध्वर्युरेव
करोति ॥ एके मंत्रादिप्रपादनांतं कृत्वा ततऽस्त्वाधिश्रयणादिसमिदाधानांतं च कृत्वा ततोऽभ्युक्षणादि दंडांतं कुर्यात् । ततो यजमान ईशा
नाभिमुखस्तिष्ठन्दशानो रुक्म इति मंत्रेण कंठे सौवर्णं रुक्मं प्रतिमुंचते ॥ कीदृशं रुक्मं ॥ परिमंडलं वर्तुलं । तथा एकविंशति पिंडं । पिंडशब्देन च
णाकदल सहस्राटं कनेनोत्यादिनाविंदवो भिधीयंते ॥ तथा कृष्णाजिने शुक्लकृष्णलोमोपलक्षिते प्रदेशे नितरां स्यूतां । तथा त्रिगुणेन शणसू
त्रेण प्रोतं ॥ तथा बहिः पिंडं एवं विधं रुक्मं तथा प्रतिमुंचते ॥ यथा प्रवृक्तो नाभिरुपरि भवति । इंद्वयोः शिक्ये आसंद्यां त्रिवृत्त्वगुणमुंजरज्जवो भवंति ॥ राम॰ ९५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताश्चमन्त्रादिलिंपनीयाः॥ततआहवनीयस्यपुरस्तादौदुंबरीआसंदीनिधेयाः॥तस्याःप्रादेशमात्राश्चतुरस्राःपादाकार्याः।अरत्निमात्राणिचै
षोपलानितान्यपिचतुरश्राणिछिद्रितानिमुंजरज्वाचव्यूता॥ततस्तस्याआसंद्याउपरिशिक्यंविरलीकृत्यनिधेयं॥तस्मिन्शिक्येषडुद्यामरज्जुयु
क्ताःपाशाःकार्याः॥ततःपरिमंडलाभ्यांमिद्ध्वाभ्यांमुपायभूताभ्यांतस्मान्मुखंपरिगृह्णातिनक्तोषासेतिमंत्रेण।ततोद्यावाक्षामेतिमंत्रेणोद्यामा
संदींप्रतिहरति॥ततःपूर्वोक्तायांशिक्यवत्यामासंद्यांदेवाअग्निमित्युखांनिदधाति॥ततःशिक्यंसमंकृत्वाविश्वारूपाणीतिमंत्रेणषडुद्यामं
शिक्यपाशंकंठेयजमानःप्रतिमुंचते॥ततःसशिक्यमुख्यमग्निंसुपर्णोसीतिमंत्रेणोर्ध्वाभ्यांबाहुभ्यांप्रांचंप्रगृह्णाति॥ततस्तस्मान्मुखदेशा
दग्निमवहृत्यनाभेरुपरिधारयति॥ततईशानाभिमुखस्तिष्ठन्विष्णुक्रमान्क्रमतेविष्णोःक्रमोसीत्यादिप्रतिमंत्रं॥तत्रप्रथमेनविष्णोःक्र
मोसीतिमंत्रेणेशानाभिमुखोदक्षिणपादेनक्रमणंकरोति॥नाभिदेशादग्निंचस्तोकमूर्द्ध्वंकरोति॥ततोद्वितीयेनविष्णोःक्रमोःस्यभिमाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेमनेन॥ ततोपिईशानदेशप्रति दक्षिणपादेनचलति॥ पुनरप्यग्निस्तोकमुद्गृह्णाति॥ ततःपुनरपिविष्णोः क्रमोस्यरातीयतो इमनेनततोपी
शानाभिमुखेनः क्रमनं करोतिचलति॥ अग्निमपिस्तोकमुद्गृह्णाति॥ ततोविष्णोः क्रमोसिशत्रूयत इमनेनाक्रमणंकरोति॥ अग्निमेवोत्वंक
रोति॥ ततस्तस्मादवस्थितस्वदिशोनुविक्रमस्वेतिसकृत्यदनेनैवसर्वादिशोवीक्षतेविलोकयति॥ प्रतिदिशंमंत्रावृत्तिरितिकर्कः ततः
उर्ध्ववाहुरैशानींदिशंप्रतिअग्निमुद्गृह्णातिअक्रंदद्ग्निरितिअनेनमंत्रेण॥ यावतिप्रदेशेचतुर्थवारमुद्गृहीतस्तावतिध्रुतमेवसंत
तमेशानींदिशंप्रतिहरतिनचतुर्थवारमुद्गृहीताद्वं॥ ततोग्नेभ्यावर्त्तिन्निनिचतस्रभिम्र्चानुकृत्वोग्निमवरोहति॥ यथाचतुःकृत्वः
स्तोकंस्तोकमुद्गृहीतस्तथैवचतुःकृत्वस्तोकंस्तोकमवतारयतीत्यर्थः। ततोनाभेरुपर्यग्निंधारयन्नात्वाहार्षमितितमभिमंत्रयते॥
ततउदुत्तममितिमंत्रेणकंठात्याशौरुक्मपाशशिक्यपाशोन्मुच्यशिरोमार्गेणनिःकाशातततोग्नेहहन्निमूर्ध्ववाहुराग्नेयींदिशंप्रत्यग्निमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽर्द्धं करोति १

गृह्णाति॥ ततो हंसः शुचिषदित्यग्निमवरोहति ततो बृहदिति मंत्रेण संघाति दधाति॥ ततसीदत्वमिति त्रिसृभिरभिरक्षमग्निमु-
पतिष्ठते॥ एकप्रतिमोचनादारभ्य सीदत्वमित्युपस्थानां तस्य विष्णुक्रमा इति संज्ञा॥ अथ वात्सप्रं दिवस्परिप्रथमं जज्ञ इत्यतआरभ्यै-
कादशभिरृग्भिर्जो विवव्रुरित्यंताभिरीशानाभिमुख उखमग्निमुपतिष्ठते। केचिदनुवाकेनोपतिष्ठंते॥ तस्मिन्पक्षे श्रुत्वाग्निरित्ये-
कास्त्रधिका॥ ॥एतद्वात्सप्रं॥ एकप्रतिमोचनाद्येन मंत्रं सर्वं याजमानं। अत्रावसरे दीक्षितोयं ब्राह्मण इत्यादि। ततो स्तमिते सूर्ये य-
जमानः उखायाः सकाशाद्भस्मोद्धृत्य कस्मिंश्चित्पात्रे आवपति। ततो दीक्षितस्य वाग्विसर्गप्रैषः। व्रतं कृणुतेति व्रतं करणप्रैषः। अ-
ग्निर्ब्रह्मेति वाग्विसर्जनं॥ ततो यजमानो रात्रीं रात्रीमप्रयावं भरंत इति मंत्रेण स्वाहांतेनोखायां समिधमादधाति॥ ततो व्रतदुघे धुत्वे-
ति प्रैषः। मेहनस्व यनेमग्निष्टोमवत्॥ अपररात्रे ध्वर्युणा यजमानाय व्रते दत्ते दीक्षितो देवांधियामिति हस्तप्रक्षालनानंतरं समिधं

का॰सू॰प वुत उग्धन छेम्मम अन्नपत इति मंत्रेण स्वाहांतेनोदुम्बरीसमिदाधानं करोति॥ ततो ये देवा इत्यादि। प्रातर्विबुद्धवाचनं। वाक्बंधश्चैवः। वाग्यम
१७ नं॥ इदिनेऽश्वायाम भस्मोद्वापः पूर्ववत्॥ वाग्विसर्गश्चैवः॥ वाग्विसर्गः। ततो यजमानो अहरहरप्रयावमिति मंत्रेण स्वाहांतेनोऽश्वायां समिध
माधाति ततो हृक्म इति मोचनदिशा गवात्सप्रादिविक्रमाः॥ एवं साग्निचित्यस्य सोमस्य संवत्सरं दीक्षा भवंति तासु च प्रत्यहं विक्रमवा
त्सप्रेवत्यासं प्रयोज्ये द्वितीयायां विक्रमा। तृतीयायां वात्सप्रं। चतुर्थ्यां विक्रमाः। पंचम्यां वात्सप्रं। षष्ठ्यां विक्रमाः। सप्तम्यां वात्सप्र
मित्येवमेवं संवत्सरपर्यंतं। भस्मोद्वापादित्यग्न्युत्समिधमित्येतत्पर्यंताः पदार्था दीक्षास्वेव भवंति॥ ॥नोपसत्सु॥ यस्मिन्सोमे नियता
दीक्षा भवंति। यथा द्वादशाहे दीक्षा द्वादशोपसदश्चेति। तथा स्वर्गकामस्य न्नि पेयो दीक्षोपसदो द्वादशेति॥ तथा वाजपेये सप्तदश – दीक्षा रामः १७
अहीनामासापवर्ग इत्यादौ॥ तत्र साग्निचित्यपि सोमाविरोधेनैव दीक्षा भवंति॥ सोमिन्यग्न्एव दीक्षा भवंति नाग्निकस्यर्थ।॥ तथा द्वे न

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजमानेनैकवारं संवत्सरंदीक्षापक्षे रात्साग्निचित्यः। सोमः पूर्वंकृतो भवति ततदुर्ध्वं तस्यैकादीक्षापक्षेपि चयनं भवति ॥ तथा सः
संवत्सरसुत्यं सत्रादिकरिष्यन्भवति॥ तस्य संवत्सरदीक्षाभावेपि चयनं भवति तथा ये नाग्न्याधेयानंतरं॥ संवत्सरमग्निहोत्रं कृतं
भवति॥ तस्यएकादीक्षापक्षेपि चयनं भवति॥ संवत्सरमग्निहोत्रं न कृतं चेत्। तथा अग्निष्टोमो त्यातिरात्रादावेकाहे संवत्सरदीक्षाप
क्षं विना चयनं न भवत्येव॥ तत्रकस्यापि नियतदीक्षेतो मे संवत्सरमध्येपि भवति॥ तथा द्वादशमासान्गर्भे स्थित्वा यो जातो भवति॥ त
स्याप्येकादिदीक्षापक्षे चयनं भवति॥ तथा प्राणो वा अग्निः स्तमेतत् विभर्त्तीत्यर्थवादो ज्ञानवतः सद्योभृते पि चयनं भवत्येव॥ अथवा
षण्मासान्नुखं धारयित्वा चयनं कार्यं॥ अस्मिन्पक्षे इष्टकापशवः स्वकालएव कर्त्तव्याः॥ उखासंभरणमपि स्वकालएव॥ इष्टकाकर
णं च॥ अभ्युक्॥ भुक्त्वा दर्पणं कान्तिकस्य वादीक्षा॥ तत्र दीक्षासु यूपच्छेदनं॥ यूपाकृत्यादिस्वरूनिष्पत्यंतं कर्त्तव्यं। तथा दीक्षास्वेव यस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का० सू० प
१८

न्वहनीछुतितस्मिन्महावीरसंभरणांअजापयोवत्सेकांतंकरोति॥ ॥तथादीक्षास्वेवक्रत्वर्थद्रव्योपार्जनार्थप्रयाणाहवनीवाहनसंज्ञंकर्मभव
तितत्रसर्वं॥ यजमानएवकरोतिनाध्वर्युः।सयदहःप्रयास्यंत्स्यादितिश्रुते।मानवेपिदीक्षितोभृतिंविन्दित।प्रयास्यन्नुदुत्वेत्युक्त्वेमादत्र
इत्यादिसर्वंयजमानकर्तृकमेवोक्तमस्ति॥तत्रशालायाउत्तरस्यांदिशिप्रत्येष्योत्तरतःप्राङ्गीशांशकटमवस्थापयति॥ततोयजमानःसमि
धाग्निमितिमंत्रेणोल्बोग्नौसमिधमादधातिस्वाहांतेन॥ततआसंदीसहितमेनोल्बमग्निमुद्धुत्वाविश्वेदेवाइतिमंत्रेणोपस्यशकटस्य
दाक्षिणातोवस्थितः।शाकटोपस्थस्यपश्चाद्भागेस्थापयति॥ततोगार्हपत्यंस्थाल्यांकृत्वाआहवनीयस्यपश्चात्स्थापयेत्॥ततोदक्षिणा
ग्निमपिस्थाल्यांकृत्वाविहृतीयेस्थापयेत्।ततोयजमानएवाऽनड्वाहौतल्लींयुगेनक्ति।पूर्ववद्दक्षिणं।ततउत्तरं।ततोयजमानःप्रेदग्नइतिमं राम
त्रेणप्रथमंक्रियंतमध्वानंप्राङ्गच्छेत्॥ततोयस्यांदिशिपर्थोभवतिद्रव्यार्जनसंभवोभवति।तांदिशंप्रतिगच्छेत्॥ततोयजमानोऽनसारूढो १८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वापार्श्वतो वा गच्छेत् यदि गच्छतः शकटस्याक्षभंगादि घर्षणेन शकटं शब्दं कुर्यात् । तदाः ॐ इदमग्निरिति प्रायश्चित्तार्थं जपेत् । यदि वासार्थं
शकटं विमुच्यते तदा प्राग्रीषं शकटं स्थापयित्वोत्तरतः उद्धृतावोक्षिते देशेग्नीन् अवतार्य्योध्वेग्नौ प्रप्रायमग्नरिति मंत्रेण यजमान एव समि
धानं करोति । वासार्थं विना विश्रामार्थं कार्यान्तराद्यर्थं वा विमोके न यः शकट एव तिष्ठंति । नावतार्यंते न च समिदाधीयते ॥ यदि कश्चि
द्दीक्षिताय किंचिद्धिरण्यादिकं द्रव्यमर्पयति तदा तत् द्रव्यं हिरण्यादिकमालंभ्यं हिरण्यमालभस्वेति प्रैषेण तस्यालंभं कारयित्वा रास्वेयत्सो
मेति मंत्रं अध्वर्युर्यजमानं वाचयति । देशकालविप्रकर्षेणाशक्ये त्वालंभे अनेन मंत्रेण तस्य वस्तुनोभिमंत्रणं करोति । ततो द्रव्योपात्ते
नोसिद्धे प्रत्यागत्य शालायां यथास्थानेग्नीन् स्थापयेत् ॥ ॥ एतावद्दीक्षितवाहनाख्यं कर्म यजमानकर्तृकं ॥ ॥ अथ भस्मापोभ्यवहर
णमुच्यते ॥ दीक्षामध्ये यत्प्रतिदिनं सायंप्रातरुख्यायां भस्मोद्धृत्योद्धृत्य पात्रांतरे स्थापितं भवति तडागादौ गत्वा वक्ष्यमाणप्रकारेण तस्य भस्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोप्सुप्रक्षेपः कार्यः । तत्रैकं वटपलाशाश्वत्थादिपत्रैः पुटं कृत्वा तस्मिंस्तन्मार्जान्तरस्थमर्द्धभस्म कृत्वा तेन पुटेनोदकमध्ये भस्म प्रक्षिपति ॥
आपो देवीः प्रतिगृभ्णीतेत्यनयैकयर्चेति तस्मिन्नेव पलाशपुटे सर्वं भस्म निक्षिप्याप्स्वग्नन्निति द्वाभ्यां मन्त्राभ्यां तेन पुटेनाप्सु भस्म प्रक्षिपति ॥
अथवा प्रथमप्रक्षेपे आपो देवीरिति द्वाभ्यां । ततो गर्भोसीत्येकया द्वितीयः । ततोप्सु प्रक्षिप्ताद्भस्मनः सकाशादध्वर्यु नामिकया किंचिद्भस्माऽ
दत्ते प्रसद्येति चतुर्भिर्मंत्रैः ॥ ततः तडागादेः प्रत्यागत्य शालायां तदनामिकया गृहीतं भस्म स्वोत्थाममध्ये प्रक्षिपति । ततो वो धामेत्यस्येति द्वाभ्यामृ
ग्भ्यामुपतिष्ठते ॥ ततोध्वर्यू राज्ञं संस्करोति ॥ तत्र स्रुव स्रुक् समिधां संमार्गः । ततो ब्रह्मा डक्षम्प्रत्वा स्थितमेव परिस्तीर्य समिधमाधाऽ
योरक्षेऽग्नौ सकृद्गृहीतेन विश्वकर्मणे स्वाहेति कालाहुतिं हुत्वा ब्रह्मैव यज्ञस्य देह इति स्वाहान्तं मंत्रं यजमानं वाचयति त्वा प्रत्यय साम रामः
र्थ्याद् ब्रह्मण एव वाचनं ॥ अपरे ध्वर्युकर्तृकं वाचनमिच्छंति ॥ ततोध्वर्युः समीधाग्न्व स्थानीयया आज्यस्थाल्याः सकाशादाज्यं गृहीत्वो १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रव्येग्नौ विश्वकर्मणेस्वाहेति समिधैवाज्यं कृत्वोत्थाय पुनस्त्वेति तां समिधमादधाति। एतद्ब्रह्मापोऽभ्यवहरणं संज्ञं कर्मदीक्षामध्ये द्रष्टव्यम्भ
वति सोमक्रयाहन्यवश्यं भवत्येव। दीक्षामध्ये भवति न वा॥ ॥अथाग्नीगमने प्रायश्चित्तमुच्यते॥ ॥ततो गार्हपत्येनुगते अरणिभ्यां
मथित्वा स्थापयित्वाज्यसंस्कारपूर्वकं प्रभे प्रायश्चित्तं होतव्ये॥ तच्च पूर्वं तु ह्या कालाकृतिम ध्वरप्रायत्तं जुहोति। ततोध्वर्युः आग्निंकी
प्रायश्चित्तिं समिधानं गृहीत्वा विश्वकर्मणेस्वाहेत्येतामाहुतिं कृत्वा समिदाधानं करोति॥ अथ सुप्तास्वाहवनीय प्रशमने इध्मं विनापि कर्परे
णैवान्वग्निरितिमंत्रेण प्रणीतं सदोहविर्धानमध्ये नैवनीत्वोत्तरवेदौ स्थापयित्वा समिन्नमित्युपस्थानं निष्टिं वा कृत्वाध्वरप्रायश्चित्तिं
च पूर्ववत्कुर्यात्॥ एवमेवाग्नीध्रीय उपशांतमिध्मं विनैव कर्परेणोत्तरेण सदो हृत्वा अग्नीध्रीये स्थापयित्वाध्वरप्रायश्चित्तिमग्निप्रा
यश्चित्तिं च पूर्ववत्कुर्यात्॥ उक्तस्याग्नेरनुगमने गार्हपत्यात्प्रांचमुद्धृत्याहवनीयस्थाने स्थापयित्वापूर्ववत्तत्। सौमिमध्वर्यु रैवोक्ता धिष्ण

का·सू·प
२०

पर्णं कृत्वोखायामग्निं गुल्फापाद्ध्वरप्रायश्चित्तिमग्निप्रायश्चित्तिं च कुर्यात्॥ सन्निदधानं पुनर्न भवति॥ शुल्वाकृशालादार्यां पुनर्गमने प्राजहितादक्षिणाग्निरिन्धु
क्षुप समित्तमिन्धुपस्थानं विधिं वा कृत्वाग्निप्रायश्चित्तिं ध्वरप्रायश्चित्तिं च कुर्यात्॥ प्राजहितानुगमने गार्हपत्यवत्॥ अथोखाभेदे प्रायश्चित्तमु
च्यते॥ उखायां भग्नायां महावीर्यां मन्त्रयां नूतनायां स्थाल्यां भग्नायाः उखायाः कपालमवधाय ततोऽग्निमावपेत्॥ उखानिष्पत्तिपर्य
न्तं तत्रैवाग्निस्तिष्ठति॥ ततो नूतनाममृन्मयीं मृदमानीय भग्नामुखां पिष्ट्वा उपशयां च पिष्ट्वा आनीय तया मृदा सह घोपशयाचूर्णं संसृज्य सं
यौति। ततो यजमानः पूर्ववत्तूष्णीं मृदाखननादि निधानान्तामुखां कुर्यात्॥ ततो ध्वर्युरुखां धूपनाद्यजापयवसावसेकान्तं तूष्णीं करोति॥ ततः प
क्वायामुखायां तूष्णीमुखामध्ये स्थालीस्थमुखमग्निं मोष्योखाकपालमपि तत्रैवावपति॥ ततोऽवशिष्टान्युखाकपालानि पिष्ट्वोपशयां च राम:
पिष्ट्वा संसृज्य प्रायश्चित्तार्थं लुगप्रदेशे निदधाति॥ अत्राहवाक् देवः। अन्यत्राध्वरिकं कार्यमग्नेः सोमाङ्गत्वतः॥ नियते पुनिमित्ते पुरुभे भृति २०

यतस्तथेति॥ ॥इत्युखामेदेशायश्चित्तं॥ ॥अथचयनस्यपरिभाषा॥ सर्वत्रलोकंपृणानांयजुष्मतीनांचचयनमध्वर्युणा आत्मसं

मुखंकर्त्तव्यं॥ ऽपविष्टेनच॥ यथाऽपस्याः पंचपंचानूकांतेष्विति पूर्वासांचयनमुदङ्मुखोपविष्टेनोत्तरस्याअपस्यायाआरभ्यात्मसं

मुखं। दक्षिणासंस्थं। तथादक्षिणापस्यानांप्राङ्मुखेनप्रत्यक्संस्थं। तथाऽपरापस्यानांदक्षिणामुखेनोदक्संस्थं॥ तथोत्तरापस्याना

प्रत्यङ्मुखोपविष्टेनप्राक्संस्थमिति॥ एवंसर्वत्रज्ञेयं॥ तथासत्यवाहुमंतरं अभ्यात्ममध्यस्थंकृत्वा। चयनंकार्यं। अथापस्यास्येनपू

र्वीसांचयनेऽदङ्मुखस्याध्वर्योः सत्यवाहुरग्न्यात्ममध्ये भवति॥ दक्षिणतश्च प्राङ्मुखस्य पश्चाद्दक्षिणामुखस्य॥ ऽत्तरतश्चापराभि

मुखस्य ऽक्तविपरीतदिगाश्रयणेचबर्हिर्भवति॥ तथाऽत्तरलक्षणाभिरिष्टकाभिश्चयनंकर्त्तव्यं। ऽत्तराणुपरिलक्षणानियाखांतास्त

था॥ ताभिः लोकेहि अधोमुखीभिश्चयनंप्रसिद्धं॥ अत्रतूत्तानाभिकार्यमित्यर्थः। तथासर्वासामिष्टकानांमंत्रेणोपधानांतरंतयादे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वतयेतिमंत्रेणासादनं कर्त्तव्यं॥ ताअस्येति सूददोहसाधिवदनं च कर्त्तव्यं॥ एतयोश्चासादनसूददोहसाधिवदनयोर्नित्येइति संज्ञा संव्यवहार्थ
यच्चपुनरुपधानमध्य एवसादनमंत्रः पठितस्तत्र तेनैव सिद्धिर्नास्य पृथक्प्रयोगः॥ यथास्वयमातृण्णोपधानमंत्रेषु अन्त्योपधानमंत्रेषु
व॥ चिदसिपरिचिदसीत्येतयोश्च। तथाएकचोदनास्वेकदेशास्त्विष्टकासु तंत्रेणानित्येभवतः॥ एकाचोदना एकं विधिवाक्यं यासामिष्टकानां
ताएकाचोदनाः। यथापूर्वार्द्धे प्राणभृतो दशेतिसर्वतोरवाढावेलायास्तोमभागाइत्याद्याः॥ तथाएकादशानुपधानस्यानंयासांताएकदेशाः॥
यथात्रैव पूर्वार्द्धे षाढावेलादिः॥ ताश्च वह्वीष्वपिसकृदेवनित्येभवतः॥ एतदुभयं मिलितं तिस्रयोसंज्ञा त्वनिमित्तं नैकेकंया एकाचोद
ताएकदेशाश्च तास्त्विति॥ अपस्यास्तु सत्यथेकचोदनात्वेकदेशेभेदात्पंचानांपंचानांपृथक्नित्ये॥ ॥तथाप्राणभृतांचप्रथमायांद्विती राम:
यायामाश्विन्यादीनांवयस्यानांच॥ तथातृतीयायांदिश्यानांछंदस्यानांच॥ पंचम्यामसपत्नानांविराजांच॥ स्तोमभागानांचारवाढानरूपेएक २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्मिन्नेवदेशेऽपधानविधानादेकोनत्रिंशत्संख्यानामपिसमक्रान्तित्वेसत्यश्रीनामपिरेतःसिग्वेलारूपेएकस्मिन्नेवदेशेविधानात्सप्तदशानाम
पिसमक्रान्तित्वं। तथाएकदेशेविहितानामपिचोदनाभेदेनित्वभेदः तथाद्वितीयायामश्विनीवैश्वदेवीप्राणभृदपस्यानां। तथाअथयजु
ष्मत्योदर्भस्तंबोलोगेष्टकाइत्याद्यानांसर्वासांयजुष्मतीनामुपधानमात्मन्येवकर्त्तव्यं॥नपक्षपुच्छेषु॥ तथा॥ सर्वासुचितिषुप्रथमंद्वेद्वे
लोकंपृणेतत्स्त्रीमुपधायततोलोकंपृणेतिमंत्रेणाभिमंत्रणंकृत्वापश्चाद्दशदशलोकंपृणास्तत्स्त्रीमुपधायएकेनलोकंपृणेतिमंत्रेणा
दशानांलोकंपृणानामभिमंत्रणंकुर्यात्॥ ततःसूददोहसाधिवदनमेवलोकंपृणानांभवति।सादनंचनभवति॥ तथायज्ञायुग्मानामिष्टका
नांगणस्योपधानमुच्यते॥ यथापंचम्यांतिसृणांतिसृणांछंदस्यानांप्रथमायांपंचानांपंचानामपस्यानांद्वितीयांयांपंचानांपंचानावयस्या
नां। तृतीयायांसप्तानांवालखिल्यानांचतुर्थ्यांचनवदशानांस्तोमभागानामिति। तत्रसर्वत्रतस्यात्रिपंचादिष्टकागणस्ययामध्यमाइष्टका

का॰सू॰प साअनूकस्योपर्युपधेया। अन्यास्त्वनूकोपहिता अभितउपधेयाः। तत्र तिसृणां द्वितीया मध्यमा पंचानां तृतीया मध्यमा॥ सप्तानां चतुर्थी। न
२२ वानां पंचमी। पंचदशानामष्टमी मध्यमेति॥ तथा या इष्टका एकैकविधीयन्ते सा अनूकस्योपर्येवोपधीयन्ते॥ यथा॥ स्वयमातृण्णा दूर्वेष्टका।
द्वियजुः। विश्वज्योतिः। आषाढा॥ उखास्रुचौ॥ एताः प्रथमायां। तृतीयायां पंचदिश्याः। विश्वज्योतिश्च। चतुर्थ्यं दक्षिणातउत्तरतश्च॥ दक्षिणो
त्तरे द्वे द्वे। पंचम्यां विश्वज्योतिश्च॥ ॥तथा॥ या इष्टकायुग्माभिधीयन्ते॥ ता अनूकमभितोऽर्द्धार्द्धाउपधेयाः। यथा सर्वासु चितिषु ऋतव्ये॥ प्रथमा
यां रेतःसिचौ। द्वितीयायां पुरस्तात्प्रतस्त्रो वयस्याः। तृतीयायां पूर्वार्द्धे दशप्राणभृतः। द्वादशद्वादशाप्ययेषु हुंदस्याश्च॥ यथा च चतुर्थ्यां पुरस्ता
त्पश्चाच्चानूकांतयोर्दक्षिणोत्तरे द्वे द्वे। प्रागुत्तरमुत्तरेणास्पृष्टपश्च चतुर्दश। ऽऽपद्याः षट्पद्याश्च तथा पंचम्यां दशविराजः प्रागनूकमुत्तरे राम:
णास्तोमभागाः गार्हपत्यपुनश्चितौ चविकर्णीस्वयमातृण्णे च॥ अथ सर्वासु चितिषु इष्टकानां चयनानुच्यन्ते॥ तत्र पूर्वमिष्टकोपधानकालेऽ २२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्ति क्षेत्रमध्ये महान्तौ षौ शंकवौ निखातव्याः। चतुर्ष्वात्म कोणेष्वेकैकः। तथा प्रागग्रकप्रांते एकः। तथा पुच्छमध्यप्रांते द्वितीयः। तथा दक्षिप
क्षमध्यप्रांते एकः। उत्तरपक्षमध्यप्रांते च द्वितीयः। एवमष्टौ शंकून् दृढान् निखाय तेषु रज्जवो गाढमाकृष्य वंधनीयाः॥ तत्र पक्षमध्यांतशंको
रेका रज्जुर्गाढमाकृष्योदगायता वंधनीया तदुपलक्षितः प्रदेश उदगग्रक इति कथ्यते॥ तथा आत्ममध्यप्रांते दक्षिणात शंकुपुच्छप्रांतशंको
पि द्वितीया रज्जु प्रागायता वंधनीया तदुपलक्षितश्च प्रदेशः प्रागग्रक इति कथ्यते। तथा दक्षिणाश्रोणपुत्तरांसशंकोरेका अक्ष्णाया रज्जुर्वं
ध्वा आत्मनः पूर्वोत्तादारभ्य पुच्छापरांतपर्यंतं प्रागग्रकमभितो क्ष्णायावधिके दक्षिणोत्तरदेशे प्राग्लक्षणा इष्टकाउपधेयाः॥ तथा दक्षि
णपक्षांतादारभ्योत्तरपक्षांतं यावदुदगग्रकमभितो क्ष्णायावधिके पूर्वापरे देशे उदग्लक्षणा इष्टका उपधेयाः॥ ॥अथ प्रकारांतरेण
प्ययमेवार्थ उच्यते॥ अक्ष्णायारज्जुमात्मनि चतुर्धा विभज्य चतुर्षु दिक्षु चत्वारि त्रिकोणानि संपन्नानि॥ तत्र पूर्वत्रिकोणे अपरत्रिकोणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सं॰प २२ नपुच्छसहितेनाग्नलक्षणाः इष्टकाऽपधेयाः॥ तथा दक्षिणपक्षसहिते दक्षिणोऽन्तरपक्षसहितेऽन्तरे वह्निकोणे चोदकलक्षणाऽपधेयाः॥ तथा
दक्षिणश्रोण्युत्तरांसशंकुवद्धाक्षायाग्न्याधिष्ठिते दक्षिणश्रोण्युत्तरांसधिके सर्वस्मिन्नक्षाया देशे या इष्टकाऽपधीयन्ते पद्मापादभाग ह
स्तीजंघामध्यादिकस्ताः। सर्वोऽद्दलक्षणाऽपधेयाः। तथाऽन्तरश्रोणि दक्षिणांसशंकुवद्धाक्षायादेशे पूर्वोक्ताः सर्वा इष्टकाः। प्राग्ल
क्षणाऽपधेया। तथाभिन्नानां भग्नानामिष्टकानां कृष्णवर्णानां च चयनं न कर्त्तव्यं। पंचम्यां तु लोकंपृणानां प्रकारांतरेणोपधानविधा
नादुदं वो वर्ग इत्यादिनियमस्याप्रवृत्तिः। यज्ञुष्मतानां तु भवति॥ ॥अथ प्रकृतमुच्यते॥ प्राकृतानि दीक्षापक्षाणां मध्ये यः पक्षोंगीकृ
तो भवति। तस्मिन्पक्षे यावत्यो दीक्षा भवंति। तावतीनामुत्तमे हनि वेदिमानमग्निमानं च कर्त्तव्यं। तत्र संवत्सरदीक्षापक्षे। फाल्गुनकृष्ण राम:
चतुर्दश्यां। पञ्चमासदीक्षापक्षे चैत्रशुक्लैकादश्यां वैशाखस्य वा शुक्लैकादश्यां वेदिमानं कर्त्तव्यं। एकादीक्षापक्षेश्वराश्चो वाग्निसर्गानंतरं यूप २२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छेदनमहावीरसंभरणवनीवाहननाप्युभस्मप्रक्षेपवेदिमानानिकार्याणि। तत्रपूर्वमुख्यस्याग्नेः स्थानेअर्द्धव्यामेनगार्हपत्यस्यमंडलंच
रिलिखति। सप्तपुप्रक्रमेषर्द्धव्यामाद्धिकेष्वाहवनीयवेरस्यमध्यं पूर्वक्रमस्ति॥ अधुनात्तस्मान्मध्याद्दर्द्धव्यामेनगार्हपत्यस्यपरिले-
खः कार्यः। ततः परिलेखस्यपूर्वांतादारभ्यप्राच्यांत्रिपदान्प्रक्रमात्रीन्प्रक्रम्यांतः पात्यस्यशंकोर्निखननंकार्यं॥ ततोब्रह्मयजमानयो
रग्निदेशं दक्षिणेनवहिर्वेद्युपवेशनं॥ ब्रह्मणः समंत्रकआसनसंस्कारः॥ यजमानवाचंयच्छेत्तिप्रैषः। ततषट्कासादनादिप्रिकप्रोक्ष-
णांतं। तणांस्यपत्नेनस्थापनं। ततस्त्रिपदप्रक्रमप्रमाणांकाष्ठंगृहीत्वा तेनकाष्ठेनांतः पात्यादारभ्यषट्त्रिंशत्प्रक्रमाप्राचीं। वेदिंमिमीते।
तत्रप्रांतेयूपावटार्थं शंकुर्निखातव्यः॥ ततोदक्षिणश्रोणेरारभ्यषड्द्विंशत्प्रक्रमा। ततोदक्षिणांसादारभ्योदक्चतुर्विंशतिप्रक्रमां॥ ततो
दक्षिणभागेऽन्तरभागेचश्रोणंसगामिनींरेखांकुर्यात्॥ वेदिपरिसमूहनमुत्करकरणंचाग्नीत्करोति॥ ततोअंतः पात्यादारभ्ययूपावटशंकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का॰क़॰प पर्यंतां पश्चिमस्यार्द्धस्थितिव्याप्य यति॥ एवं पश्चिमायमानं वेदिमानं॥ ॥अथाग्निमानमुच्यते॥ तत्र पादाग्राभ्यां तिष्ठता समस्थितेनवोर्ध्ववाहु
२५ नायजमानेन एकः पुरुषोभवति॥ अत एवंविधेन पुरुषेणाद्विपुरुषप्रमाणां रज्जुं मित्वा तस्याऽभयोरंतयोरेकैकः पाशः कर्त्तव्यः॥ ततस्तां द्विपु
रुषां रज्जुं मध्यमोटनेन द्विगुणीकृत्य तस्या मध्ये पुरुषमात्रे लक्षणं कर्त्तव्यं॥ ततस्तस्मात् मध्यमलक्षणात् मभितो द्वयोरर्द्धपुरुषयोरेकैकं लक्षणं कार्यं.
एवं त्रीणि। ततस्तस्मात् मध्यमात् दक्षिणात् पुरुषस्य पंचमेभागे मध्यमलक्षणात् सन्निकृष्टे चतुर्थलक्षणं कार्यं॥ ततस्तस्य पुरुषपंचमभागस्यार्द्धे पं
चमलक्षणं कार्यं॥ एवकृभयतः। पाशं मध्येलक्षणपंचकयुक्तां द्विपुरुषां रज्जुं कृत्वा पूर्वापरशंको: पश्चात्यादमात्रेचिन्हस्य पूर्वार्द्धशंकुं निखा
य तस्मिन् शंकावस्या रज्जोरेकं पाशं प्रतिमुच्य पश्चाद्याऽपरितां रज्जुं प्रतीचीमाकृष्यापरयाश्यां तेशंकुं निखाय तत्र पाशं प्रतिमुंचेत्॥ ततोस्या राम:
रज्वा मध्ये एकं शंकुं निखनेत्॥ ततस्तमभितो अर्द्धपुरुषयारेकैकं शंकुं निखनेत्॥ एवं द्विपुरुषं मानायां प्राच्यां पंचशंकयो निहिताः। ततोर २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्त्वा: पाशौ पूर्वापरशंकुभ्यां निःकाश्यार्द्धपुरुषलक्षणे निखातयोः पूर्वापरशंकोः पाशौ मतिमुच्य मध्यमलक्षणे न गृहीत्वा तां रज्जुं दक्षिणास्यां
दिश्यार्ऽऽकृष्य मध्यमलक्षणस्थाने नितोदं गर्त्तादिरूपं चिह्नं मौ करोति। ततोर्द्धपुरुषीयशंकुभ्यां पाशौ निःकाश्य नयोः पाशयोर्मध्ये एकं
पाशं प्राच्या मध्यमे शंकौ प्रतिमुच्य तां रज्जुं नितोदस्योपरि समां दक्षिणात आकृष्य मध्यमे लक्षणे शंकुं निखनेत्॥ ततस्तस्मिन् शंकौ एकं पा
शं प्रतिमुच्य द्वितीयं पाशं प्राच्यां पूर्वान्तनिहिते शंकौ प्रतिमुच्य मध्यमे लक्षणे न रज्जुमाग्नेयकोणं प्रत्याकृष्य मध्यमे लक्षणे दक्षिणां –
स शंकुं निखनेत्॥ ततस्तस्य शंकोः पश्चाद् द्वौ पुरुषलक्षणे चपक्षांकनार्थं शंकुं तन्निखनेत्॥ ततः प्राचीं प्रान्तशंकोः पाशं निःकाश्य प्राच्यपरान्त
शंकौ प्रतिमुच्य मध्यमे लक्षणे न गृहीत्वा नैऋतीदिशं प्रत्याकृष्य मध्यमलक्षणे दक्षिणशंकुं निखाय तस्य शंकोः पुरस्ताद् द्वे पुरुषे दक्षि
ण पक्षांकनार्थं शंकुं निखनेत्। श्रोणिशंकोरुत्तरश्चार्द्धपुरुषे पुच्छसाधनार्थं शंकुं निखनेत्। एवमात्मनो दक्षिणार्द्धं साधयित्वोत्तरार्द्ध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.सू.प मप्येवसाधनीयं॥ तत्रैकं। पाशाऽन्मुच्यार्द्धपुरुषीययोः प्रतिमुच्योत्तरायस्य मध्यमे नितोदंकरोति॥ ततोऽन्मुच्य पाशावेकं मध्यमे प्रतिमुच्य
२५ नितोदस्योपरिसमासुत्तरस्यां दिशि आकृष्य मध्यमे लक्षणे शंकुं निखनेत्॥ ततस्तस्मिन् शंकावेकं पाशं प्रतिमुच्य द्वितीयं प्राचीपूर्वान्त शंकौ
प्रतिमुच्य मध्यमेन लक्षणेन रज्जुमीशानकोणं प्रत्याकृष्य मध्यमे लक्षणेऽन्तरांसं शंकुं निखाय तस्य शंकोः पश्चादर्द्धपुरुषेऽन्तर
पक्षसाधनार्थं शंकुं निखनेत्॥ ततः प्राचीपूर्वान्त्या शंकोऽन्मुच्य तं शंकुं पाशं प्राच्यपरां शंकौ प्रतिमुच्य मध्यमेन लक्षणेन वा
यव्यकोणं प्रति रज्जुमाकृष्य मध्यमे लक्षणेऽन्तरश्रोणि शंकुं निखाय तस्य शंकोर्दक्षिणतः पुच्छसाधनार्थं शंकुं निखनेत्॥ त
स्य श्रोणिशंकोः पुरस्तादुत्तरपक्षसाधनार्थं शंकुं निखनेत्॥ ॥एवमात्मा साधितः॥ ॥अथ दक्षिणपक्षसाधनार्थं॥ ततः राम:
आत्मनो दक्षिणपार्श्वे यो अर्द्धपुरुषयोः शंकुं निहितौ तयोः पाशौ प्रतिमुच्य मध्यमे लक्षणेन रज्जुं प्रदक्षिणत आकृष्य मध्यमेल २५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षणेनितोदंचिह्नंकरोति।ततःपाशादुन्मुच्यपश्चिमभागेपंचमभागीयेनतदर्धलक्षणेनभवतस्तस्यभागस्यपाशंआत्मदक्षिणपार्श्वम-
ध्यशंकौप्रतिमुच्यतांरज्जुंनितोदस्योपरिसमांदक्षिणतआकृष्यपंचमभागीयेलक्षणेशंकुंनिखनेत्॥ततस्तस्मिन्शंकौपाशंप्रतिमु-
च्यात्मदक्षिणपार्श्वमध्यकुप्रोतंपाशंदक्षिणपार्श्वेपूर्वार्द्धपुरुषीयेप्रतिमुच्यपंचमभागीयार्द्धपुरुषीयलक्षणेएकत्रगृहीत्वारज्जुमा-
ग्नेयींप्रत्याकृष्यपक्षस्याग्नेयकोणेनिखनेत्॥ततःपूर्वस्मादर्द्धपुरुषात्पाशंनिःकास्यपश्चादर्द्धपुरुषीयशंकौपाशंप्रतिमुच्यतथैव-
नैरृतींप्रत्याकृष्यपक्षस्यनैरृतकोणेशंकुंनिखनेत्॥ ॥एवंदक्षिणपक्षःसाधितः॥एवमेवोत्तरपक्षःसाधनीयः॥ ॥अथपुच्छस-
साधनं॥तत्रात्मनःपश्चिमपार्श्वेयौपुच्छसाधनार्थमर्द्धपुरुषयोःशंकुंनिहितौ।तयोःपाशौप्रतिमुच्यमध्यमेलक्षणेनरज्जुंपश्चादाकृ-
ष्यमध्यमेचिह्नंकुर्यात्॥ततःपाशादुन्मुच्यरज्ज्वापश्चिमभागेपंचमभागीयार्द्धपुरुषीयलक्षणेनभवतस्तद्भागस्यपाशमात्मपश्चिमपार्श्वम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·सू·प
२६

मध्यशंकौ प्रतिमुच्य तां रज्जुं नितंतौ दत्वा परि प्रतीचीमाकृष्य पंचमभागीयार्द्धलक्षणे शंकुं निखनेत्॥ ततस्तस्मिन्नाकौ एकं प्रतिमुच्य मध्यशंकु
प्रोतं पाशं दक्षिणोर्द्धपृष्ठीय प्रतिमुच्य पंचमभागीयार्द्धपृष्ठीयलक्षणे एकत्र गृहीत्वा रज्जुं नैऋतीं प्रत्याकृष्य पुच्छस्य नैऋतकोणशं
कुं निखनेत्॥ ततो दक्षिणार्द्धपृष्ठीयात्पाशांनिकाप्यो त्तरपृष्ठीये प्रतिमुच्य तथैव वायव्यां प्रत्याकृष्य पुच्छस्य वायव्यकोणशंकुं नि
खनेत्॥ ॥एवं पक्षपुच्छसहितो ग्निः साधितः॥ इत्थ्यापक्षयोः संधौ पुच्छसंधौ च चतुरंगुलं चतुरंगुलं। उभयत्र संकाचयेत्॥ अंते चतु
रंगुलमुभयत्र वर्द्धयेत्॥ पुरुषस्य समविभक्तस्य पंचमो भागो रत्निः। दशमो भागः पदं। पदस्य द्वादशो भागो ऽगुलं॥ ततो ग्निक्षेत्रं पक्षपु
च्छसहितं सर्वतो रज्वा वेष्टयित्वा तस्या रज्जोर्वहिः संलग्नाः एकषष्ठ्यधिकशतद्वयसंख्याः परिश्रिताः ऽर्ध्दाः खातो निखातव्याः॥ ताश्चेष्टका राम:
नां स्तंभनार्थाः कात्यायनसूत्रात्पाषाणाः। माध्यंदिनसूत्रे त्विष्टकाः। तन्निखननार्थं च सर्वतो निम्ना परिखा खननीया॥ यथा परिश्रिता २६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नां तरत्निखननं भवति॥ अथवा चतुर्नवत्यधिकानि त्रीणि शतानि परिश्रितो निखनेत्॥ उभयपक्षेपि उत्तरपक्षस्यापरकोणेति स्रुचांपरिश्रि
तां खाते प्रमाणो विशेषः। एकाजंघामात्री तस्या उत्तरतो द्वितीयानाभिमात्री। अन्यासमर्थ्या ऊर्ध्वपरिमाणं कल्प्यं॥ द्वितीयादिषु चयनेषु
पंचनवतितमचयनं यावत्प्रतिचयनमेकैकपुरुषवृद्ध्याग्निक्षेत्रस्यमानं कार्यं॥ प्रथमचयने सार्द्धसप्तपुरुषप्रमाणमग्निक्षेत्रं॥
द्वितीये चयनेऽष्टपुरुषप्रमाणं॥ तृतीये चयने नवपुरुषप्रमाणं। एवं पंचनवतितमे चयने एकाधिकंशतं पुरुषा भवंति॥ अर्द्धपु-
रुषमानं तु सर्वत्राधिकमस्त्येव॥ तस्यापि प्रतिचयनं स्वसप्तमे भागेन वृद्धिर्भवत्येव। अंतिमे चयने तस्याप्येकोत्तरशतं स्वसप्तमभा
गा भवंति। अग्निक्षेत्रवदेव द्वितीयादिषु चयनेषु वेदिप्रमाणं वर्द्धयेत्॥ इष्टकानां च सर्वासां प्रमाणं वर्द्धयेत्॥ ननु तासां संख्याधिक्य
माश्रित्य क्षेत्रपूरणं॥ अत्रेदं रहस्यं। सर्वमग्निक्षेत्रं सार्द्धसप्तपुरुषात्मकसमचतुरस्रीकृतस्य सप्तमे भागेन द्वितीये चयने वर्द्धनीयं॥ पुरु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षे त्रयं वा पश्चाद्वृहतीं जंघामध्यादीषत्काक्षे त्रयं वा स्वस्वसप्तमे भागे नवर्द्धनीयं। एवं प्रक्रमक्षेत्रमपि स्वस्वसप्तमे भागे नवर्द्धनीयं॥ ततो यादिषु चयनेषु सर्वे द्वे
कोद्वये न स्वस्वसप्तमभागर्द्धनं द्वृद्धिर्भवती॥ ॥तद्यथा॥ तृतीये द्वौ सप्तमभागौ ऽत्राधिको भवतः॥ चतुर्थे त्रयः॥ पंचमे चत्वारः॥ अष्टे पंच॥ सप्त
मे षट्॥ एवं क्रमेण पंचनवतितमे चतुर्णवतिः स्वसप्तमभागा वर्द्धन्ते॥ अत्रायमुपायः॥ वृहत्यादिक्षेत्रं सप्तधा विभज्य सप्तमं भागं चतुरस्त्री
कृत्य। नानाप्रमाणांसमासश्चत्वाद्युपायेन वृहत्यादिक्षेत्रमध्ये अपि येदिति॥ तत्र गार्हपत्याचितेर्वेदेश्चांतराले त्रयः प्रक्रमास्तेषामिष्टुका वृ
द्धिः कार्या। तथा गार्हपत्यचितीष्टकानां क्षेत्रस्यैवेष्टया वृद्धिः। शुल्वकारेण त्वंतः पात्य गार्हपत्ययो वृद्धिप्रतिपिस्पष्टा स्ति अत्र सप्तधाद्येकशत
विधांतानामग्निनुष्ठाने क्रमनियमो नास्ति॥ तस्मादुसप्तविधमेव प्रथमं विदधितान्येकोत्तरमेकशतविधादित्येतन्नु प्राप्य स्यं चिनप्रका राम:
रपि क्षमेवानुष्ठानापेक्ष। असंभवत्। न हि दीर्घायुषापि पुरुषेणैते प्रकाराः सर्वे क्रमेणानुष्ठातुं शक्यते॥ ततश्चैकशतविधादीनां विधा २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नस्यवैयर्थमेवस्यात्॥ क्रमेणैकेनाप्येकशतविधपर्यंताग्निकाशानुष्ठानस्य असंभाव्यमानत्वान् इच्छाक्रमेणानुष्ठाने तु सर्वप्रकाराणां
सार्थकत्वं भवति।पुरुषभेदेनकश्चित्कंचित्प्रकारमनुतिष्ठति॥ कश्चित्कांचिदिति॥ अतएकैकप्रकारस्याहृत्निरपि कर्त्तुं शक्यते क्रमनि
यमाभावादिति॥ ॥इतिश्रीविरचितसम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतेनयाज्ञिकदेवकृता कात्यायनसूत्रपद्धतौ
षोडशोध्यायः॥ १६ ॥प्रातरुपसत्सुप्रथमेहि दिने नियमेन त्रिस्तनं व्रतकरणं॥ चयने एकस्तनादिपक्षो न भवति उदिने सन्निधाना
नानंतरं प्रथमत्र्यम्बवहरणादिप्रायश्चित्तं पूर्ववत्कुर्यात् पूर्वं पलाशपुटेनोख्यभस्म एकदेशं चाप्सु प्रक्षेपणीयं॥ द्वितीयवारं तथै
वद्वाभ्यांपूर्ववाद्वाभ्यांद्वितीयमेकया॥ अनामिकया ततो भस्म नआदानं प्रसद्येति चतुर्भिः। शालायामागत्य उख्याया आतस्य भस्मनः
प्रासनं वो धाम इतिद्वाभ्यांमुपस्थानं।आज्यसंस्कारपूर्विका अध्वरप्रायश्चित्ति अग्निप्रायश्चित्ति तस्य भस्मनः प्रासनं॥ वो धाम इति द्वा-

का॰सू॰प म्यानुपस्थानं।आज्यसंस्कारपूर्विकाअध्वरप्रायश्चित्तिः अग्निप्रायश्चित्तिश्च एतावत्प्रथमं कुर्यात्॥ ततोविष्णुक्रमवात्सप्रसमासयजमानः
२८ करोति।यदितस्मिन्नहनिविष्णुक्रमाणांपर्यायोभवतितदाविष्णुक्रमान्कृत्वावात्सप्रोपस्थानंकुर्यात्॥यदिवात्सप्रोपस्थानस्यपरिपाय
स्तदापूर्वंवात्सप्रेणोपस्थानंकृत्वाततोविष्णुक्रमान्वात्सप्रोपस्थानंचकुर्यात्॥ततोध्वर्युःपलाशशाखयागार्हपत्यचितेःस्थानस्यमध्या
दारभ्यप्रतिदिशंसंमार्जनंकरोति।तत्रअपेतवीतइतिपादेनपुरस्तात्प्रथमं॥येऽत्रस्थपुराणाइतिद्वितीयपादेनदक्षिणतः।अदाद्यइति
तृतीयपादेनपश्चात्॥अक्रन्निमामितिचतुर्थपादेनोत्तरतः॥ततोपलाशशाखामुदीच्यादिश्युदग्ग्रामुदस्येत्॥ऊर्ध्वामेवनिरस्येत्॥ततः
संज्ञानमसीतिमंत्रेणमंडलस्यमध्येऊषान्निवपति।ततस्तैरूषैःसर्वमंडलमाच्छादयति।ततोग्नेर्भस्मासीतिमंत्रेणमंडलमध्येसिकता राम:
निवपति॥ततस्ताभिःसर्वमंडलंतूष्णीमाच्छादयति॥ततएकविंशतिसंख्याभिःपरिश्रिद्भिरेकेनचितस्थेतिमंत्रेणमंडलंपरिश्रयति॥ता २८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्च मंडलस्य समंततः परिखां निम्नां खात्वोर्द्ध्वाः शर्कराः संलग्नाश्च्विन्नेव स्तंभनार्थं निखातव्याः ॥ ततो मंडल दक्षिणभागे उदङ्मुख उप-
विश्य मंडलस्य मध्ये च तस्योर्द्ध्व बृहती रिष्टकाः प्राग्लक्षणाद्दक्षिणोत्तरा उत्तरामारभ्याभ्यात्ममयं सो अग्निरिति – प्रथमुपदधाति तत्र अ
यं सो अग्निरिति प्रथमां । अग्ने यन्ते दिवी ति द्वितीयां ॥ अग्ने दिवो अर्णा इति तृतीयां । पुरीष्यासो अग्नय इति चतुर्थी । एवमुत्तराया । आर-
भ्य दक्षिणासंस्था श्च तस्त्र उपधाय तयादेव तयेति च तस्तृणां सकृत्सादनं कुर्यात् ॥ ततस्ता अस्येति सकृदेव सूददोहसाधिवदनं कु-
र्यात् ॥ सादनं चोपहितानामिष्टकानां स्थिरीककरणं ॥ सूददोहसाधिवदनं चोपहिते ष्टकानामुपरि हस्तं निधाय ता अस्येति मंत्रपठ-
नमात्रं । तत उपहितानामर्द्ध बृहतीनां मध्ये द्वितीय तृतीये अर्द्ध बृहत्यौः ॥ अपरेण पश्चाद्द्वेपद्ये अर्द्ध बृहती संलग्ने उदग्लक्षणोपधे-
ये ॥ तयोरेवार्द्ध बृहत्यौ । पुरस्तादप्येवमेव द्वेपद्ये उदक्लक्षणो उपधेये । आसां चोपधान क्रमो मंत्रा श्चो च्यंते ॥ उपहितेष्टका अपरेण

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का·सू·प नरतोगत्वा दक्षिणामुखउपविष्टोऽपरयोर्दक्षिणां प्रथमामुपदधाति॥ इडामग्न इति मंत्रेण प्रत्येकमिन्त्वे। ततउत्तरामयं ते योनिरिति उपदधाति
२६ नित्ये चकृत्वा॥ ततस्तेअपरेणगत्वा दक्षिणातउदङ्मुखो पविष्टः पूर्वयोर्मध्ये प्रथमामुत्तरामुपदधाति चिदसीत्येतावतामंत्रेण ततस्ताः
यादेवतयेति सादनं॥ ताअस्येति सूददोह साधिवदनं करोति॥ ततः परिचिदसीत्येतावता मंत्रेण दक्षिणामुपधाय पूर्ववंतित्ये करोति॥
ततोऽवशिष्टेषु त्रिषु कोणेषु पद्याः पूर्वदक्षिणाकोणे प्रागायते अर्द्धपद्ये॥ तत्र दक्षिणापरकोणउदक्लक्षणापद्योपधेया॥ उत्तरपूर्व
कोणेप्युदक्लक्षणौ वपद्यो पधेया॥ उत्तरापरकोणे च प्राक्लक्षणाः पद्याः॥ ततः शेषे मंडेअष्टौवक्ताद्र्ष्टकाउपधेयाः॥ ताश्च पुरस्ता
द्वेप्राग्लक्षणे। दक्षिणोत्तरयोश्च द्वे द्वे उदग्लक्षणे एवमेकविंशतिरिष्टकानां मध्ये अष्टौ मंत्रांतरेणोपहिताः॥ ॥अथत्रयोदशलोकंपृणा राम:
अवशिष्यंते तासां मध्ये प्रथमं पूर्वयोर्वकयोर्दक्षिणाध्वका। द्वेअर्द्धपद्ये एतास्तिस्रः पूर्वमुपधालोकंपृणेत्यभिमंत्रयेते॥ ततोऽवशिष्टा २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशोपधेयाः॥ अथवा प्रथममेकावकाण्काईपयाण्वं द्वेउपधायततः पुदक्षिणादशा। ततोनं ते पूर्वयोत्तरएएकावक्केति॥ ततश्चात्वाल
देशात्पुरीषमानीयेंड्रंविभ्याहृति गार्हपत्यचिते मध्ये आवपति। ततः पुरीषेण समविलंकृत्वा· ततोध्वर्युः रिक्तमग्निभृत्या मुखां सिक
ता पूरणाद्र्वाकृन विलोकयेत्॥ ततउखांसिकताभिः पूरयित्वा मातेव पुत्रमिति मंत्रेणाशिक्याद्दुःखां विमुंचति ततोग्रे स्तनरतोरत्निमात्रे
चितेरुपर्यैवोखां निधाय तत्स्त्रीमेवोखामध्ये पयोनिनयति। केचिदाचार्या गार्हपत्यं चिचितमिष्टं तिअस्मिन्पक्षे अर्द्धहृहस्तुपधानादिवि
रपरं कर्त्तव्यं॥ ततः पुरीषनिवपनादि। ततोध्वर्युर्नैऋतीसंज्ञास्त्वरिष्टकाः पश्याः कृष्णवर्णास्तुषैः पक्वालक्षणवर्जिता नैऋत्यां दिशिगत्वाखं
यं प्रदीर्णश्वभ्रादौउषदेवादक्षिणोत्तरानिधाय ततो दक्षिणामुखस्तासामिष्टकानां स्पर्शमकुर्वन्पराचोरमुत्वंतमिति प्रत्यचमुपदधाति॰
तानुच नित्येनभवतः। ततः शिक्यं रुक्मपाशः इंडुंत्रासंदी चेत्येतानि नैऋतिभ्यो दक्षिणादेशे यंते देवीरिति निरस्यति॥ ततआत्मनोनैऋतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का·स·प
३०

नांचांतरालेऽप्दक्पूर्णांचमसंतिनीयतमोभूत्वाऽस्मनेन मंत्रेण ब्रह्मयजमानाध्वर्यवः उपतिष्ठंति ततो ब्रह्मादयो नैऋत्यमुपधाम्यदेशात्पन
पेक्षपश्चादवलोकनमकुर्वतः शालायां प्रत्यागछंति ॥ ततः शालां प्रविश्य गार्हपत्यचिते स्तन्नरतोवस्थिता प्राङ्मुखा निवेशनः इति मंत्रेण शा
लाद्वार्यशालाद्वारीभवं गार्हपत्यचित्यात्मकमिष्टकाचितिमग्निमुपतिष्ठंते एते त्रय उपतिष्ठंत इति याज्ञिकाः ॥ ब्रह्मेत्याग्निमुपतिष्ठते य
देवोपतिष्ठत इत्येकवचनश्रवणादध्वर्युरेवोपतिष्ठत इत्यन्ये ॥ ॥ततः प्रायणीयेष्टिः ॥ तस्यां चतुरासनादि । हविष्कृदाह्वानादिनुष
विमोकांतं कृत्वा श्रूर्पादानान्प्राक् माहावेदेः स्फ्यादानादि संमर्शनांतं करोति पूर्ववत् ॥ ततः श्रूर्पादानादिवेदयोक्त विमोकांतं प्रायणीयं
कर्त्तव्यं ॥ ततः उदुंवरं सीरंयुनक्ति ॥ तत्र सीदप उज्जुज्ञातं तन्मुजमयं त्रिगुणमयं च भवति षड्द्वादशवा चतुर्विंशतिं वा वलीवर्हानग्ने राम:
स्तत्तरां सस्यपुरस्ताद्युनक्ति प्रतिप्रस्थाता ॥ ततोध्वर्युर्दक्षिणमग्निश्रोणिमपरेणाति छन्नुति प्रस्थात्रादिभिर्युज्यमानं सीरं सीरायुंजंतो ३०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिद्वाभ्यामभिमंत्रयते। ततोध्वर्युः सीरेणात्मनिकृषति हलस्याग्रेमहती मौञ्जीं त्रिवृतां रज्जुं बध्वा तस्याः प्रान्तं वलीवर्द्दानां स्कंधस्थे युगेव
ध्नीयात् वलिवर्द्दस्त्वग्निक्षेत्रां दक्षिरेवतिष्ठंति॥ सीरं कर्षणवेलायामध्वर्युपुरुषा अग्रतो नयंति। ततोध्वर्युः प्रथममात्मनो दक्षिणश्रो-
णेरारभ्य दक्षिणांसपर्यंतां प्राचीं सीतां कृषति शुनं सुफाला इति मंत्रेण। ततः सीरमुत्थाप्य पुनर्दक्षिणश्रोणेरारभ्योत्तरश्रोणिपर्यंतां द्वि-
तीयामुदीचीं सीतां कृषति घृतेन सीतामिति। तत उत्तरश्रोणेरारभ्योत्तरांसपर्यंतां तृतीयां सीतां प्राचीं लांगलं पवीरवदिति मंत्रेण कृष-
ति। तत उत्तरांसादारभ्य दक्षिणांसपर्यंतां दक्षिणसंस्थां चतुर्थीं सीतां कामं कामदुघ इति मंत्रेण कृषति। एवं चतस्रः सीता आत्मनश्च-
तुर्षु पार्श्वेषु मंत्रेण कृषति॥ ॥अथ द्वादश सीता आत्ममध्ये तूष्णीं कृषति॥ तत्र प्रथममुदगन्तकेति स्त्रः सीतास्तूष्णीं प्रदक्षिणं कृषति।
ततोऽस्यायादक्षिणश्रोण्युत्तरांसयोस्तिस्त्रः सीतास्तूष्णीं कृषति॥ ततः प्रागन्तकेति स्त्रः सीतास्तूष्णीं प्रदक्षिणं कृषति॥ ततोऽस्यायोत्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रोणिदक्षिणांसयोः स्थितः सीतां तृतीं लभति। ततो विमुच्यध्वमिति मंत्रेण सर्वान् बलीवर्दान् विमुच्य प्रागुदीच्यां दिश्युत्सृजति दक्षिणा कालेयं
अमानेन बलीवर्दान् अध्वर्यवे देयाः। ततः सीरमुत्करे प्रक्षिपेत्॥ ततोऽध्वर्युरात्मनो मध्ये तृतीं कुशस्तंबं प्रागग्रं पयाप्रमाणमुपदधाति निन्येअ
पिनभवतः॥ ततोऽध्वर्युरग्नेः संस्कृतपं चरुं गृहीतं गृहीत्वा कुशस्तंबं परिस्तीर्य कुशोपग्रहः कुशस्तंबस्योपरि सम्रडग्ने इति मंत्रां तेजुहोतिस्रू
वमुदग्रकात्॥ इदमग्नायो षलेभिर्भ्यां स्वाहा वैश्वानराय नमः। ततओ डुंबरं चमसमुदकेन पुनः पुनः पूरयित्वा च ततस्तच्च ततस्तत्र सी
तासु चीत्रीन् द्वचमसान् कर्षणाक्रमेण निनयतीति॥ तत्र च त्री भागा सीताः एकैकस्य चमसस्य भागे आयाति॥ ॥तथाहि॥ प्रथमचम
सभागे एका दक्षिणा सीता समग्रा। अपरस्यास्तृतीयो भागः। द्वितीये अपरस्या द्वौ भागौ। उत्तरस्याश्च द्वौ। तृतीये एको भागः उत्तरस्याः
पूर्वा समग्रा। ततस्तिर्यगुत्कृष्टयस्त्रिस्रः सीतास्तासां मध्यमा सकला। तस्यैव तृतीयो भागस्तत्र चतुर्थः। ततस्तस्या द्वौ भागौ वा पवरस्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र पंचमः। ततस्तस्या एको भागो दक्षिणाश्रोणपुनरांससीतानामध्यमासमग्रा। तत्र षष्ठः। ततस्तद्दक्षिणासीतासमग्रा। उत्तरस्यास्तृतीयो भागः
तत्र सप्तमः। ततः तस्या द्वौ भागौ प्रागनूकः। सीतानां मध्यमायाश्च द्वौ भागौ तत्राष्टमः ततः तस्यास्तृतीयो भागः स्याद्दक्षिणासमग्राः॥ तत्र न
वमः। ततउत्तरासमग्राः उत्तरश्रोणिर्दक्षिणांससीतानां मध्यमायास्तृतीयो भागः। तत्र दशमः। ततस्तस्या द्वौ भागौ। तदपरस्याश्च द्वौ॥ तत्रै
कादशः। ततस्तस्या एको भागः। पूर्वा च समग्रा। तत्र द्वादशः। एवं षोडश सीतासु द्वादशानां च मसानां निनयनं कृतं॥ अथ त्रयश्च मसा अ-
वशिष्यंते॥ तत्र तिसृणां सीतानां मध्ये ये द्वे द्वे अग्रकृष्टे चतुर्थ्यपि स्थानेषु॥ एवं तान्यष्टौ भवंति तेषु विभज्य तेत्र यश्च मसानि नेयाः॥ तत्र
च त्रिभागो जानि त्रीणि त्रीण्यपकृष्टान्येकैकस्य द्वे तृतीयो भागो। तत्र त्रयोदशश्च मसो निनयः भागेष्वायांति॥ ॥तथाहि॥ निर्यगनूकमवेस
मग्रे द्वेग्रकृष्टे दक्षिणाश्रोणपुनरांसाकृष्टयोर्दक्षिणस्याकृष्टस्य द्वौ तृतीयौ भागौ॥ तत्र त्रयोदशश्च मसे निनयः। ततः तस्य एकस्तृती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प यो भागः। ततस्तस्य उत्तरं समग्रं भागं नृकाकत्वयोर्दक्षिणा समग्रं ॥ उत्तरस्यास्तृतीयो भागः॥ तत्र चतुर्दशाश्वमसोन्नितेयः ततस्तस्य द्वौ भागावुत्तर-
३२ यो दक्षिणां संभवे द्वेसमग्रे अकृष्टे ॥ तत्रास्मिन भागे॥ याकोण पर्यंतं पंचदशाश्वमसोन्निनेय इति ॥ ततस्तस्मिन्नौदुंवरे चमसे एकं धान्यं
वर्जयित्वा सर्वाणि धान्यान्यावपति यानि तत्संपद्यं ते तत्सुतिनिधीय वानावपेत्। मानवेदर्शनात्। यस्यावापो न क्रियते तस्य धान्यस्य यावज्जी-
वमभोजनसंकल्पो यजमानेन कर्तव्यो यावज्जीवमहं कोद्रवान्न भोक्ष्ये। माषान्नं न भोक्ष्यत्येवं ॥ ततो याः ओषधीः पूर्वाजाता इत्यत आरभ्य पं-
चदशभिरुग्भीरुदचमसे नयनवत्सर्वौषधं वपति ॥ एकैकचमसस्याने एकैकामकधान्यानी चमसे नैवावपति न तु मुष्टिं गृहीत्वा कुतः
शेदुंबरेण चमसेन चतुःस्रक्तिनेति चमसस्य वपनकरणत्वेन तेनश्रवणात् ॥ या ओषधीरिति मंत्रांते। आरभ्य प्रथमो दचमसनिनयनात् राम:
वधिपर्यंतं वपति। ततः शतं वर इति द्वितीयं मंत्रं पठित्वा द्वितीयो चमसनिनयस्थाने वपति॥ ओषधीप्रतीति तृतीयो दचमसनिनयस्थाने ३२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽोषधीरितिचतुर्थस्य। अश्वत्थेवइतिपंचमस्य। यत्रौषधीरितिषष्ठस्य। अश्वावतीरितिसप्तमस्य। उच्छुष्मा इत्यष्टमस्य। दुष्कृतिरितिनव
मस्य। अतिविश्वाइतिदशमस्य। यदिमाइत्येकादशस्य। यस्यौषधीर्द्वादशस्य साकंयक्ष्म १३ अन्याव १४ याःफलि १५ याःफलिनीरित्यनेन
पंचदशचमसनिनयस्थानेसकलमपिसर्वौषधेवपतिसर्वत्रचमसेनैवसर्वौषधंवपतिनतुहस्तेन। ततऽपरवदेप्रतिष्ठस्यातारो
हितेचर्मणिपानडुहेसोमंनिवपति इत्यत आरभ्यआतिथ्येष्टेर्हविःकृत्स्नानादितुषविप्रमोकांतंकुर्यात्। अपीनानात्प्राग्गेवाध्वर्युरात्मन
ईशानकोणादारभ्य सप्तसप्त परिश्रितोभिमंत्रयते॥ सप्तविंशत्याररंसप्तसप्तसुमंत्रः। ततोऽवशिष्टयोर्द्वयोः। ततो लोगेष्टकानाम्न तंवं
डानामुपधानं॥ तत्रप्रथमंपुरस्ताद्बहिर्वेदेःसकाशात्स्थेनमन्तंवंडमाहृत्यात्मनःप्रागग्रकांतेपरिश्रितोंतरतऽन्नाणभिमुखवास्तिछू
न्मापाहि ॐ लीजनितेतिमंत्रेणोपदधाति॥ ततोनित्ये॥ ततोदक्षिणस्यांदिशिगत्वाबहिर्वेदेःस्थेनमन्तंवंडमाहृत्यात्मनोदक्षिणपार्श्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.स्र.प
११

मध्ये दक्षिणपक्षसंधिमंतरेणासंलग्नमेवाक्रांते पूर्वाभिमुखस्तिष्ठन्नुपदधाति ॥ अप्यावर्त्नस्वेति मंत्रेण ॥ ततो नित्ये ततो वायव्यां दिशि गत्वा बहि-
र्वेदेरुत्तरपश्चाद्भाग एव दिशः सकाशात् स्फ्येन मृत्तवंडुमाहृत्यात्मनः पश्चिमपार्श्वमध्येन्नक्रांते पुच्छसंधिमंतरेणाग्नेयन्नयन्न इति मंत्रे-
णा दक्षिणाभिमुखस्तिष्ठन्नुपदधाति नित्ये च करोति ॥ ततउत्तरस्यां दिशि गत्वा बहिर्वेदेस्तस्या एव दिशः स्फ्येन मृत्तवंडमानीयात्मन उत्तर-
पार्श्वमध्येन्नक्रांते पक्षसंधिमंतरेण पश्चिमाभिमुखस्तिष्ठन् विषमर्जमहमिति मंत्रेण तन्मृत्तिकास्तेनोपदधाति ॥ ततो जहामि सेदिमि-
त्यनेनउत्तरस्याः सिकताः पुमार्ष्टि हस्तस्पर्शेनेनाधः पातयतीत्यर्थः । ततो [illegible] । ततः शम्यामादाय चात्वालमानादुत्तरवेदिक्षुद्रतां तं प्र-
कृतिवत् ॥ ॥ तत्र विशेषः ॥ कुशस्तंबस्योपर्युत्तरवेदिनिवापः । उत्तरवेदिश्च युगमात्री वा । चत्वारिंशत्पदावाक्षेत्रफलेन । षडशीत्यंगु- राम:
लैर्युगं भवति एतावन्मात्रा चतुरस्रा । चत्वारिंशत्पदा वक्षेत्रफलेन यस्यां चत्वारिंशत्पद्यानां क्षेत्रं भवति सा च पुरुषकृता ॥ द्विपदा- २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तिर्यङ्मानीषट्पदापार्श्वमानीतस्याक्ष्णयारज्जुश्चत्वारिंशत्करणीति। ततोऽग्नेनवेतिषट्क्रमेणेनआत्ममध्येउत्तरवेदेःपरिवद्धी
सिकतानिवपति। ततस्तूष्णींताभिःसिकताभिःसर्वमात्मानंपुदक्षिणांतथाप्रच्छादयति॥ यथाप्रच्छादितःसंउत्तरवेदिलोगेष्टकाभिः
संमोघ्रुयःसंपद्यते ततआप्यायस्वेतिद्वाभ्यांआत्माछादनभूताःसिकताआलभते। ततोवर्षवृद्धमसीतिशूर्पपात्रादिप्रभृत्यातिथ्या
शेषंसमापयति॥ ततःप्रवर्ग्योपसदौकुरोति ततउपसत्सुसुब्रह्मणांप्रामांता। अंतःपात्यस्यपुरस्ताद्वेदिमध्येप्राग्ग्रीवमुत्तरलोमानडु
हंरोहितंचर्मास्तृणाति तत्रचर्मणिप्रथमचितेरिष्टकांनिदधाति इतरासांचितीनांस्वयमातृणाएवतत्रनिदधाति। अन्यास्वेष्टकानि
दधाति। ततश्चर्मणःपुरस्ताच्छ्वेतोऽश्वस्याप्यतेऽश्वेतस्याभावेऽश्वेतोप्यश्वःस्थापनीयः। तस्याप्यभावेऽनड्वान्। ततआत्ममध्येकु
शाग्राणिअतिशयेनउत्कृत्तैःकुशाग्रैस्तूष्णींचर्मस्थाइष्टकाआज्येनप्रोक्षति ततोध्वर्युर्गार्हपत्येआज्यंसंस्कृत्यजुह्वांपंचगृहीतं

का॰सू॰प ग्न्यान्तिकस्मिंश्चित्पात्रे लौकिकाग्नेर्वापः प्रोक्षणार्थं कार्यः। आज्यप्रोक्षणीनां प्रणयनं ततो बहवोऽध्वर्य्युदयश्च मौग्रमनं कुर्वन्ति॥ ततोऽग्निमन्थः प्र
२५ ह्रियमाणोऽध्वर्युः प्रतिहोतारं प्रति प्रैषः॥ ततः प्रथमायामृचि वेदिं पांशुभिः स्तीर्यांमश्वः प्रथमं पुरस्तादग्रतो नयन्ति॥ ततश्चर्मस्थां चितिं प्राच्यां हृ
त्वा अग्नेः पुच्छं दक्षिणां निदधाति चर्मस्थामेव॥ ततउत्तरपक्षमपरेणात्मनउत्तरश्रोणिपक्षसंधं तरवर्त्निनात्मप्रदेशेनाश्वमग्निंचि
मारोहयन्ति एके आत्मपूर्वभागे प्रत्यं चमश्वमारोहयन्ति॥ एके पश्चात्पुच्छप्रदेशेन प्रांचं॥ ततोयत्रात्मनि मंत्रेणाकर्षणं कृतं तेनमार्गेणा
श्वं परिणयन्ति। ततउत्तरश्वै प्रथमं प्राङ्मुखं नयन्ति॥ ततः पूर्वपार्श्वे दक्षिणामुखं दक्षिणापार्श्वे प्रत्यङ्मुखं मागच्छन्तमेव पुच्छाद्दक्षि
णतः स्थापितां चर्मस्थां चितिमवघ्राप्य पश्चिमपार्श्वे उदङ्मुखं परिणीयोत्तरपक्षपरेणोवनिः कार्ष्णप्रागुदीच्यां दिशमुत्सृजन्ति। ततो राम:
ऽग्निमास्तृणप्रोक्षणीरादायेंद्रघोषवत्त्वादिप्रोक्षणां प्रति दिशं बहिर्वेदि दक्षिणां सहितः शेषासेकः। नाभिव्याघारणं। स्रुग्ग्रयमनं। एताव २५

पत्रकर्तव्यं अत ऊर्ध्वं अग्निनिधानकालस्यैव वा ॥ ततउत्तरवेदिमपरेणातिष्ठन्यजमानो मयिगृह्णामीति स्वरेणाजपति ॥ ततो यजमानस
त्यसामगायति ब्रह्मा च दक्षिणापक्षस्य दक्षिणात आसनं समंत्रकं संस्कृत्योपविशति ततोऽध्वर्युः प्राङ्मुख उपविष्टः कुशास्तंबस्योप
रि पुष्करपर्णमुपदधाति अपां पृष्ठमसीति मंत्रेण पुष्करस्थं तेन । ततो दिवो मात्रयेति विमार्ष्टि विमार्जनेन विस्तीर्णं करोति ततो विस्ये । त
तः पुष्करपर्णस्योपर्यधः पिंडं रुक्ममुपदधाति ब्रह्मयज्ञानमिति मंत्रेण ततो निस्ये रुक्मस्य यः प्राग्यजमानेन धृतः सह व पुष्करपर्णं
मप्सु त्वा संभरणा संवध्वे किंचित् अन्यदित्यपरे ॥ ततो रुक्मस्योपरि पर्युत्तानं प्राङ्मुखं प्राक्शिरसं बाहिरण्यगर्भ इति द्वाभ्यां पुरुषमुपदधा
ति ततो नित्ये प्राङ्मुखे मिति वासुदेव प्राक्शिरसमिति याज्ञिकाः ॥ ततो यजमानः पुरुषमालभ्य छंदोगविहितं पुरुषसामगायति ततः
स्वशाखाविहिते पुरुषे इति पुरुषमालभ्य चित्रे चित्रलिंगके कमानभ्यि त्र इत्यस्मिन्मंत्रेण साम गायति अत ऊर्ध्वमस्य पुरुषस्य पुरस्तात्स

का.सू.प
३५

रिगमनमध्वर्युणानकर्त्तव्यं। प्रागन्तकोद्धंघनंकदापिनकार्यमित्यर्थः॥ ॥ततोयजमानोनमोस्तुसर्पेभ्यइतित्रिभिःप्रत्यृचमुपतिष्ठते॥
ततोध्वर्युराज्यस्थं संस्कृत्यपंचगृहीतंगृहीत्वोपविश्यकुशोपग्रहःप्रतिदिशंगत्वागत्वातत्पंचगृहीतंविभागेनप्रत्यृचस्योपरिजुहोति॥ ॥त
त्रप्रथमंपश्चाद्भागेप्राङ्मुखउपविष्टःप्रत्यृचस्यपश्चाद्भागेकृणुष्वपाजइतिमंत्रेणपंचगृहीतांशंजुहोति॥ इदमग्नयइतिसर्वहोमेषुत्या
गः॥ततउत्थायउत्तरतोदक्षिणाभिमुखउपविश्योत्तरपार्श्वेजुहोतितवभ्रमासइति॥ततउत्थायपुरस्तात्प्रत्यङ्मुखउपविश्यपूर्वभागेप्रति
स्पशइतिजुहोतिततःप्रत्यागत्यप्रत्यृचमपरेणदक्षिणास्यांदिशिगत्वोदङ्मुखउपविश्यदक्षिणपार्श्वेउदग्नेतिष्ठेतिजुहोति॥ततःपश्चाद
गत्यपूर्वाभिमुखउपविश्यपश्चात्पार्श्वेऊर्ध्वोभवेतिजुहोति॥अथवासर्वहोमेषुप्रत्यृचस्योपरिमध्यएवहोमोनप्राग्यादिदेशभेदेन।अध्वर्यो रामः
रेवायंदिङ्नियमः॥ततोयजमानोधोमुखःस्पर्शमकुर्वन्नेवप्रत्यृचमुरसावक्षसाथवाहृदक्षिणोत्तरौसमौप्रसारयति॥ततोध्वर्युर्वाहोःप्राप ३५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णां तेलिखति स्रुचोरुपधार्थं चिह्नं करोति। एकं दक्षिणतः। द्वितीयमुत्तरतः। ततश्चिह्नयोः प्रागग्रयोः स्रुचोरर्द्धपत्रप्रमाणयोरुपधानं
करोति। तत्र कार्ष्मर्यमयीं स्रुचं। पादमात्रीं दीर्घां षडंगुलविपुलामर्द्धपत्रालोकव्यापिनीं घृतपूर्णां दक्षिणतः कुशोपग्रहप्राङ्मुख
उपविष्टो अग्नेष्ट्वा तेजसा सादयामि अग्निमूर्द्धेति सादयति॥ ततो निस्ये· ततः पुरुषमपरेणाग्नीत्तरतः परिलिखेत तमौदुंवरीं स्रुचं
पादमात्रीं दीर्घां षडंगुलविपुलामर्द्धपत्रालोकव्यापिनीं दधिपूर्णां स्रुचोपग्रहः प्रत्यङ्मुख उपविष्ट इंद्रस्य त्वौजसा सादयामि भुवो यत्त
स्येति मंत्रेणोपदधाति ततो निस्ये। स्रुचोश्चोभयत्र विश्वज्योतिर्वेलाप्रांते तिर्यग्न्कस्योपर्युपधानं। एके आचार्या दक्षिणां स्रुचं दक्षि
णाग्रामुपदधाति। उत्तरां स्रुचोदगग्रामुपदधाति॥ ततः पुरुषस्योपरि स्वयमातृणा संत्तां शर्करां छिद्रां छिद्रपुक्तां तिर्यक्छिद्रीउपद
धाति॥ ध्रुवासि धरुणां स्तृते त्यादि ध्रुवासीदेत्यंतेन मंत्रेण ततो निन्ये॥ छिद्रं च पुरुषशिरस उपरिकार्यं। कुतः यथा पुरुषप्रत्यानणांसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.सू.प
३८

दितिमानवेदर्शमात्॥ ततो स्वां स्वयमातृण्णायां यन्नमानो भूरितिव्याहृत्यां साम गायति॥ ततो ध्वर्युर्हृदङ्मुखउपविश्य मूलाग्रवतीं दूर्वां स्वयमा
तृण्णायामुपर्युपदधाति तस्या मूलानि स्वयमातृण्णाया उपरि भवंति अग्राणि च स्वयमातृण्णायाः पुरस्ताद्भूमा वर्द्धपथा लोकं यथा व्याप्नुवं
ति। तथोपधानं कार्यं। कांडात्कांडादिति द्वाभ्यां मंत्राभ्यां दूर्वामुपदधाति॥ ततो निनित्ये· ततो याते अग्ने इति द्वाभ्यां मंत्राभ्यां द्वियजुषं पथां दू
र्वायाः पुरस्तात् मध्यात् द्वितीये लोके अनूकस्योपर्युदङ्मुखउपदधाति· ततो निनित्ये· ततो द्वियजुषः पुरस्तादेतः सिचौ॥ द्वे पश्चे अनूक
मभितउपदधाति विराड्ज्योतिरिति प्रथमम् उत्तरां॥ ततः स्वराड्ज्योतिरिति दक्षिणां द्वितीयमुदङ्मुखस्तकोपदधाति ततो द्वयोः सक्लृप्ति
त्ये॥ ततो रेतःसिचोः पुरस्तात्प्रथमां विश्वज्योतिषं पश्चादुदङ्मुखः प्रजापतिष्ट्वेति मंत्रेण अनूकस्योपर्युपदधाति॥ ततो निनित्ये· ततो वि रामः
श्वज्योतिषः पुरस्ताद्देक्षतव्ये पश्चे अनूकमभितउदङ्मुखो लोमभ्यस्त्वामाधवश्चेति मंत्रेण संविशाल्लिष्यंतेनोपदधाति॥ ततस्तया देवतयां ३८

गिरस्वद्ध्रुवे सीदतमिति मध्यमपठितेनैव सादनं करोति ॥ ततस्ता अस्येति पठति ॥ अत्रापि पूर्वमुत्तरां ततो दक्षिणां यथाक्रमं मधुश्च मा
धवश्चेति ग्रालम्भवासंतिका हृतू इत्यादिः शेषऽभयोरालंभं कृत्वा पठनीयः ततः सकृत्त्रिस्ते। ततश्च तत्रयोः पुरस्तादषाढां पश्चान्नक
स्योपर्युदङ्मुखो षाढासि सहमाना इति मंत्रेणोपदधाति ॥ ततो निस्ते ॥ ततः षाढया दक्षिणातो रत्निमात्रं पश्चाद्वयप्रमाणां परित्यज्य ततो
ये पश्चालोके ऽदङ्मुखउपविष्टः पश्चालोकव्यापिनं पुरुषाभिमुखं कूर्ममुपदधाति तत्र पूर्वं कूर्मं दधिमधुघृतैर्मिश्रीकृतैर्मधुवाता इ
ति तिसृभिर्मंत्रैरनक्ति। ततउपधानस्थाने पूर्वमवकाः शेवालं निधाय तत्तासमुपर्या पागंभंसीदेति तिसृभिरन्याभिः कूर्ममुपदधाति तत्र तिसृ
णांक्ष्यवांमध्येमध्यमापांचीन्समुद्रानिस्थेंतयाक्षवाहस्तस्थितमेव कूर्मं घृहयति ॥ ततस्तृतीयाग्रामृचि पठितायां मंत्रेऽउपदधाति ततउप
रिष्टान्नुत्तरवकाभिः कूर्मपृष्ठाग्रसादनदद्दोहसोकरोति ॥ ततोऽपरेणास्वयमातृणामुत्तरतो गत्वा ततो मध्यादुत्तरस्यां दिश्यरत्निमा

का॰सू॰प वैस्वयमानत्वान्नृत्तरेणान्वकसो पर्युलूखलमुसले दुर्दे अर्द्धपग्राग्रमाणे प्रत्यङ्मुखउपविश्य विह्लोः कर्मारत्नी त्येके नमंत्रेणा देव्यस्य विसहे वो
२७ पदधाति॥ उलूखलश्चौंतुरस्वप्रादेशमात्रउच्चोमध्यसंगृहीतश्च भवति मुसलं च प्रादेशमात्रं हन्नमौदुंबरमेव भवतिउन्नरतउलूखलमु
पदधाति॥ मुसलं च दक्षिणतः॥ सक्तान्नित्ये॥ ततउलूखलस्योपर्युखायाउपदधानं॥ तत्रपूर्वमुपशयापेषणं॥ ततउखायाउलूखलस्यो
परिनिधानं। ततउखां पूर्वेणोपशयानिवापः॥ ततो ध्रुवासि धरुणेति द्वाभ्यां मन्त्राभ्यां मुखायामुपधानं॥ ॥ततोनित्येइतिकर्कः॥ सू
त्रोक्तक्रमेणैवसर्वमितिहरिस्वामिनः। पूर्वउलूखलेउखाकरणं। ततउपशयापेषणं तस्याःपुरस्तान्निवापः ततउपदधानमिति॥ ततो
धर्युराज्यंसंस्कृत्यस्रुववंसंमृज्योत्तरपक्षमपरेणात्तत्प्राङ्मुखउपविष्टउखायांस्रुवेण द्वेश्वाहुती जुहोति अग्ने युक्ष्वाहीति प्रथमां। यु राम:
क्ष्वाहीति द्वितीयां॥ इदमग्नयइति द्वयोस्त्यागौ। संवत्सरदीक्षापक्षे नियमेनहोमद्वयं भवति॥ अन्येष्वपक्षे तु विकल्पेन होमः। विकल्पेन युक्ष्वा २७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हीति द्वाभ्यामुखाउपतिष्ठते अत्रोलूखलो खोपधानस्थाने पूर्वमर्थीत्यादि मारां खानं कृत्वा तत्रोलूखलाद्युपधानं कर्त्तव्यं ॥ यथा सिकतापू-
र्णायाउखायाउपर्युपहितानि पंचशीर्षाणि पार्श्वेषु कामिः समो भ्रूयाणि भवंति ॥ ततः पंचशीर्षः पश्वेशिरः शिरः प्रति सप्तसप्त हिरण्यश-
कलान्याप्स्यति ॥ तत्रसमप्य कस्तवं तीनि मं चेणा प्रथमं मुखे हिरण्यशकलं प्राप्स्यति ॥ ऋचे त्वेति दक्षिणानासिकायां । ततो ऋचेत्वेति सव्यना-
सिकायां । ततो दक्षिणाचक्षुषि भासे त्वेति ज्योतिषे त्वेति सव्ये ॥ ततो अभूदिदमिति दक्षिणकर्णे । अग्निर्ज्योतिषेति सव्यइति संव्यत्निसंप्र-
दायः । हरिस्वामिनस्तु प्रथमं सव्येषु नासादिषु ततो दक्षिणे ष्विति तु क्रवंतः । अनेनैव प्रकारेण पंचस्वपि शिरःसु मुखत्वादिक्रमेण हिर-
ण्यशकलप्रासनं । केचिदेकपशुपक्षे एकस्मिन्नेव शिरसि पंचवारं सप्तसप्त हिरण्यशकलान्याप्स्यति ततः प्रत्यङ्मुखोपविष्टः सिकता-
पूर्णायामुखायां प्रागग्रिस कस्पपयसउपरि मध्ये पुरुषशिरः प्रत्यङ्मुखं न्युब्जमधोमुखमिवोपदधाति ॥ ततपूर्वस स्वदाश्यपनेन पुरुष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरसो हस्तेनोर्द्ध्वग्रहणं। ततउखामध्ये आदित्यं गर्भमिति उपधानं ततो नित्ये। ततउत्तरपूर्वकोणे ऽश्वस्य शिर उपदधाति वातस्य जूतिमिति मं-
त्रेण। ततो नित्ये। ततो दक्षिणापूर्वकोणे गोशिर उपदधाति। अजस्रमिन्दुमिति। ततो नित्ये। ततो ऽपरकोणे अवेशिर उपदधाति वरूत्रीं त्व-
ष्टुरिति मंत्रेण॥ ततो नित्ये ततो दक्षिणाऽपरकोणे ऽजस्य शिर उपदधाति यो ऽअग्निरिति। ततो नित्ये। सर्वाणि शिरांसि प्रत्यङ्मुखान्यु-
त्तानि चोपधीयन्ते ततआज्यं स्रुवं संस्कृत्य पुरुषशिरसि द्वे आज्याहुती स्रुवेण जुहोति॥ विश्वदेवानामित्यर्द्धर्चेन प्रथमां। आप्राद्यावेति द्वि-
तीयार्द्धर्चेन द्वितीयां। इदं सूर्यायेति द्वयोस्त्यागः॥ ततस्तीर्थेन वहिर्वेदि दक्षिणस्यां दिशि गत्वोदङ्मुखस्तिष्ठन्नुत्सर्गसंज्ञकैर्मंत्रैः शि-
रांस्यध्यर्द्धेनोपतिष्ठते॥ इमं मा हिंसीर्द्विपादमिति पुरुषस्य शिरः प्रथममुपतिष्ठते। ततइमं मा हिंसीरेकशफमित्यश्वस्य। ततइमं हिं-
साहस्रमिति गोः ततइमसमूर्णायुमित्यवेः। ततो अजो ह्यग्नेरजस्य केचिदात्ममध्ये स्थिता एवोखां परिक्रम्य परिक्रम्यैभिरेव मंत्रैः शिरसामुप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यानंकुर्वंति॥ तत्रप्रत्युपस्थानक्रमायाः परिक्रमणंतत्रैवं॥ प्रथमप्राङ्मुखंपरिक्रम्यप्राङ्मुखः पुरुषशिरः उपस्थाय प्रदक्षिणंपरिक्रम्याश्वशि
रः समीपेस्थित्वाद्युपस्थायपुनः प्रदक्षिणंपरिक्रम्यगोःशिरः समीपेस्थित्वाद्युपस्थायततोऽप्रदक्षिणंपरिक्रम्यावेः शिरः समीपेस्थित्वाद्युपस्था
य॰ततः प्रदक्षिणंपरिक्रम्याऽजशिरः समीपेस्थित्वातदुपतिष्ठतइति॥ अथवापुरुषशिरउपधायसन्निधौस्थित्वापुरुषस्योपस्थानंततो
ऽश्वशिरउपधायतत्समीपेस्थित्वातस्योपस्थानं। एवंसर्वेषां। ततोवहिर्वेदेः सकाशात्तीर्थसमीपेआगात्यत्वंयविष्ठेतिमंत्रेणचित्यस्योप
स्थानंकरोति॥ आत्मनश्चस्थित्वास्योपस्थानपक्षेपिचित्यस्योपस्थानंभवति॥ केचिदेकस्मिन्नेवशिरसिसर्वमंत्रान्प्रयुज्यते॥ तत्पक्षेतस्मि
न्नेकस्मिं [redacted] शिरसिपंचकृत्वः सप्तसप्ताहिरण्यशल्प्रासनं॥ ततस्तस्यसहस्रदाऽस्युदग्रहणं॥ आदित्यंगर्भमितिपुरुषोपधानमंत्रेणो
पधानं। अश्वाद्युपधानमंत्रैः शिरसस्तस्मिन्स्तस्मिन्प्रदेशेअंगुल्यास्पर्शंकरोति॥ ततश्चित्रंदेवानामितिसूर्वेणाज्यहोति॥ सर्वमंत्रैरिमंमा॰

न्नेवाज॰२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का.स्.प ३२ हिथं नीरित्याग्रेत्त्पस्थानं। पंचशिरोवत्सभावे ऽजशिरसि सप्तानां हिरण्यशकलानां प्रासनं। यो अग्निरितिमध्ये ऽपधानं। नस्कवाहुति॥
ततो वहिर्वेदिगत्वो ऽदङ्मुखस्याऽजो ह्यग्नेरजनिष्टेत्युपस्थानं ऽखां परिक्रम्य॥ तत्रास्थितस्यैव वा। ततस्त्वं यविष्ठेति चित्यस्योपस्थानं
ततस्तीर्थेनाग्निमाहत्य अपरेणास्वयमातृण्णामागम्य सर्वासु दिक्ष्वन्तकांते पंच पंचापस्याऽपदधाति तत्र प्रथमं प्रागन्तकांते मुदङ्मु
खोपतिष्ठ पंचा ऽपस्या ऽन्नगामारभ्याभ्यास्तं ऽपदधाति। तत्र अपां त्वेमन्निति प्रथमं॥ अपां त्वोद्मन्निति द्वितीयां। अपां त्वाभस्मन्निति तृ
तीयां। अपां त्वाज्योतिषेति चतुर्थीम्॥ अपां त्वायनइति पंचमी। एतासां मध्यमा अन्तकस्योपर्युपधीयते। तामभितो द्वे अर्द्धपद्ये शे
षास्तिस्रः पद्याः। ततो नित्ये ततो दक्षिणातोन्तकांते पंचापस्याः पद्याः प्राङ्मुखऽपदधाति। पूर्वमारभ्या स्म संमुखं। तत्रार्णवेति प्रथमं॥ राम: ३९
समुद्रेत्वेति द्वितीयां। सरीरे त्वेति तृतीयां। अपां त्वाक्षयइति चतुर्थीं। अपां त्वा सधिषिति पंचमीं। नित्येच। ततः पश्चादन्तकांते दक्षिणामुखः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंचापस्यापद्या दक्षिणामारभ्याभ्यात्मप्रुपदधाति ॥ अपांत्वासदनइतिप्रथमां । अपांत्वासधस्थइतिद्वितीयां । अपांत्वायोनाविति तृतीयां
अपांत्वापुरीइतिचतुर्थीं । अपांत्वापाथइतिपंचमीं ॥ ॥ ततोनित्ये ॥ ततोऽन्तरतोऽनूकांतेपश्चिमाभिमुखः पंचा ःपस्याः पद्याअपर
मारभ्यप्राक्संस्थाऽपदधाति ॥ गायत्रेणेतिप्रथमां ॥ त्रैष्टुभेनेतिद्वितीयां ॥ जागतेनेतितृतीयां ॥ आनुष्टुभेनेतिचतुर्थीपांक्तेनेपंच
मीं ॥ ॥ ततोनित्येकरोति ॥ ततोव्याघारणहोमक्रमेणप्रथमंदक्षिणांसेततऽन्तरश्रोणिपां ॥ ततोदक्षिणश्रोण्यां ॥ ततऽन्तरेंसे ॥ त
तोमध्ये ॥ अनेनक्रमेणचतुर्दिक्षुमध्ये च दशदशप्राणभृतऽपदधाति । तत्रदक्षिणांसोत्तरश्रोणिपोरक्ष्णयादेशेप्राणभृ
तः प्राक्लक्षणाभवंति दक्षिणश्रोण्युत्तरांसयोरक्ष्णयादेशेचोदग्लक्षणाः । दक्षिणांसप्राणभृतांयादशमींस्वयमातृणासंलग्नासार्द्ध
पश्चाऽन्तरांसप्राणभृतांचयादशमीस्वयमातृणासंलग्नासातिरश्चालिखिताईपद्या । तथादक्षिणोत्तरश्रोणिपोर्येदशम्यौस्वयमातृण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

का॰सू॰प ४० संलग्नेते द्वे अपि पादेनेपादभागेनोनेप द्वे इत्यर्थः शेषाः। षट्चत्वारिंशत्मध्याएव भवंति। तत्र प्रथमं दक्षिणांसकोणादारभ्य प्राङ्मुख
उपविष्टएवोपसत्योपसत्य स्वयमातृणापर्यंतादशप्राणभृतउपदधाति। तत्रायंपुरोभुवइति प्रथमां॥ तस्य प्राणो भौवायनइति
द्वितीयां॥ वसंतइतितृतीयां॥ गायत्रीतिचतुर्थीं॥ गायत्र्याइतिपंचमीं॥ गायत्र्यादितिषष्ठीं। उपांशोरितिसप्तमीं॥ त्रिवृतइत्यष्टमीं॥
वसिष्ठइतिनवमीं॥ प्रजापतिर्गृहीतयेतिदशमींस्वयमातृणासहितामर्द्धपर्यां॥ ततः सकृन्निमेदशासु। ततउत्तरश्रोणेरारभ्यस्वय
मातृणापर्यंतंवशप्राणभृतः पश्चिमाभिमुखोपसत्योपसत्योपदधाति॥ अयंपश्चादितिप्रथमां॥ तस्यचक्षुरितिद्वितीयां॥ वर्षइति
तृतीयां॥ जगतीतिचतुर्थीं॥ जगत्याइतिपंचमीं॥ ऋक्समादितिषष्ठीं॥ शुक्रादितिसप्तमीं॥ सप्तदशादेकविंशमित्यष्टमीं॥ जमदग्निरिति राम: ४०
नवमीं॥ प्रजापतिगृहीतयेदशमींस्वयमातृणासंलग्नांपादेनांपर्यां। ततः सर्वासुसकृन्निमे॥ ततो दक्षिणश्रोणेरारभ्यस्वयमातृणांया

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पट्टशाप्राग्भृतोदक्षिणामुखोपस्त्योपस्त्योपदधाति ॥ अयंदक्षिणाइतिप्रथमां ॥ तस्यमनइतिद्वितीयां । ग्रीष्मइतितृतीयां ॥ त्रिष्टु
वितिचतुर्थीं ॥ त्रिष्टुभइतिपंचमीं ॥ स्वरादितिषष्ठीं ॥ अंतर्यामादितिसप्तमीं ॥ पंचदशाद्बृहदितिअष्टमीं ॥ भरद्वाजइतिनवमीं ॥ प्रजापती
तिदशमीं ॥ स्वयमातृणासंलग्नांपादोनां ॥ ॥ ततःसर्वासुसक्रान्त्रित्ये ॥ ततउत्तरांसादारभ्यस्वयमातृणापर्यंतादशप्राग्भृतःउद
ङ्मुखोपविष्टस्त्वोपस्त्योपस्त्योपदधाति ॥ तत्रइदमुत्तरात्स्वरितिप्रथमां । तस्यश्रोत्रमितिद्वितीयां । शरदितितृतीयां । अनुष्टु
विति चतुर्थीं । अनुष्टुभइति पंचमीं । ऐडादितिषष्ठीं । मंथिनइतिसप्तमीं ॥ एकविंशाद्वैराजेत्यष्टमीं ॥ विश्वामित्रइतिनवमीं ॥ प्र
जापतीतिदशमीं ॥ प्राग्भृत्स्वयमातृण्णासंलग्नांतिरश्चालिखितामर्द्धपर्यां ॥ ततःसक्रान्त्रित्ये । एकेपुरुषमुपार्श्वपुरुषसमीपे
प्रथमांप्रथमाउपधायाश्नायादेशेकोणपर्यंतमुपधानंकुर्वंति ॥ ॥ अनश्वविकल्पः ॥ पुरुषादारभ्यकोणांतमुपधानं ॥ को

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णादारभ्य पुरुषां तं वेति ॥ एवं चतुर्विंशत्या देशेषु चत्वारिंशत्प्राणभृत उपहिताः ॥ ॥अथ वक्ष्याम दशारेतः सिग्वेलायां सर्वा सुदिक्षु पक्षीयं
ते ॥ तासां दशानां मध्ये चतुर्थ्यपि स्थाने पक्षपा यासील ग्ने द्वे द्वे ॥ एवमष्टौ ॥ पश्चादनूकमभितश्च द्वे ॥ एवं दश ॥ तत्रेयमुपरिमतिमंत्रेणारेतःसि
ग्भ्यामुत्तरां प्रथमामुदङ्मुख उपदधाति ॥ तस्यैवाङ्मात्रे तिरेतःसिग्भ्यां दक्षिणां द्वितीयां ॥ ततः प्रदक्षिणं सर्वा उपदधाति ॥ ततः प्राङु
पविश्य ॥ हेमंतस्तितनीयां ॥ पंक्तिरिति चतुर्थी ॥ ततो दक्षिणामुखः पंङ्क्ता इति पंचमी ॥ निधनवत इति षष्ठी ॥ आग्रयणादिति सप्त
मीं ॥ त्रिणवे त्वष्टमीं ॥ ततः प्रत्यङ्मुखो विश्वकर्मेति नवमीं ॥ प्रजापतौ तिदशमीं ॥ ततः परिक्रम्य सर्वासु सन्तन्निते ॥ इति प्रथमायांय
जुष्मतीनामुपधानं उक्तं ॥ अथ लोकं पृणानामुपधानमुच्यते ॥ तत्रात्म मध्ये षट्सप्ततिः पादमात्र ॥ अष्टाविंशतिरर्द्धपद्या ॥ नवशता
निचतुर्विंशत्यधिकानि पादभागाः ॥ एतावदात्मन्नुपधेयं ॥ तत्र पादमात्रीणामुपधानस्थानमुच्यते ॥ सर्वेषु कोणेषु प्राणभृत उपहिहिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संति॥ सर्वेष्वनूकांतेषु च मध्ये पंच पंचापस्याः। तेन तासां प्राणाभृदपस्यानामष्टौ अंतरालानि संति॥ तत्र सर्वेषु प्रा
णाभृदपस्यांतरालेषु षट् षट् पद्याः उपधेयाः॥ तासां षस्णां षस्णां पद्यानां मध्ये एकामर्द्धपद्यामुपदधाति॥ पूर्वस्यां
दिशि तु प्राणाभृदपस्यांतरालेयोः सप्त सप्त पद्या एवोपदधाति॥ यतस्तत्र पूर्वामपस्यामनूकामभितोर्द्धपद्ये
स्तः॥ अंसस्थयोः प्राणाभृतोः पश्चाद्वर्जमानयोः पद्यालोकयोः पद्यास्थाने द्वे द्वे अर्द्धपद्ये ऽदगायतेऽपदधाति॥
एवं च पूर्वपार्श्वे चतुर्दश पद्याऽपहिताः॥ अपरपार्श्वे च द्वादश॥ दक्षिणोत्तरयोरेकादशरेकादश॥ एवमत्रा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

का·सू·प ८२

चत्वारिंशात्पद्याऽपहिताः॥मात्मनः पूर्वार्द्धे अपस्यासंलग्ना द्वादश पद्याः प्रागन्तकमभितः प्राग्लक्षणाऽउपदधाति·
॥ ॥तथाषोडशापद्याः॥पश्चादपस्यांसंलग्ना एव प्रागन्तकमभितः प्राग्लक्षणाऽउपदधाति॥एवं
षट्सप्ततिःपद्याः पूर्णाः॥अर्द्धपद्यानां मध्ये दशानामुपधानं कृतम्॥शेषाणांस्थानमुच्यते॥विश्व
ज्योतिषमभितो द्वे अर्द्धपद्येऽउपधेये॥पश्चाद्विश्वज्योतिषवेलायांविश्वज्योतिषस्थानमभितो द्वे

राम ८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अर्द्धपद्येऽपधेये। तथाद्विपञ्जुषमभितो द्वेस्वर्द्धपद्ये एवं षडर्द्धपद्याः। पूर्वाभिर्दशभिः सहषोडशजाताः। द्विष्टानां द्वादशानां मध्ये पूर्वदक्षिणे
पुरुषेति स्रोर्द्धपद्याः। तत्रैकां द्वितीयां प्राणभृतमुत्तरेण प्रागायता। तामेव प्राणभृतमपरेण द्वे उदगायते। ततः पूर्वार्द्धया द्वादशपद्याः
उपहितास्तासां या दक्षिणा पश्चात्तां तत उद्धृत्य दक्षिणाश्रोण्यां द्वितीयां प्राणभृतं पूर्वेणोदकलक्षणामुपधायतस्याः पुरस्तात्तिस्रोर्द्धपद्या उ
दकलक्षणा उदगायता उपधेयाः। तत उत्तरापरे पुरुषे द्वितीयस्याः प्राणभृतः पूर्वेणाश्चतस्रोर्द्धपद्या उदगायता उपधेयाः। उत्तरपूर्वको(
णे च द्वे। तत्र च द्वितीयां प्राणभृतमपरेणैकामुदगायतां द्वितीयां प्राणभृतं दक्षिणेन प्रागायतां द्वितीयाः। एवं सर्वा अष्टार्द्धपद्या उपहि
ताः। शेषे आत्मस्युक्तसंख्याः। पादपागः आत्मनि चत्वारिंशतानि पद्यालोका भवंति तेषां मध्ये एकोनाशीतिर्लोकायजुष्मतीभिः पूरिताः।
सप्तदायपद्धतिकाराः। द्वादशानां अर्द्धपद्यानां पूर्वदक्षिणे पुरुषे अर्द्धपद्या उपधानं॥ दक्षिणापरे पंचानामुपधानं॥ उत्तरापरे च त

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वदे·प·का·उ· स्तोमानुपधानं ॥ पूर्वोत्तरे द्वे अर्द्धपद्ये ऽपधीयेते ॥ एकत्रिंशदधिकं शतद्वयंच पादभागानां कृतिपुरुषक्षिति विभागः ॥ इत्येवमात्मा पूर्णाः ॥ अ· ९७
४३ अथ पक्षपुच्छानां चयनमुच्यते ॥ तत्र दक्षिणे पक्षे षट्पंचाशत् ५६ पद्या अनुपधेयाः । तत्र वर्षीयस्यो वा ह्या इति न्यायेन पक्षस्य पार्श्वद्वि
षु सर्वेषु लोकेषु ३२ द्वात्रिंशत्पद्यानामेकां पंक्तिमुपधाय तदंतरतस्तत्संलग्नामेव द्वितीयां चतुर्विंशति २४ संख्यानां पद्यानां पंक्तिमु
पदध्यात् तत्रात्मसंधौ द्वितीयपंक्तावुभयत्र द्वौ द्वौ पद्यालोकौ परिशिष्येते ॥ तत्र पूर्वयोः पद्यालोकयोर्द्वे अर्द्धपद्ये ऽदगायते प्रथमं प
द्यापंक्तिसंलग्नेऽपधेये ॥ ननु अपरपार्श्वे द्वे ॥ पूर्वस्मिन्नेकाएवं कुतो न भवंति ॥ अपरपार्श्वापेक्षया पूर्वपार्श्वस्य बाह्यत्वात् । लोके पुरु
हस्तादामंतर्वहिर्भागव्यवहारवत् ॥ एवं सर्वत्र ज्ञेयं ॥ अपरयोः पद्यालोकयोर्मध्ये द्वितीये पंक्तिसंलग्ने पद्यालोके एकामर्द्धपद्यामुद राम:
गायतां प्रथमपद्यापंक्तिसंलग्नामुपदध्यात् ॥ एवं तिस्रोऽर्द्धपद्याः शेषं पंचाशदधिके द्वे शते पादभागाः । एवमेवोत्तरपक्षे । पुच्छे च पंचा ४३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शत्पद्याः। सप्तार्द्धपद्याः षट्विंशत्यधिकं शतद्वयं पादभागाः तत्र पृष्ठपार्श्वे सर्वतश्चिंशत्संख्यानां पद्यानं प्रथमां पंक्तिमुपधायपत्तदंतग
विंशतिसंख्यानां पद्यानां द्वितीयां पंक्तिमुपदध्यात्। द्वितीयायां पंक्तौ दक्षिणतउत्तरतश्चात्मसंनिहितास्त्रयःस्त्रयः पद्मालोकाः परिशि
ष्यंते।। तत्र दक्षिणे भुजे पद्यालोके भुजतिस्त्रोर्द्धपद्याः प्रागायताः प्रथमपंक्तिसंलग्नाउपधेयाः। द्वितीयपंक्तिसंलग्ने लोके चतुर्थोऽ
र्द्धपद्योपधेयाउत्तरे आत्मसंलग्ने पद्यालोकत्रये तिस्त्रोऽर्द्धपद्याः प्रागायताः प्रथमपद्यापंक्तिसंलग्नाउपधेयाः। शेषेऽक्तसंख्यापादभागा २२६
इतितदेवं प्रथमायां शतद्वयमष्टात्रिंशदधिकं लोकपृणाः पद्याः।। २३८ एकचत्वारिंशदर्द्धपद्याः ४१। सार्द्धद्वादशशतानि पादभागाः नि ४
१६५० एवमेकोनविंशतिशतान्येकोनत्रिंशदधिकानि भवंति। १९२९। गार्हपत्ये लोकंपृणाः प्रथमायामिष्टकत्वात्।। गार्हपत्यस्यैक
विंशतीतिलोकंपृणाः प्रथमायां गण्यंते।। तेन पंचाशदूनं सहस्रद्वयं संपद्यते। १९५०। द्विसाहस्री प्रथमा लोकंपृणानां पंचाशदूनेस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च.दे.प.का.उ. कृत्वादिति लोकंपृणानामुपधानस्थानमुक्तं॥ ॥अथोपधानप्रकारउच्यते॥ तत्र दक्षिणपूर्वकोणेप्रारभ्य तमपरेणपेद्वे अर्द्धपद्येते प्रथममुप
४४ धाय॥ ततः प्रदक्षिणमभ्यात्मं दशभिर्दशभिर्लोकंपृणानां प्रत्येकं त्वलीमुपधानं कृत्वा लोकंपृणाछिद्रं पृणोति मंत्रेणाभिमंत्र्य तेषादनं लोकंपृ
णामुनभवति॥ आसादनं चेतिनसादयमस्तत्रोह्येषइतिनिषेधात्॥ ततस्ताअस्येतिदशानामपिसद्दसोहसाधिवदनं एवंपूर्वप्रारभ्य द्यो
परलोकादारभ्य दक्षिणप्रारभ्य दवधिदीर्घाभिः प्रत्यकसंस्थपंक्तिभिर्बाह्यतः आरभ्याभ्यंतरमभ्यंतरमुपधानं कुर्वन् स्वयमातृणां या
वद्गच्छेत्। यस्याश्चायादेशस्य संनिधावुपधानं प्रथमत आरभ्यंतं लोकंपृणानामुपधानेन वह्नुअपेक्षितं तत्सर्वं देवभाष्ये द्रष्टव्यं सं
मुखं मर्यादाभूतं चाक्षायादेशं नातिक्रामेत्। एवमेवश्रोणपोरंतराले दक्षिणामुखउदक्संस्थपंक्तिभिः एवमेवोत्तरणताक्षायात्॥ आरभ्य एम:
प्रागन्तकमर्यादं प्रदक्षिणावाह्यतः। स्वयमातृणांयावदुदङ्मुखउपधाति अक्षायादेशं नातिःक्रामेत्॥ मुखंमर्यादाभूतंच॥ एवं प्र ४४

दक्षिणं यथायोगं सव्यवाहुमंतरं कुर्वन्नश्मात्मं चयनं कुर्वन्सर्वतो वहिः प्रदेशात्स्वयमातृण्णां प्रत्यागच्छन्पूर्वान्कमर्यादमुपधाय ततः
प्रत्यागत्य स्वयमातृण्णां मपरेणागत्वा प्रागन्तं दक्षिणेना क्ष्णायावधि कालोकंपृणावाह्यत आरभ्य दक्षिणसंस्थ पंक्तिभिः स्वयमातृण्णां
यावदुपधेयाः। तत आत्मसंधेरारभ्योदङ्मुखो दक्षिणसंस्थं प्रदक्षिणं स्वात्माभिमुख उपदधाति॥ पृष्ठे चात्मसंधेरारभ्य प्रत्यक्संस्थं
प्राङ्मुखः उत्तरपक्षे चात्मसंधेरारभ्योदक्संस्थं दक्षिणामुखो लोकंपृणानामुपधानं करोति। सर्वासु चितिषु लोकंपृणानामुपधानेऽय
मेवप्रकारः। ततश्चात्वाला पुरीषमाहृत्य इंद्रं विश्वा इति मंत्रेण गणिकं करोति ततस्तूष्णीं पूर्वमर्द्धान्तं कं छादयति॥ ततः प्रदक्षिणं सर्वमा
त्मानं प्रच्छादयति ततो दक्षिणं पक्षं॥ ततः पुच्छं॥ तत उत्तरपक्षं सर्व चितिषु पुरीषनिवाप एवमेव भवति। ततो वार्हत्साये न्यायाभिः सप्त
ऋग्भिः एश्वर्ड्ः पुरीषवतीं चितिमुपतिष्ठति केचिद्दशभिर्ग्भीरुपतिष्ठते तत्र वयं ते अद्येत्यष्टमी। केचिद्दशभिरुपतिष्ठते॥ तत्र वाऽध्या

दे॰ का॰ ५ यत्स्माग्निं पर्यंताग्निहूयस्थानं ॥ ॥अथ वचनो यत्तुक्तं किंचित्तुसंगा हुन्नाते ॥ ॥ उपसत्सु पौर्वाह्णिका उपसद अपराह्णिका उपसद्ध्वांतराले वय
४५ नं पुरीषनिवपनं च भवति ॥ उपसत्सु प्रत्यहं सायंकाले सूर्यस्यास्तमयात् पूर्वं अभ्यमग्निं परितास्त्रिः प्रदक्षिणां परिणीयत मभ्यं प्रागुदीच्यां दिश्युत्
सृज्य। तावत्सुतिपर्येति ॥ अध्वर्युः अप्रदक्षिणं त्रिः परितो गच्छति। एतदभ्यपरिणयनमाग्निनिधानं यावदसवति न ततऊर्ध्वं ॥ उपस
त्के प्रथमायामुपसदि द्वे चिती प्रथमा द्वितीये सपुरीषे चीयेते ॥ मध्यमायामुपसदि तृतीया चतुर्थी पंचम्यस्ति स्रोपिचित यः सपुरी
षाश्चीयंते विकर्षिप्यग्न्युत्कृष्टे षांतं च तृतीयायामुपसदि पंचगृहीतादिकर्म भवति ॥ षडुपसत्के सोमे प्रथमायामुपसदि सपु
रीषा प्रथमा। द्वितीयायामुपसदि सपुरीषा द्वितीया। तृतीयायां सपुरीषा तृतीया चितिः। चतुर्थ्यां सपुरीषा चतुर्थी। पंचम्यां सपु राम:
रीषा पंचमी। विकर्ष्यग्न्युत्थाप्रेषांतं च। षष्ठ्यां पंचगृहीतादिकर्म। द्वादशोपसत्के द्वादशाहादौ व्यत्यासे न चितिपुरीषे भवतः॥ ४५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथमायामुपसदि प्रथमा चितिः॥ द्वितीयायामुपसदि प्रथमायां पुरीषनिवापः॥ तृतीयायामुपसदि द्वितीया चितिरुपधीयते॥ च
तुर्थ्यामुपसदि द्वितीयचितौ पुरीषनिवापः॥ पंचम्यामुपसदि तृतीया चितिः। षष्ठ्यां तृतीयायां पुरीषनिवापः॥ सप्तम्यां चतुर्थी चिति
अष्टम्यां चतुर्थ्यां पुरीषनिवापः॥ नवम्यां पंचमी चितिः॥ दशम्यामुपसदि पंचम्यां चितौ पुरीषनिवापः॥ एकादश्यामुपसदि विकर्णीस्व
यमातृण्णोपधानायग्नेः प्रशंसत प्रैषांतं॥ द्वादश्यां पंचगृहीतादि। चतुर्मासोपसत्के भुक्तकृताप्यग्निचित्ते सत्रे द्वादशभिरुपसद्भिः प्रथ
मा चितिः। ततो द्वादशभिरहोभिः। प्रथमायां च पुरीषं॥ एवं द्वितीयादीनां पंचम्यां पुरीषमेकादशभिरहोभिः। एकादशे ह्नि विकर्ण्यादि
च॥ अत्राप्युत्तमायामुपसदि पंचगृहीतादिकर्म भवति त्रिसंवत्सरोपसत्के महातापश्चित सत्रे तिसृभिः षट्त्रिंशद्भिः उपसद्भिः प्रथ
मा चेतव्या। तिसृभिः षट्त्रिंशद्भिरेव प्रथमायां पुरीषनिवापः कार्यः॥ एवमेव द्वितीयादीनां॥ अत्राप्युत्तमायां पंचगृहीतादिकर्म॥ ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·५ पश्चिते सत्रे संवत्सरसुपसदो भवंति॥ तत्र प्रथमे मासे प्रथमा चितिः श्वेतधाः। द्वितीये मासे प्रथमायां पुरीषनिवापः। तृतीये मासे द्वितीया चितिः॥ च
४८ तुर्थे द्वितीयायां पुरीषनिवापः। पंचमे मासे तृतीया चितिः। षष्ठे मासे तृतीयायां पुरीषं॥ सप्तमे मासे चतुर्थी चितिः। अष्टमे चतुर्थ्यां पुरीषं।
नवमे मासे प्रथमे ह्नि पंचम्याश्चितेरसपत्ना विराजश्चोपधीयंते॥ ततः प्रत्यहमेकैका स्तोमभागा उपधीयंते॥ एवं नवमो मासः॥ ततो द
शमे मासे प्रत्यहमेकैकायां स्तोमभागायां पुरीषनिवापः क्रियते तत एकादशेन मासेन नाकसत्प्रभृति सर्वा पंचमी समाप्यते ततो द्वाद
शे मासि षड्विंशतिभिर्दिनैः पंचम्यां पुरीषनिवापः क्रियते एकोनत्रिंशत्तमे दिने विकर्ण्यग्न्युत्थापेषांतं क्रियते त्रिंशत्तमे दिने पंचग
हीतादि कर्म क्रियते॥ प्रातः सुत्यादि॥ प्रथमादिषु चतसृषु चितिषु पंचाशदूने द्वे द्वे सहस्रे लोकंपृणा उपधीयंते पंचम्यां चितौ त्रीणि राम:
सहस्राणि॥ तत्र पंचम्यामग्निं त्रिधा विभज्य मध्यमे भागे कृत्वा लिखिता लोकंपृणा उपधीयंते॥ दक्षिणोत्तरभागयोर्वक्रालिखिता उप ४८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धीयंते ॥ गार्हपत्यचितेरेकविंशतिसंख्यालोकंपृणाः प्रथमाचितिलोकंपृणामध्येगण्यंते धिष्ण्यसंबंधिन्योष्टासप्तति १८ लोकंपृ
णापंचम्यांचितौगण्यंते ॥ अथवा तृतीयायांचितौषट्त्रिंशत्कृतालोकंपृणाभवंति ॥ अन्यासुचतसृषुचितिषष्टादशाष्टादशाश्
तानि । अथवाऽपरिमितेष्टकोग्नेश्चेतव्यः ॥ अग्निमध्ये उक्तसंख्यातोन्यूनावा अधिकावायजुष्मत्योलोकंपृणाश्चभवंति प्रथमायांपं
चम्यांचमहत्याः इष्टकाः पश्चादुपधीयंते ॥ नपश्चोतो । अधिकप्रमाणाजंघामात्रप्रमाणाः ॥ अष्टौधिष्ण्या आहवनीयोगार्हपत्यश्चे
तिदशगणाः ॥ अस्माद्दशगणाधिकायाइष्टकाभवंतितासु एतद्दशगणोपधानानंतरंअनुदेशात्प्राक्ताअधिकाइष्टकामितोल्करेप्र
क्षिपेत् ॥ ॥ अथप्रकृतमुच्यते ॥ तत्रप्रथमाचितिरुक्ता ॥ अथद्वितीयचितिरुच्यते ॥ उपसत्केतस्मिन्नेवाहनिप्रथमायांपुरीषनिव
पनंसपुरीषायाः प्रथमायाउपस्थानंचकृत्वातदेवद्वितीयचितेरुपधानंकुर्यात् ॥ तत्रद्वितीयायांचितौसर्वासुदिक्षुरेतःसिग्वेलायामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे.का.ड
७

श्विनीरुपदधाति। तत्र पूर्वस्यां दिश्यनूकमुत्तरेण ततः सिस्वेलायां द्वितीये लोके प्रथमामाश्विनीं पथ्यां प्राग्लक्षणां ध्रुवक्षितेरिति मंत्रेण उदङ्मु
खउपदधाति॥ ॥ततो नित्ये॥ ततो दक्षिणस्यां दिश्यनूकं पूर्वेण द्वितीये लोके द्वे अर्द्धपथ्ये प्राणायतेतिरश्चालिखिते प्राङ्मुखउपदधाति॥
तयोर्मध्येया दक्षिणा सा द्वितीया आश्विनी। तस्याः कुलायिनीत्युपधानमंत्रः॥ ॥नित्ये च॥ याउत्तरा अर्द्धपथ्या सा पंचमी आश्विनी॥ ततो परस्यां
दिशि रेतः सिस्वेलायामनूकं दक्षिणेन द्वितीये लोके तृतीयामाश्विनीं पथ्यां दक्षिणामुखः स्वैर्दक्षैरित्युपदधाति॥ ॥नित्ये॥ ततउत्तरस्यां दि
शि रेतः सिस्वेलायामनूकमपरेण द्वितीये लोके चतुर्थीमाश्विनीं पथ्यां प्रत्यङ्मुखः पृथिव्याः पुरीषमित्युपदधाति॥ ॥नित्ये॥ ततः प्र
त्यागत्य दक्षिणामुत्तरेण पंचमीमर्द्धपथ्यामाश्विनीं प्राङ्मुखो ऽदित्यास्त्वेत्युपदधाति॥ ॥नित्ये॥ ततः पूर्वं प्रथमायामुपहितयो मध्यतयोरु
परि अत्रापि तथैव द्वे अनतव्ये पथ्ये अनूकमभितः भुकश्च भुविश्चेति मंत्रेण नराभिमुखो ऽग्नाय्यमुपदधाति॥ ॥नित्ये च पूर्ववत्करोति॥

राम:
७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततः पंच वैश्वदेवीरुपदधाति ॥ अथ माश्विन्या दक्षिणातः प्रथमां वैश्वदेवीं पद्यामुदङ्मुखः सजूरृतुभिः सजूर्देवैरिति मंत्रेणोपदधाति ॥
ततो निस्ये ॥ ततो द्वितीयामाश्विनीमपरेणाद्वितीयां वैश्वदेवीमर्द्धपद्यांतिरश्चालिखितां प्राङ्मुखस जूर्ऋतुभिः सजूर्वसुभिरिति मंत्रेणोप-
दधाति ॥ नित्यो ततोऽपरस्यां दिशि दक्षिणामुखआश्विनीमुत्तरेण तृतीयां वैश्वदेवीं पद्यां सजूर्ऋतुभिः सजूरुद्रैरित्युपदधाति ॥ ॥ ततो
नित्ये ॥ ततउत्तरतः प्रत्यङ्मुखः आश्विनीं पूर्वेण चतुर्थीं वैश्वदेवीं पद्यां सजूरृतुभिः सजूरादित्यैरित्युपदधाति· नित्ये । ततः प्रत्यागत्य दक्षि-
णां वैश्वदेवीमुत्तरेण पंचमीं वैश्वदेवीं अर्द्धपद्यांतिरश्चालिखितां प्रागायतां प्राङ्मुखः सजूरृतुभिः सजूर्विश्वैर्देवैरित्युपदधाति ॥ ॥ ततो नि-
त्ये ॥ ततः पंच प्राणभृतउपदधाति ॥ तत्र पूर्व वैश्वदेवितो दक्षिणां प्रथमां प्राणभृतं प्राणं मयीत्युपदधाति ॥ अपानं मइति दक्षिणां वैश्वदेवीमप-
रेणार्द्धपद्यांतिरश्चालिखितां द्वितीयां प्राणभृतउपदधाति ॥ ततोऽपरां वैश्वदेवीउत्तरतस्तृतीयां प्राणभृतं व्यानं मइत्युपदधाति ॥ ततउत्त

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे॰ का॰ ५ रांवैश्वदेवींपूर्वेणाचतुर्थींप्राणभृतंचक्षुर्मेऽर्वेत्युपदधाति॥ ततःप्रत्यागत्यदक्षिणामुत्तरेणार्द्धपथांतिरश्चालिखितांप्रागायतांपंचमींप्राण

४८ भृतंश्रोत्रंमेश्लोकयेत्युपदधाति। एतीष्टकंनित्येभवतः। एवमेवप्राणभृद्भ्योऽपस्याःपंचोपदधाति। पूर्वांप्राणभृतंदक्षिणेनप्रथमामः

पस्याममपःपिन्वेत्युपदधाति॥ ततोदक्षिणांप्राणभृतामपरेणद्वितीयामपस्यामर्द्धपथांतिरश्चालिखितांप्रागायतामुपदधातिओँषधी

र्जिन्वेतिततोपरांप्राणभृतमुत्तरेणतृतीयामपस्यांद्विपाद्वेत्युपदधाति। ततउत्तरांप्राणभृतंपूर्वेणाचतुर्थीमपस्यांचतुष्पात्पाहीत्युपद

धाति॥ ततःप्रत्यागत्यद्वितीयायाउत्तरतःपंचमीमपस्यांतिरश्चालिखितांमर्द्धपथांप्रागायतांदिवोवृष्टिमेरयेत्युपदधाति॥ अत्रापिएतीष्ट

कंनित्येभवतः॥ तथ्वचतुर्षुदिक्षुचतुष्कोणेषुपंचपंचवयस्याउपदधाति॥ पुरस्तात्दक्षिणतेचतस्रोवयस्याउपदधाति॥ अन्यासुदिक्षुपंचपंच राम॰

पुरस्ताच्चतुर्णांमध्येअनूकमभितोद्वेजंघामात्रौ। प्रथमचतुर्थेद्वेअर्द्धवर्द्धे। अन्यासुदिक्षुसर्वावयस्याअर्द्धमात्राः॥ तत्रप्रथमंपुरस्तादुदङ्मु ४८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वउपविष्टोत्तरामारभ्यात्मसंमुखमुपदधातिमूर्द्धावयइतिप्रथमां।क्षत्रंवयइतिद्वितीयां।विष्टंभोवयइतितृतीयां॥विश्वकर्मावयइतिच
तुर्थीं॥ ॥सक्रान्तित्वे॥ ततोदक्षिणेनूकांतेआङ्मुखः पूर्वामारभ्यप्रत्यकसंस्थापंचोपदधाति॥ वस्तोवयइतिप्रथमां।वृष्णिर्वयइति
द्वितीयां॥पुरुषोवयइतितृतीयां॥व्याघ्रोवयइतिचतुर्थीं॥सिंहोवयइतिपंचमी॥ ॥सक्रान्तित्वे॥ततउत्तरस्यांदिश्यनूकांतेपश्चि
माभिमुखोऽपरामारभ्य प्राकसंस्थाः पंचोपदधातिपष्ठवाड्वयइतिप्रथमा॥उक्षावयइतिद्वितीयां॥ऋषभोवयइतितृतीयां॥अ
इति ३ नड्वान्वयँचतुर्थीं॥धेनुर्वयइतिपंचमी॥ ॥सक्रान्तित्वे॥ततोऽपरस्यामनूकांतेदक्षिणाभिमुखः पंचवयस्यादक्षिणामारभ्योदकसंस्था
उपदधाति॥अविर्वयइतिप्रथमां।दित्यवाड्वयइतिद्वितीयां।पंचाविर्वयइतितृतीयां॥त्रिवत्सोवयइतिचतुर्थीं॥तुर्यवाड्वयइति
पंचमीं॥ ॥सक्रान्तित्वे॥ततोदक्षिणश्रोणेरारभ्यप्रथमावंश्योर्कंपणाउपदधाति॥प्रथमदक्षिणश्रोण्यांद्वेउपदधाति॥ततोदशद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे.प.ड
४९

शाप्रदक्षिणां पूर्वान्तां तं यावदुपधाय उत्पागम्य प्रागन्तं दक्षिणेन दक्षिणाश्रोणिपश्चाया देशं यावद्धवमुपदधाति॥ ततः पूर्ववदेव
पक्षपुच्छचयनं॥ ततः पुरीषनीवपनमीड्विश्वा इति॥ वार्द्धत्मायेति पुरीषवत्वा उपस्थानं च॥ द्वितीयायां लोकं पृणा उच्यंते॥
द्वितीयां चितौ दशसु कोणेषु दश जंघामात्रीरुपदधाति॥ चतस्र आत्मनश्चतुर्षु कोणेषु द्वे पक्षकोणयोः। द्वे पुच्छकोणयोः। एवं द
श। तथा सर्वासु दिक्षु वयस्या उपहिताः संति॥ ता वयस्या अभित उभयपार्श्वे एकैकामर्द्धां। तत एकैकां त्रिग्राहिणीं भवतः॥ तत
एकैकां जंघामात्रीं। द्वे अर्द्धे। एताः षट्का यथोक्तक्रमेण उपदधाति॥ एताश्च दक्षिणात उत्तरतश्चोदगायता उदग्लक्षणाश्च॥ पु
रस्तात्पश्चाच्च प्रागायताः प्राग्लक्षणाश्च॥ ॥तत्र दक्षिणोत्तरपक्षसंधौ॥ उपहितयोर्द्वयोर्द्वयोस्त्रिग्राहिण्योः षडंगुलानि पक्षयोर्म राम:
ध्ये उपधीयंते तथा पुच्छस्योभयोः पार्श्वयोः पंचानां पंचानां त्रिग्राहिणीनां मध्ये ये द्वे त्रिग्राहिण्यौ आत्मसंलग्ने उपधीयेते॥ तयोः षडंगुला ४९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मात्मन्युपधीयं। तयोर्द्विग्राहिण्योः पुरस्तादक्ष्णि द्वे जंघामात्र्यावुपधीयते॥ सर्वतस्त्वेकैकामध्यर्धां द्विग्राहिणीमित्यस्या द्विग्राहिण्याः॰
स्थाने। तथा पुरस्तात्पश्च तयोर्द्विग्राहिण्योः स्थाने जंघामात्र्यावेवोपधेये॥ अतः पुरस्तात्पश्चाञ्चायमिष्टकानां क्रमः॥ अभितो वयस्याः स
र्वत एकैकामध्यर्धां जंघामात्रीं जंघामात्रीमध्यर्धां चेति॥ तथा पक्षपुच्छपार्श्वेषु पंचपंच द्विग्राहिणीरुपदधाति पक्षपुच्छेष्वेव कोणो
पहितजंघामात्र्यंतरालेषु सप्तसप्ताध्यर्धाउदगायताउपदधाति॥ त्रिग्राहिण्योपि पक्षयोरुदगायताः॥ पुच्छे च प्रागायताः। ततोऽव
शिष्टे आत्मनि चतुर्विंशति पद्याः द्वादशार्द्धपद्याः। षट्पंचाशदधिकानि नवशतानि पादभागाः। चत्वारोर्द्धपादभागानां। एतावदात्म
न्युपधेयं॥ तत्र चतुर्विंशति पद्याः समं विभज्य प्रतिपुरुषं षट्षडुपधेयाः। ताश्च वर्षीयसो पाह्या इत्यनेन न्यायेन पुरुषाणां बाह्य
कोणेषूपधेयाः। द्वादशार्द्धपद्या अपि विभज्य प्रतिपुरुषंतिस्रस्तिस्रउपधेयाः। तत्र पद्यानामर्द्धपद्यानां च प्रतिपुरुषस्थान॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे.प.उ उच्यते। तत्र पूर्वयोः पुरुषयोः पश्चार्द्धपश्यानामुपधानं कुर्वतः। पक्षसंधिर्नातिक्रमणीयः। आत्मनः पूर्वभागस्य पक्षान्तर्वर्त्तिभागापेक्षया
५० बाह्यस्योपधानस्यस्थानस्यसंभवात्॥ तत्र पूर्वदक्षिणपुरुषे कोणे पहितजंघामात्रीं संलग्नामेकांपश्यां॥ प्राग्लक्षणामुपधाय तस्याउ
त्तरतो ऽपरतश्च शेषाः पश्याः उपधेयाः। उत्तरतस्तिस्रः प्राग्लक्षणा तासामुत्तरतो द्वे अर्द्धपश्ये प्रागायते उपधेये त्रिग्राहिणीस्थानोप
हितजंघामात्र्युत्तरांतसमे॥ अपरतश्च द्वे उदग्लक्षणे पश्ये। तयोः पश्चादेकार्द्धपश्योदगायतोपधेया जंघामात्र्यपरांतसमा दक्षि
णापरपुरुषे च कोणे पहितजंघामात्री कोणासंलग्नामेकांपश्यामुदग्लक्षणामुपधाय तस्याः पुरस्तादुत्तरतश्च शेषाः पश्या उपधी
यंते पुरस्तात्तिस्रः पश्या उदग्लक्षणा तासां पुरस्ताद्द्वे अर्द्धपश्ये उदग्लक्षणे त्रिग्राहिणी पूर्वांतसमे उत्तरतश्च द्वे पश्ये प्राग्लक्षणे तयो रामः
रुत्तरत एकार्द्धपश्या प्राग्लक्षणा जंघामात्री स्थानोपहितजंघामात्र्युत्तरांतसमा। तथोत्तरापरकोणेपि कोणोपहितजंघामात्री कोण ५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संलग्नामेकांपद्यांप्राग्लक्षणामुपधाय तस्याः पुरस्ताद्दक्षिणतश्चद्वेषापद्याविभज्योपधेयाः पुरस्तात्तिस्रउदग्लक्षणाः पद्याः तासांपुर
स्ताद्द्वेअर्द्धपद्येत्र्यिग्राहिणी पूर्वांतसमे॥ दक्षिणतश्चद्वेपद्येप्राक्लक्षणेतयोर्दक्षिणएका अर्द्धपद्याप्रागायतांजंघामात्रीस्थानोप
हितजंघामात्रीदक्षिणांतसमा॥ तथाउत्तरपूर्वकोणेचकोणोपहितजंघामात्रीकोणसंलग्नामेकांपद्यामुदग्लक्षणामुपधायतस्या
दक्षिणतपश्चाच्चशेषाः पद्याउपधेयाः दक्षिणतस्तिस्रप्राग्लक्षणाः पद्याः। तासांदक्षिणतोद्वेअर्द्धपद्येप्रागायतेत्र्यिग्राहिणीस्थानोप
हितजंघामात्र्यादक्षिणांतसमे॥ पश्चाच्चद्वेपद्येउदक्लक्षणे। तयोः पश्चादेकार्द्धपद्याउदक्लक्षणाजंघामात्र्यपरांतसमा। एवंप्रति
पुरुषंषट्षट्पद्यास्तिस्रस्तिस्रोर्द्धपद्याश्चोपहिताः॥ ॥तथा॥परयोःपुरुषयोःपद्यार्द्धपद्यानामुपधानेजंघामात्रीस्थानोपहिताजं
घामात्रीनातिक्रमणीया। सार्द्धपद्यालोकद्वयातिक्रमणेनवर्षीयस्यानांपद्यानामुपधानप्रसंगात्॥ ॥तथा॥अर्द्धपादभागानामति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे·का·ड सूक्ष्मत्वात् आत्ममध्येऽउपधानं। तेषां च प्रतिपुरुषमेकैकस्योपधानं समविभागेन न संभवति लोकभेदप्रपत्तेः अतः पूर्वभागापेक्षया अ
५१ परभागस्याभ्यंतरत्वादपरयोः पुरुषयोर्विभज्य द्वौ द्वौ प्रागायतावर्द्धपादभागावुपधेयौ द्वावुदगायतौ॥ शेषे आत्मभागे षट्पंचाश
दधिकानि नवशतानि पादभागाउपधेयाः। तत्रापरयोः पुरुषयोर्द्वात्रिंशत् द्वात्रिंशत् सार्द्धाः पद्यालोकाम्हतीभिर्व्याप्ताः पूर्वयोः पु
रुषयोः पादोनास्त्रयस्त्रिंशत्त्रयस्त्रिंशत्॥ प्रतिपुरुषं च षट् षट् मादमा अस्ति स्वोर्द्धपद्याः एकोनचत्वारिंशे चशते पादभागानाउपधेये.
अपरयोर्द्वौ द्वावर्द्धपादभागावधिकौ। तदेवं द्वितीयायामष्टाचत्वारिंशत्पद्यालोकायजुष्मतीभिर्व्याप्ताः त्रिंशत्पद्यार्द्धपद्याभिः। शतद्वय
मेकोनचत्वारिंशदधिकं पादभागैः षट्त्रिंशदष्टकीभिः पंचचत्वारिंशत्त्रियाहिणीजंघामात्रीभिः॥ सार्द्ध एकः प्रकृत्त्रियाहिणीभ्यां अ राम:
र्द्धौ लोकश्चतुर्भिरर्द्धपादभागैरिति एवमात्मनि चत्वारिंशतानि पद्यालोकाः पूरिताः॥ ॥अथ पक्षपुच्छचयनमुच्यते॥ तत्र द्वान ५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्यधिकं शतद्वयं पादभागाः। एकार्द्धपद्या। एतावद्वयोः पुच्छपक्षयोरुपधेयं॥ तत्र पूर्वापरपक्षयोः पंच पंच त्रिग्राहिण्य उपहिताः को
णयोर्जंघामात्र्यौः। तयोरंतराले दक्षिणपार्श्वे सप्तार्धपर्व्वाः। मध्ये सर्व्वे च पादभागाः दक्षिणे पक्षे पूर्वदक्षिणकोणोपहितजंघामात्र्या
वायव्यकोणसंलग्नोदगायतैकार्द्धपद्योपधेया उत्तरपक्षे चैशानकोणोपहितजंघामात्र्या नैर्ऋतकोणसंलग्नोदगायतार्द्धपद्योपधेया।
पक्षे विंशत्यधिकं शतं पद्यालोका भवंति॥ तेषां च त्रिंशच्छ्लोका दशभिस्त्रिग्राहिणीभिर्व्याप्ताः पंचदशलोका जंघामात्र्यर्द्धाभिः। त्रि
सप्ततिर्लोकाः पादभागे। सार्द्ध एको लोक आत्मत्रिग्राहिणीभ्यां अर्द्धलोकोऽर्द्धपद्यया एवं विंशत्यधिकशतलोकाः पूरिताः अत्र प्रतिपक्षं
षट्चत्वारिंशत्सार्द्धाः पद्यालोका महतीभिर्व्याप्ताः। पादभागे रर्द्धपद्ययाचावशिष्टव्याप्तिरिति संप्रदायः। पंचषष्ट्यधिकं शतद्वयं पा
दभागाः द्वौ अर्द्धपादभागौ एतावत्पुच्छेऽपधेयं॥ तत्र दक्षिणोत्तरपार्श्वयोः पंच पंच त्रिग्राहिण्यः कोणयोर्जंघामात्र्यौ तयोरंतराले पश्चि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मपार्श्वे सप्त ध्वजाः। मध्ये पादभागाः। अर्द्धपादभागाः। अर्द्धपादभागौ च अनन्तकमुत्तरतो मध्ये श्चात्मसंलग्नौ अपरान्तकावयस्योत्तरार्द्ध सं-
लग्नाऽपधेयौ॥ दक्षिणभागापेक्षयोत्तरभागस्याभ्यंतरत्वात्॥ उत्तरतश्चात्वालादीनां यज्ञांगानां विद्यमानत्वात्॥ पुच्छे च दशाधिकं श-
तं पश्चालोका भवंति॥ तेषां चाष्टाविंशतिः सार्द्धा दशभिस्त्रिंशाहिताभिः पूरिताः पंचदशलोकाजंघामात्रध्वजाभिः। सपादाः षट्षष्टिर्लो-
काः पादभागैरर्द्धपादभागाभ्यामिति॥ अत्र च सार्द्धास्त्रिचत्वारिंशत्पश्चालोका महतीभिर्ध्वजाभिः॥ पादभागार्द्धपादभागाभिरवशिष्टाभि-
र्भिरिति संप्रदायः। तदेवं द्वितीयायां द्वाविंशतिर्लोकं पणं जंघामात्रः। २२। चतुस्त्रिंशत्त्रिशाहितपः। ३४। पंचचत्वारिंशद्ध्वजाः। ४५। च-
तुर्विंशतिपश्चाः। २४। चतुर्दशार्द्धपश्चाः। १४। षडर्द्धपादभागाः। ६। अष्टादशशतानि पंचाधिकानि पादभागाः। १८०५। एवं पंचाशद्धूनं स- रामः
हस्रद्वयं संपूर्णं। १९५०। अपराह्णे सतानूनपात्तुं बुनतप्रदानं। ततः सायंप्रवर्ग्योपसदौ। उपास्तमयमग्नीक्षेत्रं परितो ध्वजैर्यथोक्तमभ्युप ५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रिणयनं त्रिप्रदक्षिणं। ईशानदिश्युत्सर्गः। त्रिरेवाप्रदक्षिणं परिगमनं॥ वाग्वंधप्रैषादियथोक्तं॥ भस्मोद्वपनसमिदाधानेन भवतः। चितिप्र
वर्ग्योपसदां दैवान्मनुष्याद्वा कालातिक्रमेप्यध्वपरिणयनवाग्वंधविसर्जनान्यूपास्तमयमेव कार्याणि॥ व्रतप्रदानमपि स्वकाल एव,
भवति॥ एतेषां स्वकालातिक्रमो न कार्यः। नाप्यत्रक्रमनियमश्च॥ संवत्सरदीक्षापक्षे प्रतिपदि द्विस्तनं व्रतकरणं॥ ततः प्रवर्ग्योपसदौ·
॥ ॥ततस्तृतीयाचितीनांचयनं॥ ततस्तृतीयायां चितौ आत्ममध्ये स्वयमातृण्णां पूर्वोक्तलक्षणां प्राङ्गुत्व इंद्राग्नी अव्यथमानामिति
मंत्रेणोपदधाति॥ ॥ततोनिसे॥ ततो यजमानो भुव इति व्याहृत्यां साम गायति। ततो रेतःसिग्वेलायां सर्वासु दिक्षु अनूकस्योपरि पंच
दिश्या उपदधाति दक्षिणस्यां दिश्यनूकस्योपर्येकस्मिन्यालोके द्वे ऽर्धपद्ये प्रागायते दक्षिणोत्तरे इति रश्मालिविते द्वितीयापंचम्यो दि-
श्यौ अन्यासु दिक्षु तिस्रोपि दिश्याः पश्चादेवत त्रप्रथममुदङ्मुखो राज्ञसीति पूर्वानूके हिरण्यामुपदधाति· ततोनिसे· ततो दक्षिणस्यां दिशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·ड प्राङ्मुखो दक्षिणां दिश्या मर्द्धपर्यां विराडसीत्युपदधाति॥ ॥ततो नित्ये॥ ततो दक्षिणामुखः सम्राडसीति पश्चात्॥ ततो नित्ये॥ स्वराडसी
५३ त्युत्तरां प्रत्यङ्मुखः॥ ॥ततो नित्ये॥ प्रत्यागत्य प्राङ्मुखो दक्षिणामुत्तरेण पंचमीमर्द्धपद्यामधिपत्न्यसीति॥ ततो नित्ये॥ ततोऽध्वर्युर्वि
श्वकर्मा त्वेति मंत्रेण पूर्वस्यां विश्वज्योतिषमुपरि यजमानकृतां द्वितीयां विश्वज्योतिषमुपदधाति॥ ततो नित्ये॥ ततऽदङ्मुखऽपविश्य
द्वितीयायामुपहृतयोऋतव्ययोः पुरीषछन्नयोरुपर्यवकानिधाय द्वेऋतव्ये अर्द्धोत्सेधे पश्चे प्राक्लक्षणे अनूकमभितोऽध्यात्ममुप
दधाति। नभश्च नभस्यश्चेति मंत्रेण॥ ततोऽवकाभिऋतव्ये प्रच्छाद्य नित्ये कृत्वा पुनरपि तथाविधे एव द्वेऋतव्ये तयोरुपर्यवदधाति॥
इषश्चोर्ज्जश्चेति मंत्रेण.ततो नित्ये॥ ततः आत्मनः पूर्वार्द्धे दश प्राणभृतः पश्चाभ नूकमभितः पंचपंचोपदधाति॥ ततउदङ्मुख आयुर्मे राम:
पाहीति प्रथमामुत्तरामुपदधाति। ततोऽध्यात्मं दक्षिणसंस्था दक्षिणतोऽपस्त्योऽपस्त्योपदधाति। प्राणं मइति द्वितीयां। अपानं मइति ५३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयां। व्यानं मऽइति चतुर्थीं। चक्षुर्मे पाहीति पंचमी। श्रोत्रं मे पाहीति षष्ठीं। वाचं मे पिन्वेति सप्तमीं। मनो मे जिन्वेत्यष्टमीं। आत्मानं मे पाही
ति नवमीं॥ ज्योतिर्मे यच्छेति दशमीं॥ ॥ततः सकृन्निते॥ ततो दक्षिणापक्षसंधौ॥ द्वादश छंदस्या अनूकमभितः षट् षट् उपदधाति.
तासां मध्ये मध्यमानष्टौ लोकानभितो द्वे ऽर्धपद्ये शेषा दशपद्याः। एवमेव द्वादश छंदस्याः। पश्चात्पुच्छसंधौ॥ वालखिल्यानामुपधा-
नस्थानं परिशिष्य॥ ततः पूर्वास्तत्संलग्नाः एवमेव द्वादशोत्तरपक्षसंधावनूकमभितः। एवं छंदस्यानामुपधानस्थानमुक्त्वा अधुनो-
पधानमुच्यते॥ तत्र दक्षिणातः पूर्वाभिमुखोपविष्टः पूर्वामारभ्याभ्यात्ममुपदधाति। मा छंद इति प्रथमां पद्यां। प्रमा छंद इति द्वितीयाम
र्धपद्यां। अतो शेषा पद्याः। प्रतिमेति तृतीयां। अस्त्रीवय इति चतुर्थीं। पंक्तिरिति पंचमीं॥ उष्णिगिति षष्ठीं। बृहतीति सप्तमीं। अनुष्टुबि
त्यष्टमीं॥ विराडिति नवमीं। गायत्रीति दशमीं। त्रिष्टुबित्यर्धपद्यामेकादशीं। जगतीति द्वादशीं पद्यां। सकृन्निते। एताः सर्वाः उदक्लक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

दे॰का गाः। ततोऽपरस्यां दिशि दक्षिणाभिमुखो दक्षिणामारभ्य द्वादशछंदस्या अध्यात्ममुपदधाति॥ पृथिवी छंद इति प्रथमां। अंतरिक्षमिति द्वितीया
५४ मर्द्धपद्यां द्यौरिति तृतीयां। समा इति चतुर्थीं। नक्षत्राणीति पंचमीं॥ वागिति षष्ठीं॥ मन इति सप्तमीं॥ कृषिरित्यष्टमीं॥ हिरण्यमिति
नवमीं। गौरिति दशमीं। अजा इत्येकादशीमर्द्धपद्यां॥ अश्व इति द्वादशीं पद्यां॥ ॥सकृत्त्रिस्ते॥ एताः सर्वाः प्राक्लक्षणाः। ततउदीच्यां दि
शि प्रत्यङ्मुखोऽपरामारभ्य प्राक्संस्था द्वादशछंदस्या उपदधाति॥ अग्निर्देवतेति प्रथमां पद्यां। वात इति द्वितीयां अर्द्धपद्यां। सूर्य इति
तृतीयां॥ चंद्रमा इति चतुर्थीं। वसव इति पंचमीं। रुद्रा इति षष्ठीं। आदित्या इति सप्तमीं। मरुत इत्यष्टमीं। विश्वे इति नवमीं। बृहस्प
तिरिति दशमीं। इंद्र इत्येकादशीमर्द्धपद्यां॥ वरुण इति द्वादशीं पद्यां॥ ॥ततः सकृत्त्रिस्ते॥ एताः सर्वा उदक्लक्षणाः॥ ततः प्राणभृ गम:
तं पश्चात्सप्तवालखिल्याः प्राक्लक्षणा उपदधाति॥ तासां मध्यमां चतुर्थीं स्रुवकस्योपर्युपधाय तामभितो द्वे अर्द्धपद्ये। शेषाः पंचप ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाः। ततोदङ्मुखउत्तरमारभ्य दक्षिणसंस्थाउपदधाति॥ मूर्द्धासि राडिति प्रथमां॥ ध्रुवासीति द्वितीयां। धर्त्र्यसीति तृतीयामङ्गपद्यां॥ आयुषे
त्वेति चतुर्थीमनूकांपद्यां। वर्चसेति पंचमीमङ्गपद्यां। कृष्यैत्वेति षष्ठीं। क्षेमायत्वेति सप्तमीं। सक्तन्नित्ये। ततोऽपरस्यां दिशि पुच्छसंधौ छं
दस्यानांपश्चात्सप्तमे वालखिल्याः प्राक्लक्षणाः पद्या दक्षिणमुखो दक्षिणमारभ्य उदक्संस्थाउपदधाति। यन्त्री राडिति प्रथमां। यं
त्र्यसीति द्वितीयां॥ ध्रुवासीति तृतीयां॥ इषेत्वेति चतुर्थीमनूकस्योपर्युपहितां। ऊर्जेत्वेति पंचमीं रय्यैत्वेति षष्ठीं॥ पोषाय त्वेति सप्तमीं।
सक्तन्नित्ये॥ अत्र तृतीयायां चितौ शाखान्तरविहिताश्विनीरीवज्रिणपायायजुष्मतीश्चोपदधाति॥ यदितासामुपधानस्यानमंत्रादिकं जा
नाति। ततउत्तरश्रोणेरारभ्य दक्षिणंपूर्वानूकांतं यावत्प्रथमचितिसुक्तप्रकारेण लोकंपृणाउपदधाति। ततः प्रत्यागत्य प्रागनूकस्य द॰
क्षिणत आरभ्योत्तरश्रोणिपक्षायादेशपर्यंतं लोकंपृणाशेषमुपदधाति॥ ततो दक्षिणपक्षपुच्छोत्तरपक्षे॥ ततद्वंद्वं विश्वाज्योतिपूर्ववत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·ड रीषनिवापः॥ वार्चहत्या ये त्वुपस्थानं च। अथ तृतीयां चितौ लोकंपृणानां विवेको लिख्यते॥ तृतीयायां प्रथमचितिवल्लोकंपृणानां चयनं भव
५५ ति॥ ॥तत्र विशेष उच्यते॥ अर्द्धपद्याः षोडशैव॥ नाष्टाविंशतिः॥ पद्या। प्रथमावत्। षट्सप्ततिरेव। चतुर्धात्मको गौणएकैकाब्रहती॥
साच दक्षिणांसेऽन्तरश्रोण्यां चप्राक्लक्षणा। उत्तरे सं दक्षिणश्रोण्यां चोदक्लक्षणा॥ ॥अथ षट्सप्ततिसंख्यानां पद्यानां स्थानमुच्यते॥
प्रथमायां येषु येषु लोकेषु प्राणभृत उपहितास्तेषु तेषु स्थानेषु तृतीयायां लोकंपृणाः पद्या उपधीयन्ते॥ तत्र चतुर्थ्याभ्यायादेशेषु सप्तप
द्या उपधेयाः कुतः। दशानां दशानां स्थानानां मध्ये द्वयोर्द्वयोः स्थानयोः सर्वत्र बृहतीभिरुद्धत्वात्॥ दशमीनां चतुर्णामपि स्थानानामेकै
कस्य पादभागस्य स्वयमातृण्णयारुद्धत्वेन पद्यानामुपधानाऽसंभवात्॥ अतः सप्तसप्तैव स्थानान्यष्टायादेशेष्ववशिष्यन्ते॥ ॥तथा॥ रामः
रेतःसिग्वेलायामष्टौ पादमात्र्य उपधेयाः। कुतः। पश्चादनुक्रममभितो द्वयोः स्थानयोरर्द्धपद्याद्वयसहितया परदिश्यया प्रुरुद्धत्वात्॥ एवं ५५

षड्त्रिंशदुपहिताः॥ तथा सर्वत्र बृहती संलग्ने द्वितीये लोके बृहत्या अंतर्वर्त्तिकोणमभितो द्वे द्वे पद्ये बृहतीसंसृष्टे एवोपधेये। एवंताऽ
ष्टौभवंति। पूर्वाभिः सहचतुश्चत्वारिंशत्। तथा पश्चाच्छंदस्या अभितस्त्वैकैका पद्या अर्द्धपद्यया सहिता॥ तत्र पूर्वछंदस्याअभितः संसृष्टेप्रा
गायते अर्द्धपद्ये उपधाय तद्बहिः पद्ये उपधेये॥ तथा दक्षिणस्यां दिशि छंदस्यानां पुरस्तात्पश्चाच्च द्वे द्वे पद्ये सार्द्धे उपधेये॥ एवमेवोत्तर
स्यांच अत्राप्यर्द्धपद्ये छंदस्या संलग्ने उदगायते अर्द्धपद्यात्तो बहिः पद्याः एवं छंदस्यानां परितो दशपद्या उपहिताः पूर्वाभिः सहचतुःपंचा
शत्॥ तथा प्राणभृतां दक्षिणतउत्तरतश्च तिस्रः तिस्रः पद्या उपधीयंते। एवं ताः षट्॥ वालखिल्यानां दक्षिणतउत्तरतश्च तथा पश्चात्त
स्रः। पद्या उपधीयंते॥ अपरस्यां दिशि वालखिल्यानामभितः सार्द्धाश्चतस्रश्चतस्र इति विशेषः। तत्राप्यर्द्धपद्ये वालखिल्याः संलग्ने
पद्या बाह्यतः॥ एवं ताः षोडशाः पूर्वाभिः षड्भिः सह द्वाविंशतिः चतुःपंचाशच्च पूर्वाः ताभिः सह षट्सप्ततिः॥ ॥अथ षोडशानां अर्द्ध

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

पद्यानां विवेकउच्यते। पश्चाद्छंदस्या अभितो द्वे॥ दक्षिणोत्तरछंदस्यो अभितश्च द्वे द्वे॥ पश्चाद्वालखिल्याभितश्च द्वे एवं ताष्टौ। चतसृषुदिक्षु
दिश्या अभितो द्वे द्वे॥ एवं ताऽअष्टौ। पूर्वाभिः सह षोडश॥ दक्षिणायां दिशि प्रागायतयोरर्द्धपद्ययोर्द्दिश्योः पुरस्तात्पश्चाच्चार्द्धपद्येऽदगायते.
एवमुत्तरतश्चोदगायते॥ पूर्वापरयोः प्रागायते। तृतीयायां विश्वज्योतिषमभितः पश्चात्तद्वेलायां चार्द्धपद्येन भवत्येव। शेषे आत्मभागेच
तुश्चत्वारिंशदधिकानि नवशतानि पादभागाऽउपधीयंते॥ अत्रचतुःषष्टिः पद्यालोकायज्ञमतीभिर्व्याप्ताः। द्वानवतिर्लोकाः पद्या बृहती
भिरष्टावर्द्धपद्याभिः। षट्त्रिंशत्यधिकं शतद्वयं पादभागैरिति। अत्राऽपरयोः पुरुषयोः श्चत्वारिंशच्चत्वारिंशत्पादाधिकालोकामहतीभिर्व्या
प्ताः॥ तयोरेकोनचत्वारिंशत्छतद्वयं प्रतिपुरुषं पादभागाऽउपधेयाः। पूर्वयोः पुरुषयोः पादेनाद्वाचत्वारिंशद्द्वाचत्वारिंशलोकामहृ॰
तीभिर्व्याप्ताः॥ तयोस्त्रयस्त्रिंशदधिकं शतद्वयं पादभागाऽउपयत्रोपधेयाः॥ ॥इत्यात्मापूरिताः॥ पक्षपुच्छवयनं प्रथमावदेव॥ ॥इयां॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्कविशेषः॥ तिस्रस्तिस्रोऽर्द्धपद्याऽकृत्य तासां स्थानेऽजट् षट्पादभागानुपदध्यात्॥ ॥पक्षयोश्चयनं॥ प्रथमावत्॥ पुच्छे च सप्तानामर्द्ध-
पद्यानां मध्ये आत्मसंलग्ने दक्षिणोत्तरे द्वेऽर्द्धरत्नीये॥ यस्मिन्यथालोके द्वेस्तः स्तस्मिंश्चोकाद्वयोरुत्तरामुद्धरेत् सा तृतीया॥ अन्यत्सर्वं
प्रथमावत्॥ तदेवं तृतीयाया मध्यात्रिंशदधिकं शतद्वयं लोकंपृणाः पद्याः॥ २२८ ॥विंशतिरर्द्धपद्याः। २० । चतस्रो हृद्गतः। अष्टा
शीत्यधिकानि षोडशशतानि पादभागाः॥ १६८८ ॥ एवं पंचाशदूनं सहस्रद्वयं भवति॥ ॥इति तृतीया समाप्ता॥ ॥अथ चतुर्थी
चितिरुच्यते॥ तत्र प्रतिदिशमनूकांतेषु दक्षिणोत्तरे द्वे द्वे यजुष्मत्योः ऽपदधाति॥ पुरस्तादनूकमभितो द्वे जंघामात्र्यौ। पश्चाच्चानूकम-
भितो जंघामात्र्यावेव। दक्षिणतश्चानूकांते ऽनूकस्योपर्येकाऽदक्लक्षणा पद्या॥ तस्या उत्तरतो द्वितीया पद्यैव। उत्तरतश्चानूकांते ऽनू-
कस्योपर्येका पद्या तस्या दक्षिणतो द्वितीया पद्या॥ तथा पूर्वयोर्जंघामात्र्योः पश्चाच्चतुर्द्दशार्द्धपद्या अनूकमभितः सप्त सप्त भागाय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे.का.ड
५७
ताः प्राग्लक्षणा उपधेयाः। तासामर्द्धपद्यानां पश्चान्नव षट्पद्याः प्राक्लक्षणा अनूकमभितस्तिस्रस्तिस्र उपधेयाः॥ ॥अथ चतुर्दशानां षण्णां च
विकल्पेन स्थानांतरे उपधानस्यानमुच्यते॥ तत्रैके आचार्याः पूर्वं दक्षिणे कोणे जंघामात्र्यादीनामंतरतश्चतुर्दशार्द्धपद्या उपधायतदंत
रतः षट्पद्या उपदधाति। तत्र दक्षिणांसोपहितजंघामात्र्याः दीनामंतरतश्चतुर्दशार्द्धपद्या उपधायतदंतरतः षट्पद्या उपदधाति॥ त
त्र दक्षिणांसोपहितजंघामात्र्याः पश्चात्संलग्ना या अध्यर्द्धा तस्या उत्तरतो नवार्द्धपद्याः प्रागायताः प्राक्लक्षणा उपधेयाः॥ द्वितीयामध्य
र्द्धजंघामात्रीं चोत्तरेणैवं चार्द्धपद्या उदगायता उदक्लक्षणा उपधेयाः॥ एवं चतुर्दशार्द्धपद्या उपधायतदंतरतस्तत्संलग्नाः षट्प
द्या उपधीयंते। ताश्च नवानामर्द्धपद्यानामधश्चान्तस्थाः प्राक्लक्षणाः। पंचानामुत्तरतो द्वे उदक्लक्षणे॥ अथवा दक्षिणांसां दिद्यपनूकां
राम:
५७
तोपहितांश्यां दक्षिणोत्तराभ्यां पद्याभ्यामुत्तरतश्चतुर्दशार्द्धपद्या अभिता अनूकमुपधाय॥ तासामुत्तरतः षट्पद्या अप्यनूकमभि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तएवोपधेयाः॥ एवमुपधानस्यानुक्रममुक्त्वेदानीं क्रमेण विधिवदुपधानमुच्यते॥ तत्रप्रथमं पुरस्तादुदङ्मुखः पूर्वयोर्मध्ये उत्तरां जं
घामात्रीआश्रस्त्रिवृदितिमंत्रेणोपदधाति। ततोनित्ये ततोऽपरस्यांदिशि दक्षिणामुखोऽपरयोर्जंघामात्रो मध्ये दक्षिणामुपदधाति धरु
णइति मंत्रेण॥ ॥ततोनित्ये॥ ततो दक्षिणस्यां दिशि प्राङ्मुखो दक्षिणयोः पश्चयोर्मध्ये भांतइति दक्षिणां पश्चामुपदधाति॥ नित्येच॥
ततउत्तरस्यां दिशि प्रत्यङ्मुखो दक्षिणोत्तरयोः पश्चयोर्मध्ये व्योमासप्तदशइति दक्षिणां पश्चामुपदधाति॥ ॥ततोनित्ये॥ ततउदङ्मुख
उत्तरामारभ्यदक्षिणासंस्थाश्चतुर्दशार्द्धपश्चाउपदधाति॥ प्रतूर्त्तिरष्टादशइति प्रथमां॥ तपइति द्वितीयां॥ अभीवर्त्तइति तृतीयां॥ व
र्चइति चतुर्थीं॥ संभरणइति पंचमीं॥ योनिरितिषष्ठीं॥ गर्भाइति सप्तमीं॥ ओजइत्यष्टमीं॥ क्रतुरितिनवमीं॥ प्रतिष्ठइतिदशमीं॥ ब्रध्नस्य
त्येकादशीं॥ नाकइतिद्वादशीं॥ विवर्त्तइतित्रयोदशीं॥ धर्त्रश्चतुष्टोम इति चतुर्दशीमिति॥ ॥सकृन्नित्ये॥ ततः पूर्वयोर्मध्ये दक्षिणां जं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घामाद्यौमग्नेर्भागोसीत्युपदधाति॥ ततोपरयोर्मध्येऽन्तरां जं घामाद्यौं मित्रस्य भागोसीत्युपदधाति॥ ततोदक्षिणयोर्मध्येऽन्तरांपथ्यांनृचक्षसामि॰
त्युपदधाति॥ ततउत्तरयोर्मध्येऽन्तरांपथ्यामिंद्रस्यभागइत्युपदधाति॥ ॥प्रतीष्टकंनित्येकरोति॥ ततउदङ्मुखउत्तरएमारभ्यदक्षिणासंस्था
षट्पद्याउपदधाति॥ वसूनांभागोसीतिप्रथमां॥ आदित्यानामितिद्वितीयां॥ अदित्याइतितृतीयां॥ देवस्येतिचतुर्थीं॥ यवानामितिपंचमीं॰
ऋभूणामितिषष्ठीं॥ ॥ततःसकृन्नित्ये॥ ततःपूर्ववद्वेदेतत्येउपदधातिसहस्रस्यसहस्रश्चेतिमंत्रेण॥ नित्येच पूर्ववदेव॥ ततः सर्वासु
दिक्षुरेतःसिग्वेलायांसप्तदशस्त्रष्टीरुपदधाति॥ प्रतिदिशंचतस्रश्चतस्रः दक्षिणतःपंच। तत्रमध्यमाअन्तकस्योपरि॥ तामभितोद्वेअद्वेप
श्चे। शेषाःपंचदशपद्याः। अन्यासुदिक्ष्वन्तकमभितोद्वेद्वे॥ तत्रपूर्वासामुत्तरतआरभ्यप्रदक्षिणंसर्वाउपदधाति॥ ततःपुरस्तादुदङ्मुख
एकयास्तुवतेतिप्रथमां॥ तिसृभिरितिद्वितीयां॥ पंचभिरितितृतीयां॥ सप्तभिरितिचतुर्थीं॥ ततःप्राङ्मुखोदक्षिणाःपंचोपदधाति॥ नव॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भिरिति पंचमीं ॥ एकादशभिरिति षष्ठीमर्द्धपद्यां ॥ त्रयोदशभिरिति सप्तमीं परापद्यामनूक्यां ॥ पंचदशभिरित्यष्टमीमर्द्धपद्यां ॥ सप्तदशभि
रिति नवमीं ॥ ततो दक्षिणामुखोऽश्वस्ततस्थः ॥ नवदशभिरिति दशमीं । एकविंशत्येमेकादशीं । त्रयोविंशत्येति द्वादशीं ॥ पंचविंशत्येति त्रयोदशीं ॥
ततः प्रत्यङ्मुखऽउत्तराऽउपदधाति ॥ सप्तविꣳशत्येति चतुर्दशीं ॥ नवविꣳशत्येति पंचदशीं ॥ एकत्रिंशतेति षोडशीं ॥ त्रयस्त्रिंशतेति सप्त
दशीमिति ॥ ॥ ततः परीत्य सर्वासु सकृन्नित्ये ॥ ततऽउत्तरांसादारभ्य प्रागनूकोत्तरांसाऽक्षणायादेशांतराले लोकंपृणामभ्य पर्यंतमुपधा
यपश्चात्ये त्यप्रागनूकस्य दक्षिणात आरभ्य प्रदक्षिणमुत्तरांसाऽक्षणायादेशपर्यंतं पूर्ववदुपदधाति ॥ ततो दक्षिणापक्षपुच्छोत्तरपक्षेषु वपू
र्ववत्लोकंपृणाऽउपदधाति ॥ ततऽइंद्राग्नीऽइति पूर्ववत्पुरीषनिवपनं ॥ ततो वार्द्धहस्तयेति पुरीषवत्याश्चतुर्थ्याऽउपस्थानं च ॥ ॥ अथ
चतुर्थ्यां लोकंपृणानां विवेकऽउच्यते ॥ चतुर्थ्यां चितौ द्वितीयचितिवदेव लोकंपृणानामुपधानं भवति ॥ ॥ इष्टकासु विशेषः ॥ पक्षसंधोर्ये

दे॰का॰प
५९

दक्षिणोत्तरे पद्ये यजुष्मत्यौ उपहिते दक्षिणस्यां दिशि तयोः पद्ययोर्मध्ये दक्षिणस्याः पद्यायाः पुरस्तात्पश्चाच्च तस्त्वश्च तस्रोर्द्धपद्याऽदक्
लक्षणाऽउपधेयाः।ऽउत्तरस्यां चोत्तरस्याः पद्यायाः पुरस्तात्पश्चाच्च तस्त्वश्च तस्रोर्द्धपद्याऽउपधेयाः। तथा पुरस्तादन्त्कां तेये जंघामात्र्यौ
ऽउपहिते तयोर्दक्षिणतऽउत्तरश्चैकैकामध्यर्द्धां प्राक्लक्षणामुपदध्यात्॥ अपरस्यां दिश्यपि अन्त्कांतोपहितजंघामात्र्योर्दक्षिणतऽ
उत्तरश्चैकैकाध्यर्द्धा प्राक्लक्षणोपधेया॥ एवं सर्वासु दिक्षु वयस्यानां स्थानं दृष्टं॥ ततोऽभितो वयस्याः सर्वत एकैकामध्यर्द्धा
मित्यादि सर्वं द्वितीयावत्॥ तथा चतुर्द्दशानामर्द्धपद्यानां दक्षिणतऽउत्तरतश्च द्वे द्वे अर्द्धपद्ये प्राक्लक्षणे प्रागायतेऽउपधेये॥ तथा च
स्यां पद्यानां दक्षिणतऽउत्तरतश्च एकैका अर्द्धपद्या प्रागायताऽउपधेया॥ तथा दक्षिणश्रोण्यां जंघामात्री सन्निहितयोरध्यर्द्धयोः पुर
स्तादेकां बृहतीमुदक्लक्षणामुपधाय तस्याऽउत्तरतः संलग्नां प्रागायतां त्रिगाहिनीं चोपधाय त्रिगाहिण्याऽउत्तरत एकां प्राग्लक्षणां

रामः
५९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षांजंघामात्र्याः दर्विमुपदध्यात्॥ तथाऽङ्गारश्रोणीनामध्यर्द्धयोः पुरस्ताद्देकांद्व्यहतीं प्राग्लक्षणामुपधाय तस्माद्दक्षिणतः एतां त्रियाहिणीं
त्रियाहिण्या दक्षिणतो जंघामात्र्याः पुरस्तान्मध्यांशोपदधाति॥ शेषे आत्मभागे ९ षड्भधिकानि नवशतानि पादभागाउपधेयाः॥ चत्वारश्च
द्विपादभागाद्वितीयावत्॥ अत्र चतुर्थ्यां पूर्वयोः पुरुषयोश्चत्वारिंशत्पद्यालोकामहतीभिर्व्याप्ताः। अपरयोः पुरुषयोश्चत्वारिंशच्चत्वारिंश
त्पादभागान्यूनाः॥ पूर्वयोः पुरुषयोः पादभागानां चत्वारिंशदधिकं शतद्वयं पादभागाः प्रतिपुरुषमुपधेयाः। अपरयोः पुरुषयोर्द्वौ द्वावर्द्ध
पादभागावधिकौ॥ तत्र चतुश्चत्वारिंशत्पद्यालोकायत्तुम्प्रतीभिर्व्याप्ताः॥ एकादशार्द्धपद्याभिः॥ १० चत्वारिंशदधिकं शतद्वयं पादभागैः॥ १२
द्वाचत्वारिंशच्छ्लोका अध्यर्द्धाभिः॥ १ पंचचत्वारिंशच्छ्लोका जंघामात्रीपक्षसंधि त्रियाहिणीभिः॥ षोडशबृहती त्रियाहिणी पादमात्रीभिः सार्द्ध
एकोलोकः पुच्छत्रियाहिणीभ्यां॥ अर्द्धलोकश्चतुर्भिरर्द्धपादभागैरिति॥ एवं चत्वारिंशतान्यपि आत्मनि पद्यालोकाः पूरिताः। पक्षपुच्छमर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे॰का॰ड ६० णं द्वितीयावत्॥ अस्मिन्पक्षे चतुर्थ्यां चितौ द्वाविंशतिर्लोकंपृणा त्र्यंशामात्राः। २२। षड्त्रिंशत्त्रिशाहिणाः। ३६। एकोनपंचाशदर्धन्द्रौ ४९
चतुर्विंशतिरर्द्धपद्याः। २४। द्वेबृहत्यौ। २। द्वेपद्ये। २। षडर्द्धपादभागाः। ६। अष्टादशशतानि नवाधिकानि पादभागाः। १८०९। एवंपंचा
शद्भूनंसहस्रद्वयंलोकंपृणा भवंति। १९५०॥ ॥अथ चतुर्थ्यामेव चतुर्दशानां पक्षं चोत्तरवादक्षिणाभ्यामित्यस्मिन्पक्षे लोकंपृणासु
विशेष उच्यते॥ यदि चतुर्दशार्द्धपद्याः षट्पद्याश्च दक्षिणाभ्यां यजुष्मतीभ्यामुत्तरा उपधीयंते॥ तदा आत्मन उत्तरश्रोणौ उत्तरांसे
च बृहती त्रिशाहिणी पादमात्रीणामुपधानं कर्तव्यं॥ तत्र चोत्तरश्रोण्यां पूर्ववद्बृहतीमुपधाय तस्याः पुरस्तादुदगायतां त्रिशाहिणीं त्र्यं
शामात्रीसंलग्नां॥ तस्याः पुरस्तादुदकलक्षणां त्रिंशाहिणीसंस्पृष्टां पद्यां चोपदध्यात्॥ उत्तरांसे च पूर्वाभ्यर्द्धयोः पश्चादुदगग्रां बृहतीमु रामः ६०
पधाय तस्याः पश्चादुदगायतां त्रिशाहिणीं त्र्यंशामात्रीसंलग्नां॥ तस्याः पश्चादुदकलक्षणां पद्यां च त्रिशाहिणीसंस्पृष्टामुपदध्यात्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतावानेनवविशेषोन्यत्सर्वंपूर्ववत्॥ ॥अथपूर्वदक्षिणेऽवांतरदेश एकस्त्यास्मिन्पक्षेविशेषउच्यते॥ यदिचतुर्दशार्द्धपद्याः षड्
पद्याश्चाग्नेयकोणेऽपधीयंते॥ तदादक्षिणश्रोण्यांपूर्ववद्बृहतीमुदकलक्षणाऽपधायतस्याः पुरस्तादुदगायतां। जंघामात्रीसंस्पृष्टां
त्रियाहिणीमुपदधाति॥ तस्याः पुरस्तादुदगग्रांपर्यांत्रियाहिणीं संस्पृष्टामुपदधाति॥ उत्तरश्रोण्यंसयोश्च पूर्ववद्देवोभयत्रोपदधाति॥
तस्मिन्पक्षेचतुर्दशानामर्द्धपद्यानांषण्णांपद्यानांचाभितोयालोकंपृणा अर्द्धपद्याउक्तासाएकस्मिन्नेवात्मपूर्वपार्श्वेऽपधीयंते॥ द्वेचतु
र्दशानां॥ एकाषण्णां॥ आत्मपूर्वप्रदेशस्यबहिर्भागत्वात्॥ आसांचपादभागापेक्षयामहत्वात्॥ ततोस्यापूर्वदक्षिणपुरुषार्द्धयव
कोणस्यात् षड्विंशतिपादभागान्द्वयस्यापंचाशदर्द्धपादभागान्॥ यथायोगंप्रागायतानुदगायतांश्चविचार्योपदध्यात्॥ तेचपूर्व
दक्षिणस्यवायव्यकोणेतृतीयचतुर्थस्रक्त्योः पश्चात्चतुर्ष्वलोकेषु॥ तयोरेवस्रक्त्योः पुरस्ताद्द्वयोः॥ ज्ञातव्याभ्यांदक्षिणालोकस्याऽपरस्मिन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे॰का॰ड
६१

ऽर्द्धेच॥ एवंसार्द्धेषु षट्सु लोकेषु द्वापंचाशदर्द्धपादभागानामुपधानं॥ तेषांमध्येद्वादशोदगायताः शेषाः सर्वेप्रागायता इति॥ ॥इति
चतुर्थी॥ ॥अथपंचमीचितोच्यते॥ पंचम्यांचितौ प्रतिदिशंआत्मनः पार्श्वे असपत्नाउपदधाति॥ तत्रप्रागग्रकमुत्तरेणाद्वितीये लो
के पूर्वाशाग्रलक्षणा॥ दक्षिणातस्तिर्यगग्रकं पूर्वेणाद्वितीं लोके दक्षिणासपत्नो दग्लक्षणोपधेया॥ पश्चादग्रकं दक्षिणेनाद्वितीये
लोके ऽपरासपत्ना प्राग्लक्षणा॥ उत्तरस्यामग्रकमपरेणाद्वितीये लोके उत्तराऽसपत्नाऽदक्लक्षणा॥ दक्षिणाया असपत्नायाउत्त
रतोंतरापथालोकद्वयं संक्रान्ततीयेपथ्येलोके प्राग्लक्षणा पंचम्यासपत्ना॥ अस्याश्च पंचम्याः पुरीषवतीति संज्ञा॥ अग्नेःपुरीषम
सीति पुरीषशब्दवतामंत्रेणोपधानात्॥ अस्यास्तुतिछंदस्यापार्श्वांतरालेअतिछंदसऽपधानकालेपुरीषप्रक्षेपाद्वा। एताः सर्वा अ
पिपद्याः॥ ॥अथोपधानमुच्यते॥ तत्रप्रथमंपुरस्तात् दुदङ्मुखो ग्नेजातानितिपूर्वामसपत्नामुपदधाति॥ ततः पश्चाद्दक्षि

राम:
६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णाभिमुखः सहस्राज्ञानानित्य परामुपदधाति ॥ ततो दक्षिणातः प्राङ्मुखः षोडशी स्तोममिति दक्षिणां ॥ ततउत्तरतः प्रत्यङ्मुखश्चतुश्चत्वारिं
शस्तोमस्तुत्तरामसपत्नां ॥ ततः प्रत्येत्य प्राङ्मुखउदङ्मुखो वा पंचमीमसपत्नामग्नेः पुरीषमिति मंत्रेण प्राक्लक्षणामुपदधाति ॥ ॥
प्रतीष्टकं नित्ये ॥ ततः सर्वासु दिक्षु दश दश विराजोऽसपत्नासंलग्नाऽन्तकमभितोर्द्धाधिकयाऽसपत्नातो मध्यलोके षूपदधाति ॥ तत्र
पूर्वा दश विराजोर्द्धपद्याउदगायताऽग्निम्यो ऽपराः प्राक्लक्षणा अन्तकमभितः पंचपंचोपदधाति ॥ ॥ अन्यासु दिक्षु पद्या एव ॥
तत्र प्रथमं पुरस्ताउदङ्मुखउत्तरामारभ्यात्मदक्षिणा संस्था विराजाउपदधाति ॥ एवश्छंदः इति प्रथमां ॥ वरिवश्छंद इति द्वितीयां ॥
शंभूरिति तृतीयां ॥ परिभूरिति चतुर्थीं ॥ आच्छच्छंद इति पंचमीं ॥ मन इति षष्ठीं ॥ व्यच इति सप्तमीं ॥ सिंधूरित्यष्टमीं ॥ समुद्र इति नवमीं
सरिर इति दशमीं ॥ ॥ तत्रान्निन्ये ॥ ततो दक्षिणास्यां दिशि प्राङ्मुखः पूर्वामारभ्य प्रत्यक्संस्थाउदक्लक्षणा दश विराजउपदधाति ॥ क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·ऽ कुप्छंद इति प्रथमां ॥ त्रिककुप्स्वीति द्वितीयां ॥ काव्यमिति तृतीयां ॥ अंकुप इति चतुर्थीं ॥ अक्षरपंक्तिरिति पंचमीं ॥ पदपंक्तिरिति षष्ठीं ॥
६२ विष्टारपंक्तिरिति सप्तमीं । क्षुरो भ्रज इत्यष्टमीं ॥ आच्छच्छंद इति नवमीं ॥ प्रच्छच्छंद इति दशमीं ॥ ॥ततः सकृन्नित्ये ॥ ततोऽपरस्यां दिशि द
क्षिणाभिमुखो दक्षिणामारभ्योदक्संस्था प्राग्लक्षणा दश विराजोऽपदधाति ॥ संयच्छंद इति प्रथमां १ । वियच्छंद इति । २ । बृहदिति ।३।
रथंतरमिति । ४ । निकाय इति । ५ । विवध इति । ६ । गिरच्छंद । ७ । भ्रज इति । ८ । संष्टुबिति । ९ । अनुष्टुबिति दशमीं । १० ॥ ॥
सकृन्नित्ये ॥ ततउत्तरस्यां प्रत्यङ्मुखोऽपरांत आरभ्य प्राक्संस्था उदक्लक्षणा दश विराजोऽपदधाति । एवश्छंद इति प्रथमां । १ । व
रिव इति । २ । वयश्छंद इति । ३ । वयस्कृदिति । ४ । विष्पर्धा इति । ५ । विशालमिति । ६ । छदिरिति । ७ । दूरोहणमिति । ८ । तं राम:
द्रमिति । ९ । अंकांकं छंद इति दशमीं । १० ॥ ॥सकृन्नित्ये ॥ ततः सर्वासु दिक्षु अषाढावेलायां सोमभागा एकोनत्रिंशदुपदधाति ॥ ६२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रोत्तरस्मादंसैपश्या अनूकमभितश्चतस्रश्चतस्रः प्राग्लक्षणाः।पश्चादप्यंसौ तथैव॥ दक्षिणतः सप्त॥ तासां मध्यमा अनूकस्योपरि।
तामभितोर्द्धपश्ये॥ ॥शेषाः पंचपश्याः।सर्वाउदक्लक्षणाः।उत्तरत षड्उदक्लक्षणाः पश्या अनूकमभितस्तिस्रस्तिस्रः।तत्र पूर्वासां
या उत्तरांततआरभ्य प्रदक्षिणं सर्वाउपदधाति॥तत्र प्रथमं प्रदङ्मुखः पुरस्तादुपदधाति।रश्मिना सत्याये प्रथमां।१।प्रेतिनेति।२।अ
न्वित्येति।३।संधिनेति।४।प्रतिधिनेति।५।विष्टंभेनेति।६।प्रवयेति।७।अनुयेति।८।अष्टमीं॥ततः प्राङ्मुखो दक्षिणा प्र
त्यक्संस्थाउपदधाति॥उशिजेति।९।प्रकेतेनेति।१०।तंतुनेति।११।अर्द्धपश्यां।संसर्पेणेति।१२।मनूक्यां पश्यां।एडेने
ति।१३।अर्द्धपश्यां।अतऊर्ध्वं सर्वाः पश्याः उत्तमेनेति।१४।वयोधसेति।१५।ततो दक्षिणामुखो अपराउपदधाति॥अभिजिनेति॥
१६।प्रतिपदसीति।१७।अनुपदसि।१८।संपदसि।१९।तेजोसि।२०।त्रिवृदसि।२१।प्रवृदसि।२२।विवृदसि।२३।ततः प्रत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·उ ङ्मुखउत्तरतः सोमभागाः प्राक्संस्थाउपदधाति। सवृदसि। २४ ।आक्रमोसीति। २५ ।संक्रमोसि। २६ ।उत्क्रमोसि। २७ ।उत्क्रांतिरसि। २८ ।अधि

८३ पतिनोर्ज्जं। २९। वेषश्रीरितिमंत्रेण। ३०। त्रिंशत्तमीं। स्तोमभागामेके। उत्तरतउपदधाति॥ अस्मिन्पक्षे॥ उत्तरतः सप्त। तासांमध्यमामनूके॥ अ

नूक्यानभितश्चत्वेअर्द्धपद्ये इति विशेषः। ततः परीत्यसर्वासुसक्तन्नित्ये॥ ततः सर्वासुदिक्षुअतव्यावेलायांपूर्ववर्ज्जयित्वाअन्यासुदिक्षुअ

नूकस्योपर्यर्द्धेत्सेधाः पंचनाकसदउपदधाति॥ पूर्वानूक्‍ नूकस्योत्तरतोद्वितीयेलोके॥ दक्षिणस्यांदिशिअतव्यावेलायामनूकस्योपर्ये

कस्मिन्प्रथमलोके द्वेअर्द्धपद्ये दक्षिणोत्तरे प्रागायते अर्द्धेत्सेधेति रश्मालिखिते द्वितीयापंचम्योपधेये॥ अन्याः सर्वाअर्द्धेत्सेधाः पद्याः

पुरस्तात्पश्चाद्वप्राग्लक्षणो॥ उत्तरे उदग्लक्षणा॥ उपधानानंतरंनाकसदामुपरिपुरीषंनूत्नीमेवप्रक्षिप्यतासामुपर्यैवंविधापंचचूडाः राम:

पंचेष्टकाउपदधाति॥ ॥अथनाकसदामुपधानमुच्यते॥ प्रथमंपुरस्तादुदङ्मुखोराज्ञसीति पूर्वंनाकसदमुपदधाति॥ ततः प्राङ् ८३

मुखो दक्षिणां तिरश्चालिविताम र्द्धपर्यां विराडसि दक्षिणेति ॥ ततो दक्षिणामुखः संम्राडसीत्यपरामुपदधाति ॥ ततः प्रत्यङ्मुखः स्वराडसीत्यु-
त्तरामुपदधाति ॥ ततः प्रत्यागत्य प्राङ्मुखो दक्षिणामुत्तरेण पंचमी मर्द्धपर्यां तिरश्चालिविताम्धिपत्यसि मंत्रेणोपदधाति ॥ ॥प्रतीष्ट-
कं निम्येचकरोति ॥ ॥ततो नाकसदामुपरि नूत्नीं पुरीषं प्रक्षिप्य तासामुपरि पंचचूडा उपदधाति पूर्ववत् ॥ अयं पुरो हरिकेश इति पूर्वामु-
दङ्मुखः ॥ अयं दक्षिणा इति दक्षिणां द्वितीयां प्राङ्मुखः ॥ ततो ऽयमुत्तरादित्युत्तरां तृतीयां प्रत्यङ्मुखः ॥ ततो यमुपरीति दक्षिणामुत्तरे-
ण चतुर्थी मर्द्धपर्यां तिरश्चालिवितां ॥ ॥ततो ऽयं पश्चादित्यपरां पंचमीं ॥ ॥प्रतीष्टकं निम्ये ॥ एताः सर्वा मूर्द्धोत्से धा एव ॥ ततः पुरस्ता-
दत्र कांतेति स्त्रो गायत्रीरुपदधाति ॥ तासां मध्यमा अन्तके नाभिभितो द्वे ऽर्द्धपद्ये ॥ तत्रो दङ्मुख उत्तरां प्रथमामुपदधाति अग्निर्मूर्द्धेति ॥ १ ॥
अयमग्निरिति । २ । त्वामग्ने पुष्करेति ॥ ३ ॥ सक्तन्निन्ये ॥ ततः पुरस्ताद्वेतः सिग्वेलायां ति स्वास्त्रिष्टुभ उदङ्मुख उपदधाति ॥ आसांमध्यमा-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रौ॰१

अनूकेतामभितो द्वेस्वर्द्धपद्ये। तदँ दङ्मुखङत्तरां प्रथममुपदधाति भुवोयज्ञस्येति। १ ।अवोध्यग्निरिति। २ ।अवोचामेति। ३ ।सक्तन्निते। ततः पश्चा
ङेतः स्त्रिवेलायांतिस्त्रोजगतीरुपदधाति॥ अत्रापिमध्यमानूकेपद्या।तामभितो द्वे अर्द्धपद्ये॰ तत्र दक्षिणामुखः प्रथमं दक्षिणामुपदधात्ययमि
हेति॥ १ ॥जनस्यगोपाइति॥ २॥ त्वामग्ने अंगिरसदिति। ३ ।सक्तन्निसे॥ततस्तासांजगतीनांपश्चात्तिस्त्रोनुष्टुभस्तासु एव एवोपदधाति॥ ॥
मध्यमापद्या॥ तासामभितो द्वेअर्द्धपद्ये॥ दक्षिणामुखः प्रथमं दक्षिणामुपदधातिसखायइति॥ १ ॥ सं सं समिदिति॥ २ ॥त्वांचित्रमिति॥
।३ ॥सक्तन्निसे॥ततोअपरावेलायाःपुरस्तात्तिस्त्रोबृहतीरुदङ्मुखउपदधाति॥ मध्यमानूकेपद्या॥ तामभितो द्वेअर्द्धपद्ये॥तत्र प्रथ
ममुत्तराग्ने नावरस्तुपदधाति। १ ।विश्वस्य दूतममिति॥ २ ॥सद्रुद्रवदिति॥ ३॥ सक्तन्निसे॥ ततोगायत्रीभ्योपराति स्त्रउस्निहोर्द्धपद्या
त्तिरश्चालिखिताउदगायताउपदधाति॥ आसां मध्यमाश्चनूकस्योपरि। उदङ्मुखप्रथममुत्तरां अग्नेवाजस्येत्युपदधाति॥ १ ॥सद्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धानइति॥ २ ॥क्षयोएजन्निति॥ ३ ॥सक्तन्नित्ये॥ ततोबृहतीनां पुरस्तात्तिस्रः ककुभः प्राग्लक्षणाऽउपदधाति॥ आसांमध्यमापद्या अनूकस्योप
रि॥ तामभितो द्वेअर्द्धपद्ये॥ तत्रो दङ्मुखः प्रथमयुत्तरांभद्रोनो अग्निराहुतः सुभगभद्रो इति मंत्रेणोपदधाति॥ १ ॥भद्राऽतप्रशस्तयो भद्रं
मनः कृणष्वहृत्र तूर्ये। येनासमत्सु सासहेति॥ २ ॥येनासमत्सु सासहोतनुहि भूरिशर्द्धतां। वनेमाते अभिष्टिभिरिति॥ ३ ॥सक्तन्नित्ये॥ तं
कलाअप्येते मंत्राः प्रयोज्या इति कर्कः॥ भद्राणतिवृत्रतूर्ये वसिराइत्येतानि चत्वारि चत्वार्यक्षराणिऽऊह्यन्यवा॥ एताः सर्वाः गायत्र्याः याः क
कुप्पर्यंताः प्राग्लक्षणाः। अर्द्धपद्याश्चोष्णिकव्यतिरिक्ताः प्रागायताः। ततोदक्षिणेनूकांतेतिस्रः पंक्तीरुदग्लक्षणाः प्राङ्मुखः प्रत्यकसंस्थाऽउ
पदधाति॥ आसांमध्यमापद्या अनूकस्योपरि। तामभितो द्वेअर्द्धपद्येऽउदगायते॥ अग्नितमन्निति॥ १ ॥ सोअग्निरिति॥ २ ॥ऽउमेसुश्चंद्रेति॥
॥ ३ ॥सक्तन्नित्ये॥ ततऽउत्तरेऽनूकांतेतिस्रः पदपंक्तिरुदग्लक्षणाः प्रत्यङ्मुखः प्राकसंस्थाऽउपदधाति॥ तत्रमध्यमापद्याअनूके। तामभितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दे॰ का॰ ड
६५

द्वेष्टर्द्धपद्ये। तत्राग्ने तमद्येति॥ १॥ अधाह्यग्नेरिति॥ २॥ इभिर्न्नेइति॥ ३॥ सकृन्निवे॥ ततः पुरीषवत्याः पंचम्या असपत्नाया: पुरस्तादति छंदसं पद्यां प्रा
ग्लक्षणामुपदधाति॥ प्राङ्मुखउदङ्मुखोवा। भद्रारातिर्हि चतुर्थवस्थिराग्नि ॐ होतारंमन्ये दास्वंतमिति मंत्रेण॥ ॥ततोनिवे॥ अस्याउपधा
नात्पूर्वमेवा ऽसपत्ना ऽति छंदसोरंतराले पुरीषप्रक्षेपः॥ ततः पश्चादनक्तांतेति स्तोढिपदा दक्षिणामुखउदक संस्थाः प्राग्लक्षणा उपदधा
ति। आसांमध्यमाअनक्केपद्या। तामभितो द्वेस्वर्द्धपद्ये॥ सर्वाः प्राग्लक्षणाः। अग्नेत्वन्न इति॥ १॥ वसुरग्निरिति। २। तंत्वाशोचिष्ठेति। ३। स
कृन्निवे॥ ततआत्मनोमध्येअष्टेष्टकं गार्हपत्यपूर्ववदेवोपदधाति॥ ॥इयांस्तुविशेषः॥ ॥अर्द्धव्रहती तांस्थानेचतस्त्रोर्द्धपद्याः प्राग्ल
क्षणाः। पुरस्तात्पश्चाच्चद्वे द्वेति एच्चोदकलक्षणोपद्ये॥ तत्रप्रथमं दक्षिणातउदङ्मुखउपविश्योत्तरत आरम्भदक्षिणासंस्थाअर्द्धपद्या
उपदधाति॥ अयथ्ंसोअग्निरिति॥ १॥ अग्नेयन्नइति॥ २॥ अग्नेदिवइति। ३। पुरीष्यासइतिचतुर्थीं। ४। सकृन्निवे॥ ततो ऽपरेणपरीत्यो गः
६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्दक्षिणामुखोपविश्य।अपरयोर्मध्ये प्रथमं दक्षिणां पद्यां इडामग्न इत्युपदधाति॥ततउत्तरामयं ते योनिरिति॥ ६ ॥प्रतीष्टकं नित्ये॥तत
स्तेनैव पुनः परीत्योदङ्मुखः पूर्वयोरुत्तरां प्रथमं विदसीत्युपदधाति॥ ७ ॥ततः परिचिदसीति दक्षिणां॥ ८ ॥प्रतीष्टकं नित्ये॥एता
वषाढावप्यर्द्धेष्टेधाः।आसामुर्येवं विधास्त्वाष्टौ पुनश्चितीरुपदधाति॥अनेनैव प्रकारेण॥तत्रोदङ्मुखो येन मणयइति प्रथमामुत्तराम
र्द्धपद्यां। १ ।तं पत्नीभिरिति। २ ।आवाचइति। ३ ।अयमग्निरिति। ४ ।सकृन्नित्ये॥ततोऽपरेण परिक्रम्य दक्षिणामुखः पश्चिमयोर्द्दक्षि
णां संप्रच्यवध्वइति॥ १ ॥उदुध्यस्वेत्युत्तरां। २ ।प्रतीष्टकं नित्ये।ततस्तेनैव परीत्योदङ्मुखः प्रथमं पूर्वयोरुत्तरां येन वहसीत्युपदधा
ति॥ १ ॥ततो दक्षिणामयं ते योनिरिति॥ २ ॥प्रतीष्टकं नित्ये॥एता अपि चतस्रोर्द्धपद्याः प्राग्लक्षणाः।पुरस्तात्पश्चाच्च द्वे द्वे पद्ये उदक्
लक्षणे॥अषाढावप्यर्द्धेऽष्टेधा इति॥अथ गार्हपत्यस्य पुरस्तात्पश्चाच्च त्रिष्टुब्जगत्यंतरालेऽर्द्धपादभागानां प्रागायतामेकैकां पंक्तिमुपद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·का·ड ध्यात्॥ केचित्तु छन्दःसंधौ पुनश्चितिमुपधानं कुर्वंति। अस्मिन्पक्षे द्विपदास्तिस्रो द्वे विराजौ चैवमेता अष्टौ स्तेधाः॥ षट्पुनश्चितयश्च॥ पुरस्तात्द्वै
६८ पादमात्रौ उदकलक्षणोपूर्णोस्तेधे॥ अथवा गार्हपत्यं पुच्छसंधावुपधाय पूर्वान्नूक्तां तेपुनश्चितिमुपदध्यात्॥ अस्मिन्पक्षे गार्हपत्यादि
कं कुर्व्यर्यंताः॥ षट्पद्या लोका अष्टौ स्तेधाः॥ प्रथमतृतीययोरुत्तिहोरद्ध्मष्टौ स्तेधं॥ गार्हपत्ये च पूर्वे पादमात्रौ पूर्णौ स्तेधे। म
ध्ये एतासां स्थाने अष्टाचत्वारिंशदर्द्धपादभागानामुपधानं॥ विश्वज्योतिर्वेलायाः पार्श्वतउद्यत्यतेषां मध्ये अष्टावर्द्धपादभागा गार्हप
त्यपूर्वपादमात्रीभ्यां हृद्रस्थानानामष्टानां पादभागानां स्थाने संजाताः शेषाश्चत्वारिंशदधिका भवंति॥ तत्रार्द्धपादभागे विश्वज्यो
तिर्वेलांपूरयित्वा तस्याः पूर्वदक्षिणोत्तरपार्श्वेभ्यो शीतिमर्द्धपादभानुद्धत्य चत्वारिंशत्पादभागानुपदध्यात्॥ तथा च मध्यमे भागे अष्ट राम:
षष्ठ्यधिकानि त्रीणि शतान्यर्द्धपादभागाः षडधिकानि षट्शतानि पादभागा इति॥ मध्यमे भागे त्रैवचनुः सप्ततानि नव शतानि लोके ६८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परणः संख्यासंपद्यते॥ एवमाद्यन्तदण्डद्वयं॥ ततः पूर्वयोश्चितयोरुपरि पूर्ववदेव तपस्यश्चेत्यृतव्ये प्राग्लक्षणेऽपदधाति॥ ॥सद्गतिसैव
पूर्ववत्॥ ततः परमेष्ठी त्वेति मंत्रेण यजमानकृतां तृतीयां विश्वज्योतिषमुपदधाति॥ ॥त्रिष्टेष्वं प्रथमावत्॥ ततो दक्षिणांसात्पश्यालोक
द्वयं त्यक्त्वा तृतीयात्पश्यालोकादारभ्य प्रथमचितिवत् पुरदक्षिणां लोकं पृणाऽपदधाति॥ प्रागानूकपर्यंतं॥ ततः प्रत्यागत्य प्रागनूकं दक्षिणोनद
क्षिणांसदेशपश्यालोकद्वयपर्यंता अक्ष्णयावधिकाऽपधेयाः॥ ततः पक्षपुच्छेषु पूर्ववत्॥ ॥अथ पंचम्यां लोकंपृणानां विवेकोच्यते॥
तत्र पंचम्यां चितौ असपत्नान्तो मध्यलोकेषु विराजामुपधानपक्षेपूरणमुच्यते॥ पुच्छकोणयोरेकैकः पश्यालोकः अष्टौ लोका मध्ये वर्त्त-
माना आत्मनः पूर्वांतं यावत्। एतावान्मध्यमो भागः॥ अस्मिन्मध्यमेभागे सर्वा अक्ष्णयालिखिता इष्टकाऽपधेयाः॥ दक्षिणोत्तरभागयोः पक्ष
सहितयोर्वक्रालिखिताः। अत्र सर्वस्मिन्सपक्षपुच्छेऽग्निक्षेत्रे सप्तशतानि पंचाशदधिकानि पश्यालोकाः संति। तत्रैवं त्रिधा विभागे कृते प्रतिभागं पं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे॰का॰उ वाशदधिकंशतद्वयं पश्चालोका भवंतीति ज्ञेयं ॥ तत्रमध्यमे भागे चतुःसप्तत्यधिकानि पंच शतानि ऋज्वालिखिताः पादभागा उपधेयाः ॥ तथा चत्वा
६७ रिंशतानि ऋज्वालिखिता अर्द्धपादभागाः प्रागायताः ॥ ते च विभ्रज्योतिर्वेलायाः कोणेषु कैकं पादभागमुपधाय तेषां पादभागानां मध्ये उ
पहिते एष्टकाव्यतिरिक्ते देशे उपधेयाः ॥ तथा दक्षिणोत्तरभागयोरष्टात्रिंशदधिकान्यष्टावष्टौ शतानि वक्रालिखिताः पादभागा उपधीयंते ॥ विं
शत्यधिकं शतमर्द्धपादभागा वक्रालिखिता उत्तरे भागे ऋतव्याषाढावेलयोरुपधीयंते ॥ उत्तरे अषाढवेलायामंत्यौ पश्चालोकौ वर्जयित्वा
तयोर्हि पादभागानामेवोपधानं ॥ दक्षिणे भागे ऋतव्याषाढवेलयोः समग्रयोरपि षड्त्रिंशदधिकं शतं वक्रालिखिता अर्द्धपादभागा उपधीयं
ते ॥ उत्तरे भागे दक्षिणभागात्षोडशपादभागा अधिका उपधीयंते ॥ तेषां षोडशानां मध्ये अष्टौ अषाढवेलांत्ययोर्द्वयोः पश्चालोकयोरुप राम
धीयंते ॥ अष्टौ चास्यपत्या इति छंदसोः स्थाने ॥ उत्तरभागे तयोरभावात् ॥ दक्षिणे भागे उत्तरभागात्षोडशार्द्धपादभागा अधिकाः ॥ तेषां चाषा ६७

ष्टावेलांत्ययोः पश्चालोकयोरुपधानं कार्यमिति। पंचम्यामात्मनि सार्द्धमेकाधिकं शतं लोका यजुष्मतीभिर्व्याप्ताः। षडशीतिः पश्चालोका अर्द्धपादभा
गैः शेषाः पादभागैरिति॥ मध्यमे भागे पुरस्तात्पश्चाच्चया अषाढवेला सा स्तोमभागाभिर्व्याप्ताः। ऋतव्यावेलायां च पुरस्ताद्दृष्टानां लोकानां म
ध्ये नाकसद ऋतव्याभिश्च यो लोका व्याप्ताः॥ अतो नाकसदुत्तरतो द्वौ लोकौ॥ ऋतव्ययोर्द्दक्षिणातस्त्रयः। एवं पंच परिशिष्यंते ते तु पादभागा
एवोपधेयाः। यथा पश्चादृतव्यावेलाया मष्टानां लोकानां मध्ये एक एव लोकोपरस्यां नाकसदा व्याप्ताः॥ तं नाकसदमभितः सार्द्धास्त्रयस्त्रय लो
काः परिशिष्यंते॥ एवं ते सप्त लोका भवंति॥ तेष्वपि पादभागा एवोपधेयाः। एवं सर्वेषु मध्यमादिभागेषु प्रतिभागं चतुःसप्तत्यधिकानि नव श
तानि लोकंपृणा भवंति। प्रतिभागं च सहस्रसंख्या लोकंपृणा मृग्यंते॥ श्रुतौ तथा दृष्टत्वात्॥ ॥अथ पंचमीं चितिमुपधाय त्रेधाग्निं विमिमीते
समध्यमे वितृतीये सहस्रमन्वालिखिता इष्टका उपदधाति॥ ॥अथ सहस्रमित्यालिखिता दक्षिणात उपदधाति॥ ॥अथ सहस्रमित्यालि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नी१

खिताऽन्तरतऽपदधंति च ॥ त्रिसाहस्र्युत्तमेतिसूत्रकारवचनात्तु ॥ अतश्चप्रतिभागं कथं सहस्रसंख्या पूर्यत इति ॥ ऽच्यते ॥ द्वाभ्यां नाशीतिं चि-
त्ये चितिवचनाच्चित्येषु षट्सप्ततिर्लोकंपृणाऽपधीयंते ॥ ता अधीष्टी याऽत्तमायामिति वचनात्तं च म्यांगणंपते ॥ ततश्च चित्यासंवंधिन्यः
षट्विंशतिरुक्ता लिखिता मध्यमभागमध्ये गणनीयाः । षट्विंशतिः षड्विंशतिर्वक्ता लिखिता दक्षिणोत्तरभागयोर्गणनीया इत्येवं त्रि
ष्वपि भागेषु सहस्रं सहस्रं लोकंपृणाः संपद्यंते ॥ ततः इंद्रं विश्वा इति मंत्रेण चितिं प्रथमावत्पुरीषेणप्रच्छादयेत् ॥ ततः पुरीषेण प्रच्छादनानंत
रं आत्मनो मध्ये विकर्णी स्वयमातृण्णे दक्षिणोत्तरे शर्करे छिद्रयुक्तेऽदग्धुरवऽपदधाति ॥ तत्रयोप्यदश्व इति मंत्रेणोत्तरतः पृथमं विकर्णीम्-
पदधाति ॥ ततआपो ष्ट्वेति मंत्रेण दक्षिणतः स्वयमातृण्णामुपदधाति ॥ ततस्तयादेवतयांगिरस्वद्ध्रुवे सीतदमिति ॥ ॥ सप्तत्रिंसे ॥ ततो य
जमानः स्वयमातृण्णायां स्वरिति व्याहृतिसाम गायति ॥ ततोऽध्वर्युः पुरुषाभिहोमवत्निष्टन्हिरण्यशकलसहस्रेणाग्निं प्रोक्षति ॥ सहस्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·प·का·ड स्यपुमाऽसिइतिमंत्रेण ॥ ततउत्तरतोदक्षिणाभिमुखस्तिष्ठन्द्वाभ्यांशताभ्यांसहस्रस्यप्रतिमाऽसिइतिमंत्रेणउत्तरपार्श्वेप्रोक्षति ॥ ततःपु अ· १७
६२ रस्तात्प्रत्यङ्मुखस्तिष्ठन्सहस्रस्योन्मासीतिमंत्रेणपूर्वभागेद्वाभ्यांशताभ्यांप्रोक्षति ॥ ततःप्रत्यागत्यदक्षिणतउदङ्मुखस्तिष्ठन्सहस्रोसीति
मंत्रेणद्वाभ्यांशताभ्यांदक्षिणभागेग्निंतथैवप्रोक्षति ॥ ततःपुनरपिपश्चात्प्राङ्किष्ठन्सहस्रायत्वेतिप्रथमवत्पश्चात्प्रदेशेद्वाभ्यांशताभ्यांप्रो
क्षति ॥ एवंहिरण्यशकलसहस्रेणप्रोक्षितोभवति ॥ अत्रचकेवलैर्हिरण्यशकलैः प्रोक्षणासंभवादुदकवतिपूर्णपात्रेद्वेशतेहिरण्यशक
लानांप्रक्षिप्योदकमिश्रितैःप्रोक्षणंकर्त्तव्यं ॥ ❀ ॥ इतिश्रीसम्राट्स्थपतित्रिरग्निचिन्महायाज्ञिकश्रीप्रजापतिसुतेनयाज्ञिकदेवे-
नकृतायांकात्यायनसूत्रपद्धतौसप्तदशोध्यायः ॥ १७ ॥ ॥ शुभमस्तुसर्वजगताम् ॥ ॥ ॥ ॥ शुभम् ॥ ॥ रामः ६२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवयाज्ञिककृता

अग्निस्थापनपद्धतिः समाप्ता।

अक्षा ७

श्री ५ को सरकार
वाल्मीकि संस्कृत महाविद्यालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निष्टोम पद्धतिः

देवयाज्ञिककृता

श्री ५ को सरकार

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ श्रीगणेशाय नमः॥ ॥अथाग्निष्टोमस्य पद्धतिर्लिख्यते॥ ॥स्वकाले कृताधानस्य पूर्वं दर्शपूर्णमासाभ्यां यागः॥ तद
नन्तरं विकृतिभूता इष्टिपशुसोमयागा भवंति॥ ततः प्राक्॥ अग्निहोत्रहोमस्तु प्रागपि दर्शपूर्णमासाभ्यां भवत्येव॥ यजते
रेव निषेधात्॥ अग्निहोत्रांगभूता निमित्तिकास्त्विष्टयश्च भवंति॥ सोमयागार्थं संभृतधान्यघृतदक्षिणादि संभारस्य सोमया
गविकीर्षया सामयागसन्निधौ कृताधानस्य सोमयागात्पूर्व्वमेवाग्निहोत्र दर्शपूर्णमासादयो भवति॥ ततः पूर्वं पवमा
नाद्या इष्टयो दोर्वाह्मणपनिरासार्थं ऐन्द्राग्नः पशुश्च सोमात्पूर्वमपि भवति। तदर्थत्वात्। अग्निष्टोमादनंतरं पुनर्द्दर्श ‍१
पूर्णमासावनुष्ठायैवान्ये यागाः कर्त्तव्याः। ततः पूर्वं स्वकाले कृताधानस्याग्निष्टोमो वसंत एव भवति॥ सोमाधानपक्षेग्निष्टोम
स्य सतु नक्षत्रादिनियमो न भवति॥ यस्य यजमानस्य पित्रादि पितामहेभ्यो न वो भाभ्यां सोमयागः कृतो न भवति। तस्य तन्निमि
त्तदोर्वाह्मणपनिरासार्थं ऐंद्राग्नः। पशुर्भवति। सचारंभात्। आधानाद्वा पश्चाद्वपि वा तु चातुर्मास्येष्वप्येव वा॥ अनंतरं प्रयोक्तव्यो
दर्शाद्वाग्निष्टोमो वसंते यावज्जीवं प्रयोज्यः॥ सकृद्वा यदि कास्मिंश्चित् वसंते नुक्त्यादि संख्यांतरं करोतिति तदा तेनैव कृतार्थत्वान्।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्निष्टोमेनावस्थः पृथगनुष्ठेयः। नित्ये प्रयोग एव कामं पर्द्द वसंते च पौर्णिमास्याममावास्यायां वा यजनीयेहनि वा सोमयागस्य
मुख्यः कालः॥ तदनुगुणत्वेन दीक्षादिकल्पना यद्यपूर्वपक्षस्य प्रथमायां दीक्षा पंचम्यां सुत्या द्वितीयायां दीक्षा षष्ठ्यां सुत्ये
वमापूर्वपक्षसमाप्तेर्दीक्षासुत्येव भवतः। उदगयने पूर्वपक्षे वा सोमयागः समस्तस्य पूर्वपक्षे पुवा॥ इति बोधायनसूत्रे क्रदेव
स्वामिपद्धते॥ पूर्वस्मिन्नर्वाग्गुणपहेवाकर्तव्यः॥ तत्रोद्धरणादिकर्मापवर्गांतं निरूढपशुवत्सर्वं भवति॥ कर्कमतेत्वग्नीषोमी
यवत्पशुश्चपुनरुक्तस्वरूपभागो भवति॥ तत्रेन्द्राग्निभ्यां जुष्टमित्याद्यपि सर्वं निरूढे। ऐंद्राग्नेपुरदर्शितमेव॥ ततो यजमानो
मातृपूजामाभ्युदयिकं श्राद्धं च कृत्वा षोडशर्त्विजो वृणीते॥ तत्र ब्रह्मादीन्षोडशर्त्विजः प्राङ्मुखोनुपविष्टस्वयमुदङ्मुखेइ
ष्टदेवतांप्रणम्य पूर्वं दैवान्‌त्विजो वृणीते॥ मंत्रोच्चारणमात्रेण॥ तद्यथा॥ अग्निर्मेहोता॥ आदित्योमेध्वर्युः॥ चंद्रमामे ब्रह्मा॥ प
र्जन्यो मेउद्गाता॥ आपो मे होत्राशंसिनः॥ रश्मयो मे चमसाध्वर्यवः। इति मंत्राः महर्त्विग्व्यतिरिक्ता ब्राह्मणच्छंस्याग्नीध्रादशर्त्विजो होत्राशं
सिनइत्युच्यंत इति मानवे॥ ततो मानुषान्‌त्विजो वृणीते॥ तत्रैवमाचारः सदस्यसंग्रहीत्वा सोपक्षंतेन दक्षिणहस्ताग्रेण दक्षिणांसमृत्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

ग्नान्वालभ्य वरणं करोति॥ अमुकगोत्रामुकशर्मन् हिरण्यदन्तगव दक्षिणेन वासोश्व दक्षिणेन चतुष्टमेन रथं तत्पृष्ठेनाग्निष्टोम
संस्थेन ज्योतिष्टोमेनाहं यक्ष्ये॥ तत्र मे त्वं ब्रह्मा भवेति ब्रह्माणं वृणीते भवामीति ब्रह्मा प्रत्याह॥ ततउद्गाता भव॥ होता भव॥ अध्वर्युर्भव॥
ब्रह्मणाच्छंसी भव॥ प्रस्तोता भव॥ मैत्रावरुणो भव॥ प्रतिप्रस्थाता भव॥ पोता भव॥ प्रतिहर्त्ता भव॥ अच्छावाको भव॥ नेष्टा भव॥ अ-
ग्नीद्भव॥ सुब्रह्मण्यो भव॥ सुब्रह्मण्या भवेति वा॥ ग्रावस्तुद्भव॥ उन्नेता भवेति॥ एवमेतान् षोडशर्त्विजो वृत्वा तान्स्तुति यजमानः साधु-
भवंत आसतामर्चयिष्यामो भवत इति ब्रूयात्॥ ततस्तान्मधुपर्केणार्चयित्वा पुण्याहं दीर्घमायुरस्तु इत्यादि दक्षिणासंकल्पः॥ २
दक्षिणाः पांतिस्यादि पुण्याहवाचनं॥ ततो यजमानाय सोपस्समर्पणं॥ यजमानस्य तिलकादि मांगल्यकरणं॥ आशीर्वादाः॥ तत
आचम्य यजमानो दैवर्त्विग्भ्यो मानुषेभ्यश्च देवयजनं प्रार्थयते॥ अग्निर्मे होता स मे देवयजनं ददातु॥ इत्युपांशु॥ होतर्देवयजनं
मे देहीत्युच्चैः॥ एवं सर्वत्र ज्ञेयं॥ आदित्यो मेऽध्वर्युः॥ स मे देवयजनं ददातु॥ अध्वर्यो देवयजनं मे देहि। चंद्रमा मे ब्रह्मा स मे देवयजनं
ददातु॥ ब्रह्मन् देवयजनं मे देहि॥ पर्जन्यो म उद्गाता स मे देवयजनं ददातु॥ उद्गातर्देवयजनं मे देहि॥ आपो मे होत्राशंसिनस्ते

मेदेवयजनंददतु।होत्राशंसिनोदेवयजनंमेदत्त॥एकमयोमेचमसाध्वर्यवस्तेमेदेवयजनंददतु॥चमसाध्वर्यवोदेवयजनंमे
दत्त।दत्तमितिसर्वेषांहोत्रादीनांप्रतिवचनं।महर्त्विग्व्यतिरिक्ताब्राह्मणाच्छंस्यादयोद्वादशर्त्विजोहोत्राशंसिनइत्युच्यंते॥एवंगृह
एवर्त्विजोहृत्वातेभ्योदेवयजनंप्रार्थयित्वायजमानऋत्विक्सहितोदेवयजननिर्द्धारणार्थंयाति॥तत्रगत्वायस्यपार्श्ववर्त्तीप्रदेशो
भ्योतिशयेनोच्चंसमंचबहूष्णुदकेननद्यतिप्राक्प्रवणामुदक्प्रवणंवाभवति॥यचपूर्ववर्जंपरितःतिसृषुदिक्षुदेवयजनप
योन्नःप्रदेशोभवति॥तदेवंविधंदेवयजनंयागार्थंविलोक्यनिर्द्धारयंति॥इदंसाधुसर्वलक्षणोपेतंदेवयजनंअत्रैवयागःक्रि
यतइतिअथवायदिदेवयजनमुक्तलक्षणोपेतंनलभ्यते॥तदायस्ययजमानस्यऋत्विज्ञोनूचानाभवंतितस्यदेवयजनंयादृशं
लभ्यतेतादृशमनेवंलक्षणमपिभवंति॥एतेनऋत्विजोनूचानाःश्रुतशास्त्रादिकमन्येभ्यउपदेष्टुंसमर्थाभवंतितएवकर्त्तव्यानाम्
इतितात्पर्यं॥ततोदेवयजनादोषधिमूलान्युद्धृत्यतस्योद्धृतौषधिमूलस्यपरिसमूहनादिसंस्कृतस्यदेवयजनस्यपश्चाद्भागेद
शारत्निद्वादशारत्निवासमचतुरस्रंविमितंकुर्वंति॥तत्रवंशोमध्यवलःप्रागायतःप्रागग्रश्चकर्त्तव्यः॥पूर्वस्यांदिशिप्रवंशंकर्त्तव्यं॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उच्छ्रयणाः पूर्वस्यां दिशि निवेशनव्याः तस्य पूर्वदक्षिणपश्चिमासु द्विहस्तविस्ताराणि त्रीणि द्वाराणि कार्याणि॥ अथवा एवं
विधा शाला च दीर्घचतुरस्रा भवति॥ तदुक्तं विंशत्यरत्निः शालास्यात्तदर्द्धेन तु विस्तृता॥ विमितं चतुरस्रं स्याद्दशारत्निप्रमा
णमिति द्वादशारत्निमानमिति वा चतुर्थपादपाठः॥ ततो विमितादुत्तरस्यां दिशि समीप एवार्थपरिमाणं चतुरस्रं प्राग्द्वारं यज
मानस्य पुंदीक्षार्थं परिवृतं करोति ततएवंविधमेव द्वितीयं परिवृतं विमितादपरस्यां दिशि पत्नीदीक्षार्थं कार्यं॥ एवं दे
वयजमानस्य पश्चाद्भागे परिवृतद्वयसहितं विमितं शालां वा निर्माय गृहमागत्य यूपाकृत्यर्थमाहवनीयमुद्धृत्याज्यसंस्का
रपूर्वं चतुर्गृहीतं गृहीत्वा स्रुवेण वा परिस्तरणमग्निदाधानपूर्वकमुहविष्णो विति यूपाहुतिमाहवनीये जुहोति॥ आज्यशे
षस्य गुग्गुल्वस्थापनं ततो भूसंस्कारान् कृत्वा समारोपार्थमाहवनीयमुद्धृत्य गार्हपत्याहवनीयावयं ते योनिरित्यरण्योः स
मारोह्याशकटे अरणी सर्वं यज्ञसंभारं च निधाय मंगलं शांतिपाठादिकं च कुर्वन् देवयजनं प्रतिगच्छेत्॥ सोमाधानपक्षे
अग्निधारणासद्भावे यूपाकृत्यर्थमाहवनीयोद्धरणं न कार्यं तत्रैव यूपाकृतिर्होतव्या॥ समारोपोपि नित्यधृतानामेव कर्त्तव्यः

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवयजनं प्राप्य पादौ प्रक्षाल्याचम्य यजमानो दक्षिणहस्तेन धृत्वा सोमं वादाय पूर्वद्वारेण शालां प्रविश्य दक्षिणहस्त एव पूर्वद्वारे
निषण्णं तं महान्तं शालस्तंभं दक्षिणहस्ताग्रेण स्पृष्ट्वा इदमगन्मेति मंत्रं पठति॥ ॥प्रथमा कंडिका॥ ॥ततः सोमस्य शालम
ध्ये कुविंदुस्थाने स्थापनं। ततो ध्वर्युर्गार्हपत्यावरे पंचभूसंस्कारान् कृत्वा गार्हपत्यं मथित्वा तत्र स्थापयति॥ ततो गार्हपत्या
दाधानवदष्टप्रक्रमादिमितं देशं अंतराले मुक्त्वा आहवनीयखरं वितत्य तीये दक्षिणाग्निखरं च कृत्वोभयत्र भूसंस्कारा
न् कृत्वाग्निष्टोमसंस्थं ज्योतिष्टोमार्थमिति संकल्प्याहवनीयदक्षिणाग्न्योर्विहरणं कुर्यात्॥ ॥ततः सोमापणं सवाग्नितंह
विष्यान्नमुपढौकयेत्॥ इदमन्नं सोमायनममेति यजमान एव॥ एतावत् पूर्वाह्ने कर्म॥ ततो पराह्णे यजमानः सपत्नीको ऽन्वा
न्यपायस्तापूपमोदकमंडकशाकादिभोक्तुमिष्टं भवति क्षेत्वनदुहमांसवर्जितं तदश्नाति। अथवा यत्संपद्यते तदेवाश्नाति॥ अ
थवा यदशने द्युतं भवति तात्तदाभाश्नीयात्॥ ततो यजमानो यागार्थं दंडं वंकस्य चिह्नस्ते समर्पतस्यापदे शं शिक्षां करोति कृत्वर्थं,
मे गोपायय यथाकालं संपादयेति॥ ततो ध्वर्युदीक्षातत्रोन्नरे परिश्रिते उदकपूर्णस्यैकस्य कुंभस्य स्थापनं॥ नापितश्च सन्निधाने—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

र्ध्वं तिष्ठति ॥ ततस्तस्मिन्परिहृते यजमानं पूर्वाभिमुखमुपवेश्य स्वयमुदङ्मुखो यजमानस्य दक्षिणहस्तस्यांगुष्ठादारभ्य नखा
न्निकृन्तति । ततः सव्यहस्तस्य । ततो दक्षिणपादस्य । ततः सव्यपादस्य । ततो यजमानस्य दक्षिणं गोदानं शिरसो दक्षिणं प्रदेशं इमा
आपः इत्युदपात्रोदकेनार्द्रीकरोति ॥ ततः शलाकादिना कतिपयान्केशान्पृथक्कृत्वा तेषु ओषधे त्रायस्वैनमित्येकं दर्भतरुणमंतर्धाय स्वधि
ते इति क्षुरं दर्भतरुणस्योपरि निदधाति ॥ ततस्तूलीं सतरुणान्केशांश्छित्वोदपात्रमध्ये प्रक्षिपति ॥ ततः शिरसमुत्तरप्रदेशं तु उद
पात्रोदकेन तूलीमार्द्रीकृत्वा ॥ शलाकादिना केशान्पृथक्कृत्य तत्तूलीं तरुणं प्रागग्रमंतर्धाय तत्तूलीमेव क्षुरं तस्योपरि निधाय तत्तूलीं स ४
तरुणान्केशान्छित्वा छिन्नान्केशानुदपात्रे प्रक्षिपति ॥ प्रागग्रं दर्भमंतर्धायेत्यापस्तंबः । ततो नापिताय क्षुरं प्रयच्छति ॥ तेन क्षुरेण
नापितो यजमानस्य केशानां मस्तकोद्भवानां श्मश्रूणां मुखरोम्णां भ्रूवक्षुरोमवर्जितानां च वपनं करोति । कक्षोपस्थशिखावर्जं ॥ ॥
अत्रापस्तंबः ॥ उत्तरेण वहिः प्राग्वंशे परिश्रिते यजमानः केशश्मश्रु वापयत उपपक्षावथ श्मश्रूण्यथ केशा नपिवा श्मश्रूण्युपप
क्षावथ केशानिति । मानवे । नकक्षाविति । तथा लोहितमनभिगमयन्नौदुंबरेण दंतान्धावेतेति । ततः स्नात्वा अपो गत्वा यजमानो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नापितस्पर्शननिमित्तं स्नात्वाचम्य नाभ्देवापो अस्मानिति मंत्रेण स्नानं करोति ॥ ततो जलमध्ये एव तत्समीपे आचम्योत्थायोदिदाभ्य इति
मंत्रेण जलमध्यात् उदीचीं दिशं प्रतिउत्क्रामति निःसरति । नात्रोदकुंभोदकेन स्नानं अविहितत्वात् ॥ मंत्रलिंगात् । शाखांतरविरोधा
त् । तत्स्थापनं त्वदृष्टार्थं सोमक्रयोर्कुंभवत् ॥ ततो यजमानः क्षौमं अहतं वासः परिधत्ते ॥ तत्पूर्वमप्रक्षालितं च तदानिष्वे ष्टवाद
मध्वर्युः प्रतिप्रस्थाता वा यजमानपुरुषं वा प्रेष्यति ॥ ततः प्रतिप्रस्थाता पाणिभ्यां वस्त्रं गाढं धर्षयित्वा प्रक्षालयति ॥ ततोद्भिरभ्यु
क्ष्य यजमानः परिधत्ते ॥ यदिनतति ॥ पूर्वमेव प्रक्षालितं तदा अभ्युक्षणमात्रं कृत्वा परिधत्ते ॥ अथवा अनहतमपि यत्प्रत्यहं स्नान
नंतरं परिधानार्थं भवति तदेव परिधत्ते एतत्त्रिविधमपि वस्त्रमरजकधौतं निःकाशितकेशं विरलीकृतदशं दीक्षानपसोरिति
मंत्रेणानीवीरहितं परिधत्ते । एवमेव वासो न्तरीयमिति हरिस्वामिनः समाचारपरिप्राप्तमन्तरीयं च धारयतीति संप्रदायः ॥ एवमेव
प्रतिप्रस्थाता पत्न्यैमे परिहृते तल्लीपत्नीं दीक्षयति । वपनस्य विकल्पः । वपनपक्षे नखनिकृंतनादि वस्त्रपरिधानांतं सर्वं मंत्ररहितं
यजमानवद्भवति । वपनाभावे च पूर्वं हस्तयोर्नखनिकृंतनं । ततः पादयोः । ततः स्थावरोदकेन स्नानं ॥ उत्तरपूर्वाद्युक्रमणं ॥ य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प जमानो यादृशं वस्त्रं परिधत्ते ॥ तादृशस्यैव पत्न्या अपि परिधानं ॥ उत्तरीयधारणं च ततोध्वर्युर्वा गृहीतं यजमानं पूर्वद्वारेण शाला
यां प्रवेशयति ॥ प्रतिप्रस्थाता चापरेण द्वारेण गृहीतां पत्नीं शालायां प्रवेशयति ॥ ततस्तौ स्वस्वस्थाने उपविशतः ॥ ततो दीक्ष
णीयेष्टिः ॥ तत्राग्नावैष्णव एकादशकपालो चरुर्भवति ॥ आदित्येभ्यश्चरुर्द्वितीयं हविर्विकल्पेन ॥ तत्र त्रिरग्न्यन्वाधानं ॥ चतु
रात्नोपकल्पनं । ब्रह्मवरणं तत्र जपाभाव ॥ ब्रह्मासनं त्र्यक्रमासनं सत्कृत्योपविशति । व्रतग्रहणं । प्रणीताप्रणयनं त्र्यायां परिस्त
रणं ॥ पात्रासादने ॥ शूर्पाग्निहोत्रहवण्यस्मकपालानि एकादश ॥ चरुस्थाली वा शम्यादि निर्विशेषो दक्षिणाभावः । विंशति ५
रिध्मकाष्ठानि एकापुरोडाशपात्री पूर्णपात्रकर्मापवर्गयोरभावः ॥ चरुपक्षे मेक्षणं चासाद्यते ॥ ग्रहणे वा विष्णुभ्यां जुष्टं ॥ द्वितीयप
श्चरुश्चेत् ॥ आदित्येभ्यो जुष्टं । एवं पक्षे सर्वत्र ज्ञेयं ॥ प्रोक्षणे त्वाजुष्टं ॥ एकबीजपक्षे कण्डने विभज्यालम्भः इदमग्नाविष्णोः इदमा
दित्यानां । प्राणदाने अग्नाविष्णू गच्छ ॥ पक्षे आदित्यान् गच्छ । अवबाधने सप्तदशेन वज्रेणाऽन्नमप्रयाजे इदमग्नये सोमायाग्ना
विष्णुभ्यामादित्येभ्यो वा देवेभ्य अज्यपेभ्यः । अत्र दीक्षणीयाप्रभृत्यग्नीषोमीयान्ता कल्पवैः कर्मभिः हपांश्चरंति ॥ तत्रापि महावी

रसं भरणप्रवर्ग्यचरणमग्नीषोमीयपशुश्चसूत्रास्वान्तरादुच्चैः सर्वपक्षेषु अथवादीक्षणीयांवागंतेनात्युच्चैः कुर्यात् तदपेक्षयाती
वैः प्रायणीयेति दपेक्षयानीचैस्तरातिथ्यां उपांशु उपसदः कार्या इति ॥ ततो यांशुपक्षे सर्वं प्रैषादिकमप्युपांशु । वागंतपक्षे पिप्र
धानयागे देवतापदमात्रमुपांशु । अत्युच्चैः सर्वं । अग्नाविष्णुभ्यां । अनुब्रूहि अग्नाविष्णूयज ॥ इदमग्नाविष्णुभ्यां । पक्षे आदित्ये
भ्यः अनुब्रूहि । आदित्यान्यज । इदमादित्येभ्यः । ततः स्विष्टकृदादि पुरोडाशस्य प्राशित्रेडाव्यतिरिक्तं किमपि न भवति ॥ चरुपक्षे तस्यापि
न भवति ॥ गृहते अग्नाविष्णोर्हविर्जितं अग्नाविष्णुतमपनुदतामिति पक्षे अग्नाविष्ण्वोरादित्यानाघ्रुजिति ॥ अग्नाविष्णुआदित्यास्त्वम
पनुदं त्वेति प्रस्तरहोमो । इदमग्नये सोमयाग्नाविष्णुभ्यां देवेभ्य आज्यपेभ्यः पक्षे आदित्येभ्य इत्यधिकपिष्टन्नेपाकृतो विश्वेभ्यो दे
वेभ्य इति सर्वपक्षे ॥ दक्षिणाग्निहोमानंतरं वेदयोक्तविमोकः ॥ ततो ध्वर्युः शालायाः पुरस्तात् कुशान्स्तृणाति ततो यजमानस्ते
षु कुशेषु पूर्वाभिमुखस्तिष्ठति । पत्नी च दक्षिणतः ततो ध्वर्युर्यजमानाय नवनीतं समर्पयति । पत्न्यै प्रतिप्रस्थाता । ततो यज
मानो पहीतां पयो ॥ शीतिहि रसआभरभ्यपादपर्यंतं सर्वशरीरमनुलोमम नक्ति तेनाध्वर्युसमर्पितेन नवनीतेन अनक्ति;

अ॰प

पृष्ठतश्च पृष्ठादौ यत्राभ्यंजनं कर्तुं न शक्नोति तत्राध्वर्युस्तमभ्यनक्ति नासिकासंलग्नकोणादारभ्य पराक्· ततो यजमा
नएव साग्रया सतूलया शरेषीकया सौवीरांजनेन हस्तस्वेति दक्षिणं चक्षुर्द्विरनक्ति। नासिकासंलग्नकोणादारभ्य पराक् न
त्वा हृत्या एकवारं मंत्रेण द्वितीयं तूष्णीं। एवमेवोत्तरं चक्षुस्त्रिर्वारमनक्ति सकृन्मंत्रेण द्विस्तूष्णीं सौवीरांजनाभावेन्येन कज्जला
दिनानक्ति॥ ॥द्वितीयाकंडिका॥ ततोध्वर्युः सप्तभिः सप्तभिः साग्रैः कुशतरुणैश्चित्पतिर्मे पुतिमंत्रं यजमानं पावयति। तत्रा
च्छिद्रेणेति त्रिष्वपि मंत्रेष्वनुषंजनीयं॥ वारद्वयं नाभेरूपरि प्रदक्षिणमुन्मार्जनं करोति तत्र चित्पतिर्मेति प्रथमं वाक्पतिर्मे
ति द्वितीयं ततएकवारं सप्तभिः पवित्रैर्नाभेरधस्तात्प्रदक्षिणमवमार्ष्टि देवो मेति मंत्रेण॥ अथवा एकैकेनैव दर्भतरुणेन वारत्र
यं पावयति॥ अथवा त्रिभिर्दर्भतरुणैः॥ अथवा सप्तभिः अत्र त्रिष्वपि पक्षेषु ता एव पवित्रव्यक्तयः पावनत्रयेपि भवंति॥ प्रथ
मपक्षेतु प्रतिपावनमन्यान्येव सप्त सप्त पवित्राणीति भेदः॥ ततोध्वर्युराबोदेवासस्त्वमुं मंत्रं यजमानं वाचयति॥ यज्ञियासोह
वामहइति ब्रूहीत्येवमध्वर्युराह॥ ततोयजमानः स्वरेणआबोदेवासइतिपठति एवंसर्वत्र वाचनेषु ज्ञेयं॥ ततोयजमानः स्वा ६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हायज्ञमिति मंत्रेण द्वयोरपि हस्तयोः कनिष्ठिके संकोचयति ॥ ततः स्वाहोरोरिति द्वयोरनामिके संकोचयति ॥ ततः स्वाहा द्या
वेति द्वयोरपि मध्यमे संकोचयति ॥ ततः स्वाहा वातादिति मुष्टी करोति ॥ ततः स्वाहेत्युक्त्वा वाग्यमनं करोति । द्वावंगुष्ठौ द्वे प्रादेशि
न्यौ चोत्सृजति सहैव ॥ अवशिष्टमंगुलिद्वयं द्वयोरपि हस्तयोर्मुष्टिरूपमेव तिष्ठति विसर्गं यावत् ॥ ततः कृतवाग्यमं यजमानं अ
ध्वर्युर्हस्ते गृहीत्वा पूर्वद्वारेण शालां प्रवेश्य गार्हपत्याहवनीययोरंतराले न प्रवेशयति ॥ अस्य यजमानस्यावभृथं यावदेव एवं गमना
र्थं संचरः ॥ एवं प्रतिप्रस्थाता यजमानेन सहैव पत्नीमानवनीतेनाभ्यंजनादि प्रवेशांतं कर्म तूष्णीं कारयति अपरेण शालाद्वारेण प्र
वेशयतीति विशेषः ॥ ॥ तत औद्ग्रभणहोमः ॥ तत्राहवनीयसमीपे नुपविश्य सनिधमाधायाध्वर्युः स्थाल्याः सकाशादाज्यं
गृहीत्वा स्रुवेण जुहोति ॥ आकूत्यै प्रयुज इति प्रथमं । इदमाकूत्यै प्रयुजेग्नये ॥ मेधायै मनसेग्नय इति द्वितीयं । इदं मेधायै
मनसेग्नये ॥ ततो दीक्षायै तपस इति स्वरेणजमत्युपविष्ट एव न जुहोति ॥ ततः सरस्वत्यै पूष्ण इति तृतीयं जुहोति ॥ इदं सर
स्वत्यै पूष्णेग्नये । आपो देवीर्बृहतीरिति चतुर्थी स्रुवेण जुहोति ॥ इदमद्भ्यो द्यावापृथिव्यंतरिक्षबृहस्पतिभ्य इति त्यागः ॥ इदमग्नौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प

द्यावापृथिवीभ्यामंतरीक्षाय बृहस्पतयेवेतिवा। मंत्रलिंगे भिन्नविभक्त्यातातानामेव देवतात्वेनावगमनात्। पंचमहोमे ध्रौव
माज्यं सकलमेव जुहोमाति व्यस्यात्याः स्रुकाग्रात् स्रुवेण द्विराप्तिच्यततो जुहोत्यनुपर्युक्तानं स्रुवं निधायस्थालीतआज्य
नितीय स्रुवेणामेव पूरयंतिन जुहुयात्॥ ततस्तं पूर्णं स्रुवं जुहोति नितीयविश्वो देवस्येति जुहोति। इदं विश्वदेवस्य वित् मित्र
बृहस्पतिपूषभ्यः। इदं विश्वेभ्यो देवेभ्यः सवित्रे मित्राय बृहस्पतये पूष्णे वेति वा॥ अथवा इदं सवित्रे इत्येतावानेव त्यागः। सा
वित्रीमनुष्टुभमित्युक्तेः॥ अथवा स्रुवस्य पूरणं न कार्यं किंतु स्रुवाभिपूरणकाले जुहूपवलेन पूरयित्वा इयमेवैका हु ७
तिर्होतव्या॥ तद्वीत्तिवत्वा यौं जुहूमपि न्नावैपयैकां जुहुयात्पूर्णां जुहुयादिति स्रुतेः॥ तत औदुंबरां तेदीक्षणाया दोष
समाप्तिः। वर्हिर्होमः। प्रणीताविमोकः राक्षसभागः॥ ॥ तत्र आहवनीयस्य दक्षिणतः समीपे द्वे कृष्णाजिने अलोमकप्रदेश
संलग्ने पश्चाच्छिद्रे प्रतियमेन परस्परं स्यूतांते अवलंबन रज्जुके प्राक्ग्रीवे स्थापयति यद्येकं कृष्णाजिनं भवति न द्वितीयं त
दा तस्यैव पश्चात् दक्षिणपादे द्विगुणः कार्यः। न कृष्णाजिनस्य चतुर्थांशः। ततो यजमानः कृष्णाजिनयोः पश्चात् दक्षिणजानुभूमौ

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पातयित्वा प्राङ्मुखस्तृणपविशति ॥ ततः स्रुवकृष्णाजिनयोः शुक्लकृष्णलोमगांसंधिं मर्यादामालभते । ऋक्सामयोरिति ॥ ततो द
क्षिणेन जानुना कृष्णाजिने आरोहति शर्मासीति मन्त्रेण वजानुना कृष्णाजिनस्यापरभागे उपविशति ॥ तन्मध्ये ततो यजमानो वेण्वाः का
ण्डं त्रिवृत् मुष्टिं तां शराणमयीं मुंजेनाल्पेन मिश्रितां मेखलां परिहितवस्त्रमध्ये कटौ बध्नाति ऊर्गसीति मन्त्रेण । ततः सोमस्य नीविरसीति नी
विं कुरुते ॥ ततो विष्णोः शर्मासीत्युत्तरीयेण शिरः प्रोर्णुते ॥ उष्णीषेण पुनः दक्षिणं शिरो वेष्टयत इति वाजसनेयकमित्यापस्तम्बः ॥ नत्तरां ते
न प्रोर्णुत इति मनुः । अत उष्णीषेण पुनः दक्षिणं शिरो वेष्टनीयं । ततो यजमान उत्तरीयस्य दशायां त्रिगुणं पिचुकां पंचगुणं पिचुकां वा प्रादेशमात्रीं कृ
ष्णविषाणां दृढां बध्नाति ॥ यदा च शरीरे कंडूयनं स्यात् तदानया कंडूयनं कार्यं न नखैः काष्ठादिभिर्वा ततो यजमानो दक्षिणस्यां भ्रुव उ
परि संनिकृष्टं कृष्णविषाणया ललाटमुपस्पृशति इंद्रस्य योनिरिति । कृष्णविषाणया भूमौ प्राक्संस्थामेव रेखां करोति सुसस्या इ
ति । बहिर्वेदि प्राचीमुदस्यतीति मनुः ॥ ॥ इति तृतीया कंडिका ॥ ॥ ततोऽध्वर्युर्यजमानमुखमात्रमौदुंबरं दंडं तिर्यंचं यजमानाय
समर्पयति ॥ ततो यजमान उच्छ्रयस्वेति दंडमूर्ध्वं करोति ॥ ततस्तं दक्षिणस्कंधे अवष्टभ्नाति ॥ यदा अर्थं निरवशेन तस्य निधनं क्रियेते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ०प तदा दक्षिणपार्श्वे कर्त्तव्यं नान्यत्र अस्मिन् काले वाग्याहायन्नमिति मुष्टिकरणं वाग्यमनं कर्त्तव्यं न पूर्वोक्तकाले॥ ॥प्रतिप्रस्था
ता यजमानदीक्षासमकालमेव पत्नीं मंत्रवर्ज्जं दीक्षयति॥ तत्र यदि पत्न्याः कृष्णाजिनस्तरणादि क्रियते। तदा दंडप्रदानांतं कर्त्त
व्यं॥ अथ यदि मेखलाबंधनाद्येव क्रियते तदा छत्रेखनपर्यंतं कारयति॥ कृष्णविषाणास्थाने कंडूयनार्थं पत्न्या वस्त्रदशायां
पत्युसूत्रोपरि यद्वृक्षस्यौदुंबरपलाशादेः प्रादेशमात्रः शंकुर्बध्नीयः। उच्छ्रेखनं कंडूयनं च तेनैव कर्त्तव्यं॥ उष्णीषस्थाने
त्रिपर्णीयं जालं वा भवति॥ मेखलास्थाने योक्त्रं वा॥ तच्चैवासउपरि दर्शपूर्णमासवद्बंधनीयं। तथा चापस्तंबः॥ अत्र दर्श ८
पूर्णमासवत्पत्नीं संनह्यतीति॥ ॥ततः प्रतिप्रस्थाता शालायाः पूर्वप्रदेशे वास्थितो दीक्षितोयं ब्राह्मण इति त्रिरुच्चैर्ब्रुवी
ति॥ क्षत्रियवैश्ययोरपि दीक्षितोयं ब्राह्मण इत्येव प्रैषो न तु दीक्षितोयं क्षत्रियो वैश्य इति च॥ अत्र मानवे विशेषः॥ अग्रेणप्राग्वं
शं दीक्षितमनवारब्धमावेदयतीति॥ अस्तमयपर्यंतं दीक्षितो वाग्यत एव शालायामेवास्ते। असोमाधानिनो दीक्षितो यमित्येत
स्मात्प्राक् अस्तमये अग्निहोत्रकाले आगते सायंप्रातर्होमस्तत्रेण कर्त्तव्य॥ सायंहोममात्रं कुर्यात् न प्रातर्होममिति याज्ञिकाः। इष्टेर

...University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नंतरमेव होमादि निषेध इति निर्मा सकाः॥ ततोऽस्तमिते सूर्ये अध्वर्युर्दीक्षितवाचं विसृजस्वेति विहृत्का॥ ततः पत्निवाचं विसृजस्वे
ब्रूयात्॥ ततो यजमानः कृष्णाजिनोपविष्टः पूर्वाभिमुखः सन्नग्निमभ्याहृत्योत्तराभिमुखो भूत्वा व्रतं कृणुतेति व्रतकरणप्रैषं
विहृत्का अग्निर्ज्योतिरित्यनेन सकृत्पठितेवाग्विसर्जनं कुर्यात्॥ ॥अथवा भूर्भुवः स्वरित्यनेन वा वाग्विसर्गं करोति।नाग्निर्ज्योतिरित्यनेन॰
ततोऽध्वर्युर्व्रतदुघे गावौ दोहयति व्रतदुघे गावौ धुक्ष्वेति प्रैषेण तयोर्व्रतदुघयोर्दुग्धेन पत्नीयजमानौ व्रतं कुरुतः प्रथमव्रतमध्ये व्रीहि
यवयोत् भयोरन्यतरस्यौदनापूपादिना व्रतं कुर्यात्॥ एके सर्वधान्यग्राम्यारण्यसकोद्रवादिव्यतिरिक्तस्य भक्षणमीहेतामापादितस्य
प्रथमे व्रते प्रक्षेपं कुर्वन्ति व्रतदुघयोः पृथक्पृथग्दोहनं क्व नवादीक्षितस्य व्रतस्य गार्हपत्ये श्रपणं कर्त्तव्यं।दक्षिणाग्नौ पत्नी व्रत
स्य।व्रतस्याल्पत्वेनामादि विन्द्रव विपर्यासार्थं।आपस्तंबः॥ यदि व्रतधुगलं दुहीत तावत्प्रातर्दोहयित्वा तस्या दद्भिः संसृज्य श्रपयेद्य
दि पयो न स्याद्दध्ना वा यवागूं श्रपयेद्यदि पयो न स्याद्दध्ना वा यवागूं श्रपयित्वा व्रतयेद्यं ततः पिप्पलानि तत्त्वेव न व्रतयेदग्निहोत्र विष्टे
या यदि दधी पादेवास्ते दधि कुर्युर्यद्यन्नी या स्ता ना अस्मा अन्नापयेयुः सक्तून्स्मा अन्नपयेयुर्यप्याग्निहोत्रहविषामेकैकं व्रतयेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

म्भां सवर्जस्येयं दैक्षो वा दो भवति। क्षत्रियस्य पयागर्व्रुतं भवति सा च लौकिकाग्निभृता सिद्धैव ग्राह्या वैश्यस्य पयस्याव्रुतं भव
ति। सापि लौकिकाग्निसिद्धैव ग्राह्या॥ ततो यजमानोग्नौ अग्नेत्व ८० सुजागृहीति मंत्रं पठित्वा हवनीयस्य दक्षिणतो भूमौ
वस्त्रादिकमास्तीर्य प्राक्शिराः शयीत॥ नोन्नानोना धोमुखो नाग्नेरपपर्यावर्त्तेतेति॥ मनुः दक्षिणतआहवनीयस्योदङ्मुखो
ऽपर्यावर्त्तमानः प्राक्शिराः शयीतेति॥ एवं गार्हपत्यदक्षिणतः पत्नी शेते। रात्रौ शिक्ये पलालदर्भाद्यास्तेन पिहितकादौ वृत्तार्थ
दुग्धयोः स्थापनमपिधानं च कृत्वा यत्नेन रक्षणं कार्यं। ततोपररात्रे यजमानस्तथा पत्नी कर्णंगहूपादमनादिकं करोति पत्नी च। तदंत
धावनसंध्यादिकं ततोध्वर्यु- मृन्मये कांस्यपात्रे चमसे वा दो यजमानदुग्धमासिच्य यजमानसंचरेणैव यजमानाय समर्पयति॥ दी
क्षितसंचरेणेति हृत्य कांस्ये चमसे वा व्रुतं प्रयच्छतीति॥ मनुः॥ ततो यजमानः कृष्णाजिन एवोपविष्टो देवीं धियमिति हस्तौ प्र
क्षालयति व्रतवरणार्थं आचमनीति केचित्। ततो येवाइति तन्मयः पिबति। तत आचम्य भव्या व्राः पीता इति नाभिमालभते। प्र
तिष्ठातातामुपात्रे पत्न्याः स्वस्यानोपविष्टाया व्रुतं ददाति। हस्तप्रक्षालनं वा। आचमनं वा। पयोभक्षणं नाभ्यालभनं च तूष्णीं करो ९

ति॥आपस्तंबः। दक्षिणेनाहवनीयं परिश्रिते व्रतयति नैनमदीक्षिता व्रतयन्तं पश्यन्तीति॥यदि यजमानो मूत्रं पुरीषं वा करिष्यन्भव
ति तदा दंडकृष्णाजिने निधाय यस्मिन्देशे मूत्रं पुरीषं वा करिष्यन्भवति तस्माद्भूमिप्रदेशात्कृष्णविषाणया करणभूतया लो
ष्टं अन्यद्वा स्तम्भकाष्ठादिकमियं ते यज्ञियातनूरित्यादत्ते। ततोपोर्ध्रुचामीतिमंत्रेण मूत्रं पुरीषं वा करोति मंत्रांते। ततः स्वस्तिभुवो
भूत्वा आचम्य पृथिव्या संभवेति मंत्रेण गृहीतं लोष्ठादिकं तत्रैव प्रतिक्षिपंति॥व्रतकरणानंतरमपि स्वापेछ्यां तूष्णीमेव स्वपि
ति॥ ॥चतुर्थीकण्डिका॥ ॥ततोरुणोदयवेलायां प्रबुद्धं यजमानं पुनरस्वप्नं तमग्निसंमुखं अध्वर्युः पुनर्मन इति मंत्रं
वाचयति ततोनुदिते सूर्ये दीक्षितवाचं यच्छेति त्रिरुक्त्वा पत्नीवाचं यच्छेति त्रिरध्वर्युराह॥ ततउभयोः सूर्योदयं यावद्वाग्यमनं।उ
दिते दीक्षितवाचं विसृजस्वेति त्रिरुक्त्वा पत्नीवाचं विसृजस्वेति त्रिराह॥ ततो यजमानोग्निमभ्याहृत्य व्रतं कृणुतेति त्रिर्ब्रुवीरं व्रतक
रणप्रैषं दत्वाग्निर्व्रुचेति सकृत्पठितेन वाग्विसर्गं करोति॥ ततएकदीक्षापक्षे प्रातः प्रथमोपसदि त्रिस्तनं व्रतं दुग्धे धुक्ष्वेति प्रै
षः एकस्तनमिति वा। तथैव चतुर्थ्यां पूर्ववत्छुपणांस्थापनं च। दीक्षानां च विकल्पा बहवः। एका दीक्षा तिस्रो वा द्वादश वा अपरि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितावेति॥ तत्रयावंतिदीक्षाहानितेषुचतुस्तनमेवव्रतंउपसदिप्रथमायांत्रिस्तनमेकस्तनंवाद्वितीयायांद्विस्तनं। ततोयाया
मेकस्तनंत्रिस्तनंवेति॥ ॥यदियजमानःकुप्यति॥ अब्रुत्यंवाशूद्रसंभाषणात्तत्प्राकृतादिभाषणंकुरुतेतदाप्रायश्चित्तार्थंत्वमग्नेव्रतपाअसी
तिमंत्रंपठेत्॥ अवशालांनरेत्वाद्दशाहंदीक्षितोभवतिभृतिचित्रोतेतिदीक्षितस्यभृतिपाचनंविहितमत्तिनत्रयजमानायकश्चिद्धिरण्यगोव
स्त्रादिददातितदातदालंभ्यगामालभस्वहिरण्यमालभस्ववस्त्रमालभस्वेतिप्रैषेणातस्यालंभंकारयित्वाग्स्त्वेयदित्यचुंमंत्रंयजमानंवाचयेद
ध्वर्युः॥ यदिदेशकालादिविप्रकर्षेणदीयमानस्यग्रामांतरस्थितत्वेनभूमिगतादेरालंभःकर्तुंनशक्यतेतदाग्नेयदित्यनेनतद्देश्यस्यैवत
स्याभिमंत्रणंयजमानःकरोति॥ अदीक्षितस्यावभृथपर्यंतंनियमानुच्यंते॥ दीक्षितःशूद्रेषुनप्रविशेत्। शूद्रैःसहसंभाषणंनकुर्यात्॥ अथवा
शालामध्येशूद्रस्यप्रवेशोवारणीयः। यदिशूद्रेणसंभाषणेनावश्यंकार्यंभवति॥ तदात्रैवर्णिकमंतरंकृत्वातेनकारयितव्यं। नतुसाक्षात्
प्रत्युत्थानार्हस्यापिवृद्धगुर्वादेःप्रत्युत्थानंनकार्यंअभिवादनंच। उदकमध्येप्रवेशनंनकार्यं। त्वक्सुदकधारणसंयोगोवर्ज्यः। कोमलवदे
त्तनपरुषंसंस्कृतावाचंवदेत्॥ अन्नदानपरांस्त्यांवाचंवदेत्॥ मनुःनप्रत्यक्षनाम्नावक्षीनचनक्षितेत्यर्हनासंभाषमाणोब्रूयाद्विचक्षणेति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरैरिति॥तथालोमनः कृष्णाजिनस्पर्शापनसमासनमाच्छादनं चेति तथा वृत्तिविहिंनि ष्ठीवनंहसनमववर्षणंदंताविकरणमवेक्षणद
र्शानमपांगाहनंहोमेनतं चेति॥नक्तं मूत्रपुरीषेकुर्याद्यदिदिवाच्छायायांयदिहस्तेदपिधायमुत्रमिति॥आश्वलायनः॥अथसत्रिधर्मा
दीक्षणादिपिच्याणांदैवानांचधर्मीणांप्राकृतानांनिवृत्तिः सर्वशाश्ववर्जयेयुग्रामचर्यासारणंविहृतशयनंस्त्र्यामिहाममतार्याभिभाषणा
मन्ततंक्रोधमप्रागाहनमभिवर्षणमारोहणंचवृक्षस्यनावोवारथस्यवाग्दीक्षितासोपदमुभौसुत्वंतसमासिद्धाः पूर्वारंभणमतितपू
तरंवासार्द्धसाम्येयथावायानत्रगीतवादित्रानन्याश्वानत्योपचारान्नवैनानाहिवेदिसनेभ्योश्रावयेयुरिति॥सायंकालेशालायामेवोप
वेशनंकर्त्तव्यं।नत्वितस्ततोगमनंप्रातः संध्याकालेचस्वापोनकार्यः नुत्थायोपवेष्टव्यं॥अस्यासनान्तरस्यापराधेपञ्चपिप्रायश्चि
त्तंकिमपिनास्तितथाप्ययंनियमोवश्यंपालनीयः॥अथवास्यमस्यातिक्रमेअनेकयजमानकेपरस्परमुपहवप्रार्थनंकार्यंदीक्षिता
उपहवयध्वमितेवं।अग्निष्टोमादावेकयजमानएतन्नियमातिक्रमेपत्न्यानुपहवप्रार्थनंप्रायश्चित्तंपत्न्युपहवयस्वेतिसावोपहूत
इतिप्रुसोतितथार्दतधावननित्यस्नानाग्निहोत्रावश्यहोमवैश्वदेवतर्पणसंध्योपासनपवनदानादिकंकिमपिनकरोतीति॥ ॥तत्र८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प दीक्षामध्ये एवं नियमयुक्त आस्तो तत्राग्निष्टोमे बहवो दीक्षापक्षाः तद्यथा एका दीक्षा तिस्रो दीक्षाः चतस्रो वा द्वादश वा अपरिमिता वेति ॥ अत्र
कठसूत्रं ॥ पुण्याहे दीक्षा पर्वणि सुत्या ॥ अमावास्यैवासंस्थिते दीक्षा पुण्याहे सुत्येति ॥ मानवे च अमावास्यायां दीक्षा तथा वाय । (वेति,
सुत्या स्यादिति ॥ लाट्यायनः ॥ उदगयन पूर्वपक्षे पुण्याहसंनिपाते यज्ञकालो न देशे प्रथमायां पूर्वपक्षस्य दीक्षेत दृष्ट्वा वा नक्षत्रयोगं ते
षामेका दीक्षा न देशेति तिस्रश्चतस्रोऽपरिमिता वा तिस्र उपसद इति ॥ आपस्तंबः एका दीक्षा तिस्र उपसदः पंचमीं प्रसुतस्तिस्रो वा दीक्षा
स्तिस्र उपसदः सप्तमीं प्रसुतश्चतस्रो वा दीक्षास्तिस्र उपसदोऽष्टमीं प्रसुतो मावास्यायां दीक्षा यजनीये वा पौर्णमास्यां यजनीये वा सुत्यम ११
हरेतद्वा विपरीतमिति ॥ अतो दीक्षासु यूपच्छेदनं । दीक्षासु महावीरसंभरणं । दीक्षासु वनीवाहनमित्येवमादि यद्दीक्षामध्ये विहितं कर्म
तदेकदीक्षापक्षे दीक्षितोऽयमिति प्रैषसमनंतरं प्रागस्तमयाद्घटिका न्नः संभवति तदा यूपच्छेदनं महावीरसंभरणं च कार्यं । नो चेद्वा
विसर्गानंतरं रात्रावपि कार्यं ॥ तत्र यूपच्छेदने विशेषः । आज्यशेषमादाय यूपं प्रतिगमनं खादिरो यूपः पंचदशारत्निपर्यंता दशालप्त
चतुर्दशारत्निवर्जितः समः । ननिकृष्टवक्रश्वाग्रोपनतः ॥ अभिमंत्रणादिसूत्रेहनित्यत्वं तं कर्तव्यं ॥ अथवा इध्मानीमेवाज्यं गार्हपत्ये संस्कृत्या

ऽमरणीवादायपक्वसमीपेगत्वाऽपनसमीपेग्निं मथित्वा तत्र यूपाकृतिं कृत्वाऽपाभिमंत्रणादिस्वनिष्पन्नं कुर्यात्॥ होमांते समथितो-
ग्निर्लौकिको भवति॥ पुथमपयज्ञे पि धोवि यस्य विकल्पे न प्रवर्ग्यो भवति तेनाद्वैव महवीरसंभरणमप्युच्यते ॥ दीक्षासु महावीरत्वनरौहि-
णकपालानां निष्पादनं करोति तत्र युक्तिपजमानौ दक्षिणत उपविशतः॥ ततोनंतः पात्ये वक्ष्यमाणान् संभारान् प्राक्संस्थानुदक्संस्थान्वा
निदधाति मृदं मृत्पिंडं वल्मीकवपां वराहविहतं मृत्कटो वातमृत्तिकां॥ पूतीकान् रौहितपुष्पाणि अजादुग्धं गवेधुकाः॥ एतानि प्राक्सं-
स्थान्युदक्संस्थानि वास्थापयित्वा एतेषामुत्तरतः कृष्णाजिनं प्राग्ग्रीवमुत्तरलोम निदधाति॥ औदुंबरीं वैकंकतीं वा अरत्निमा-
त्रीमभ्रिं चोत्तरतो निदधाति॥ ततोऽध्वर्युर्देवस्य त्वेत्यभ्रिमादाय सव्ये पाणौ निधाय दक्षिणेन हस्तेन तामभिमाद्धम्य युंजते म-
न इति संहितास्वरेण जपति॥ ततो द्यावापृथिवी इति मंत्रेण मृत्पिंडं परिगृह्णाति तत्र दक्षिणहस्ते नाभि सहितेन दक्षिणपा-
र्श्वे पिंडं परिगृह्णाति॥ उत्तरपार्श्वे केवलेन सव्यहस्तेनैव॥ एवमुभाभ्यां हस्ताभ्यां मंत्रोक्तपिंडं परिगृह्योत्तरतः पूर्वमेवस्थापि-
ते कृष्णाजिने तं पिंडं निदधाति॥ ततो नैवप्रकारेणोभाभ्यां हस्ताभ्यां देवी वम्री इति वल्मीकवपामादाय कृष्णाजिने निदधा-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति॥ एवमेवेंद्रस्यौजस्येतिपृषातकानादायतत्रैवनिदधाति॥ एवमेवमखायेतिपयःस्थालीसहितमेवादायतत्रैवनिदधाति॥ ततस्तू
ष्णींगवेधुकाष्टकेनैवहस्तेनादायकृष्णाजिनेनिदधाति॥ ततः कृष्णाजिनेसंभृतानन्यान्वल्मीकवपादिसंभारान्मखायेतिसहै
वसर्वानभिमृशति॥ ततोध्वर्युस्तस्मात्प्रदेशादुत्तरस्यांदिशिचतुरस्रमर्थत्वरिमाणांप्राग्द्वारंपरिहृतंकृत्वातन्मध्येसप्तसंस्का
रान्कृत्वासिकतानुपकिरति॥ अथवाअत्रकरणोपदेशाभावादप्सुदीक्षार्थनिष्पादितेएवंसंस्कारान्सिकतोपकिरणंचकरो
ति॥ ततआगत्याध्वर्युप्रतिप्रस्थातृनेष्टुनेतारः कृष्णाजिनंपरिगृह्यब्रह्मयजमानाध्वर्यवः॥ प्रैतुब्रह्मणस्पतिरितिजपंतःप
रिहृतंप्रतिगच्छंति॥ ततःपरिहृतंप्रविश्याध्वर्युर्मखायेतिमध्येसंभारान्कृष्णाजिनस्थानेवनिदधाति॥ ततोजाघ्नीरंगवेधुका
श्चात्रनिधायवल्मीकवपावराहविहतपूतीकैःसहमृत्पिंडंसंसृजतिमखायेतित्रेतिवितिकंडिकापठितेनद्वितीयेन। ततो
मृत्पिंडेनसहसंभारान्संसृज्यतस्मान्मृत्पिंडात्महावीरकरणार्थंतत्सर्वंमृदमादायप्रैतुसंबंधिनातृतीयेनमखायेत्यनेन
महावीरंकरोति॥ कीदृशंप्रादेशमात्रमूर्ध्वंआसेचनवंतंगर्तवंतं। मेखलावंतं। मध्यसंगृहीतं। मेखलायाऊर्ध्वमपित्र्यंगुलं।

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवंविधं निष्पाद्य मखस्य शिरोसीत्यनेन महावीरकरणार्थं मृदादानं कुर्वंति। उखाकरणे यथा तत्रोनिष्ठिताभिवर्त्तनं। अनेनैव प्रकारे
ण परौ द्वौ महावीरौ करोति। ततो यस्याभिमर्शने मखस्य शिरोसि मखाय त्वा मखस्य त्वा शीर्ष्णे इत्येता वस्यर्थे तं मंत्र इति विशेषः॥ ॥
ततः स्रुक्पुष्कराकारे द्वे पिन्वने करोति तूलीं॥ ततो वर्तुले द्वे रौहिणकपाले पाणिना लमात्रे तूलीं करोति॥ ततो वशिष्टां मृदमु
पशयासंज्ञां कृष्णचर्मन मृगुग्मे प्रदेशे स्थापयति। ततो महावीरान् गवेधुकाभिः श्लक्ष्णायति घर्षणेन कुमारान् करोति मखाये
ति त्रिभिर्मंत्रैः प्रतिमंत्रं। एतेन चयो पि मखस्येत्यस्यामंत्रे पठिताः॥ ततस्तूलीं पिन्वने रौहिणकपाले च गवेधुकाभिः श्लक्ष्णायति।
ततो दक्षिणाग्नेरग्निमानीयतच्चाश्वशकृत्तुषे पं कृत्वा तदुत्पन्नेन धूमेन महावीरान् क्रमेणोपरि धूपयति॥ अश्वस्येति त्रिभिः प्र
तिमंत्रं। अथवा धूमायमानं शकृदेवहस्तेन गृहीत्वा भूमिष्ठानेव महावीरान् सर्वतः परिवर्त्तनेन धूपयति॥ ततस्तूलीं पिन्वने
रौहिणकपाले च धूपयति॥ ॥ततः कृत्वाग्निनमपसार्य चतुरस्रं खात्वा तत्र दर्भादिकं प्रयणमास्तीर्य तिष्पादन क्रमेण
महावीरान् धोमुखान् दधाति॥ ततः श्रपणेनावणाद्यपर्वाहुते नैव दक्षिणाग्न्याग्निना दीपयति॥ अथवा महावीराणामादी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प मरुतो यैति त्रयो मंत्राः॥ कूत्वेप्रदहने विधानात्। अतो नावधाने विहिता इति पूर्वतनग्रन्थदर्शिताः॥ अथवा तत्कालमेवाग्निं मथित्वा
तत्कालमथितेनाग्निना महावीरादीनां धूपनधूपने॥ अघपामपमार्थेन्द्रानानुकृत्वाऽज देवत्येति प्रतिमंत्रं महावीराननुद्वरयति॥
तूष्णीं पिन्वने रौहिणकपाले चोद्वरयति॥ एषां प्रदहनोद्वरणादि वैकर्तव्ये॥ ततो महावीरान्सर्वायैति प्रतिमंत्रं अजादुग्धेनाव
सिंचति॥ तास्ते मंत्रा अज देवत्वे स्वत्रकंडिकायां पठिताः॥ ततस्तूष्णीं पिन्वने रौहिणकपाले वा दुग्धेनावसिंचति॥ ततो महा
वीरादीनामसंचरे निधानं महता प्रयत्नेन रक्षणं कार्यं। भेदे प्रायश्चित्तस्य वक्तृत्वात्॥ ॥इति षड्विंशाध्यायस्य प्र
थमा कण्डिका॥ ॥इति महावीरसंभरणं॥ ॥अथ प्रायणीयेष्टिः॥ ॥तत्राग्न्यन्वाधान ब्रह्मवरणा व्रतग्रहणदक्षि १३
णादानव्रतविसर्गाणामभावः चतुरासनं। ब्रह्मोपवेशनं। प्रणीताप्रणयनं। आहवनीयस्यैव परिस्तरं॥ पात्रासादने दशगवाः
कपालस्थाने चरुस्थाली। अर्थवती। तूपवेषान्तर्धानकटपूर्णपात्रकर्मापवर्गाणामभावः। शेषं प्रकृतिवदासाद्यते॥ अथ
दशकाष्ठक इध्मः ऋतावदानस्थाने मेक्षणं॥ स्फ्योपहितपात्रीकरणादि। कुक्कुटाहननं ग्रहणे अदित्यै जुष्टं। प्रोक्षणं।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदित्यै त्वानुवृषं प्राणदानेऽदितिं गच्छ। वरुधर्मी अत्वारं भरणीयायामृक्ताः। पंचदशेन वज्रेणोत्सवद्राधने। तुन्नमप्र-
याजे। इदमग्नये सोमाय पथ्यायै स्वस्तये ऽग्नये सोमाय सवित्रे दित्यै देवेभ्य इत्यादि। ततआज्यभागौ। ततऽपांशुयाज-
वदाज्येनवत्वारो यागाः। ध्रुवायाआज्यं चतुरवत्तमवदाय यावदापर्कर्तव्याः। अग्नीषोमीयात्प्रागुपांशुवररापक्षे सर्वमु-
पांशुनवदति॥ मंद्रप्रापरगी यायामित्येन तस्मिन्नपक्षे प्रधानयागे देवतापदमात्रमुपांशु॥ अन्यत्सर्वं मंद्रस्वरेण पथ्यायै स्वस्त-
येनुब्रूहि॥ पथ्यां स्वस्तिं यज। इदं पथ्यायै स्वस्तये। अग्ने स्तन्नरस्यां होमः॥ अग्नयेनुब्रूहि॥ अग्निं यज। इदमग्नये। पूर्व-
स्यां होमः सोमायानुब्रूहि। सवितारं यज इदं सवित्रे। प्रतीच्यां होमः॥ ततश्च हृणादिति यागः मंद्रप्रापरगी यामितिप-
क्षेमदितिपदमुपांशु। अस्यैव यागस्य प्रापरणी शब्दवाच्यत्वेनात्रप्रधानत्वात्॥ पथ्यास्वस्त्यादिपदं तु मंद्रस्वरेणैव प्र-
योज्यं आज्यभागवदंगयागत्वात्। अंगत्वेप्युपांशुयाजविकारत्वात्। ब्रह्हने कीर्तनं भवत्येव। अदित्या अनुब्रूहि। अदि-
तिं यज। इदमदित्यै मध्ये होमः। ततः स्विष्टकृदादिप्राशित्रादि सर्वं ब्रह्हने पथ्यायाः स्वस्तेरग्नेः सोमस्य सवितुरदित्यानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञेति। यथा स्वस्तिरग्निः सोमः सवितादितिस्त्वमपहृदं त्विति॥ प्रस्तरहोमे इदमग्नये सोमाय पथ्यायै स्वस्तये ग्नये सो॰
माय सवित्रे दित्यै देवेभ्य आज्यपेभ्यो [illegible]होत्रायेति। शंयुं तं कर्म भवति। ततत ऊर्ध्वं तः पत्नीसंयाजादिकर्मापवर्गांतस्या
र्थस्य कर्ममात्रत्वात्राभावः। वेद्यालंभस्तत्र भवति। शंयोर्वीकसहभावात्। स यत्र शंयोराह तदभिमृशतीति॥ ततो वेदयो
क्तविमोकः। चहस्थालीमेक्षणं च युमदुष्टं॥ अथवा चहस्थालीं प्रक्षाल्यो दनीयार्थं स्थापयति॥ मेक्षणी वर्हिषोस्तन्नावनु
प्रहरणं करोति॥ तत्र स्वकाले वर्हिषः॥ पेक्षणस्य शेषसमाप्ते आगंतुत्वात्॥ ५ ॥ पंचमी कंडिका॥ ॥ ततः प्रति
प्रस्थाता शालायाः सोममपादायोपरवदेशे ऽपर[illegible]स्थाने रक्ते आनडुहे चर्मणि प्राग्ग्रीवे उत्तरलोम्नि न वपति। सोमवि
क्रयीं तं सोमं पर वृशोव खंडयति॥ स नु कुत्सितकर्मकारी चैवर्णिकः कश्चिन्न॥ शूद्रो वा। ब्रह्मणः प्रायणीये व्याप्त
त्वाद् ब्रह्मपुरुषो ब्राह्मणाच्छंसी तत्र सन्निधौ दक्षिणात उपविशति॥ उपरवदेशस्य पुरस्तादेकऽदकुंभश्च स्थाप्यते॥ ततो॰
ध्वर्युः शालाद्वाराण्यपिधाय ध्रौवमाज्यं चतुर्वारं जुह्वां निनयति॥ ततो वेदिस्तनवर्हिरवस्तरणेन हिरण्यं वध्वा जुह्वां घृतम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्मे एषा तइत्यवदधाति॥ ततोजुहसीतिमंत्रेणानदाज्यमाहवनीयेसमित्पूर्वकं जुहोति। इदंवाचे॥ इदंजुवेइतिवा॥ ततः प्रक्रम
सीत्यनेनजुह्वाहिरण्यमुद्धृत्ययेनतृणेनहिरण्यंबद्धमासीत्तत्तृणं वेद्यांबर्हिर्मध्येनिदधाति। ततोहिरण्यंसत्रेणावधृत्यध्व
र्युः। सत्रेणाहिरण्यंबंधनानंतरंप्रायणीयाशेषसमाप्तिः। बर्हिर्हेमिः पक्षे। पक्षेवेद्यांनुहृत्यान्यत्रस्थापनं। प्रणीताविमोकः
राक्षसभागः। भागावेक्षणंभागप्राशनं। बर्हिर्हेमपक्षेमेक्षणस्याहवनीयेप्रक्षेपः। चरुस्थाल्याः प्रक्षालनं। बर्हिस्थापनप
क्षेमेक्षणस्यमार्जनंकृत्वास्थापनं। चरुस्थालीचसलेपैवस्थापनीया। एतच्चयमुदयनीयेकसर्थंयत्तेनरक्षणीयं। त
तोगार्हपत्येआज्यंसंस्कृत्यस्रुक्स्रुवंसंमृज्यपुनर्ध्वर्युर्गृहीतंगृहीत्वान्वारभस्वयजमानेतियजमानंप्रत्याह॥ ततः शाला
याद्वारेणमुद्घाटनं॥ ततोध्वर्युयजमानौशालायाःपूर्वद्वारेणनिष्क्रामतः। द्वाराद्दक्षिणस्यांदिशिसोमक्रयणीएकवर्णा
वत्सतरीतिष्ठति॥ कीदृशी। अलक्षिता। अनंकिता। अव्यंगा॰ अनंगहीना॰ प्रवीताऋषभेणाभुक्ता। अबद्धैवारज्जुबद्धा
वभ्रुः पिंगला। वभ्रुवर्णापिंगाक्षी। तस्याअभावेअरुणाअवक्रागानदभावेरोहिण्यप्युपेताक्षीशरीरेणारक्ताअरक्ताक्षी॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

एवंविधां सोमक्रयणीमध्वर्युयजमानौ सन्निधावागछतः। तत्राध्वर्युस्तामभिमंत्रयते चिदसीत्यादिपुनरेहीत्यंतेन। ततः प्रतिप्र
स्थात्रादिनाऽदीक्षितेन हिरंण्यं प्रतिदीयमानां सोमक्रयणीमध्वर्युयजमानौ वस्व्यसीत्यनुगछतः। सोमक्रयं त्वया दक्षिणपूर्वपाद
स्यैक[redacted]स्य षट्पदान्यतिक्रम्य सप्तमं पर्युपविशंति॥ षट्पदान्यनुतिः क्रामति दक्षिणपूर्वपादस्येति मानवे॥ पर्युपवेशनं
चैवं। दक्षिणतो वु स यजमानो पश्चादध्वर्युः। उत्तरतः प्रतिप्रस्थाताने ष्टा च। दक्षिणापरस्यां पत्नीति। बुल्लाचन्द्ररसीत्यस्यां हिरण्य
वत्यामाहुतायां सर्वेभ्यो दक्षिणा एव दक्षिणा दिगाश्रितएवानुगछति क्रयथावत्। अपर्वेषु कर्मसु क्रियमाणेषु वाग्यतश्च भ १५
वेत्॥ अत्रतू ष्णीं बुल्लण आसन संस्कारः। ततोऽध्वर्युः सप्तमे सोमक्रयणीपदे हिरण्यं निधाय तस्मात्र वद्वं वर्तते तत्परिस्तो
र्यशालायां यत्र तु र्गृहीतमाज्यं गृहीत्वा हस्तधृतं तस्मिञ्जुहोति॥ आदित्यास्त्वेति॥ इदमदित्यै॥ इदमाज्यायेति वा॥ आदित्या
ज्यमित्युक्तत्वात्॥ अन्वारंभश्च होमांतः॥ ततः स्फ्येन तत्पदं त्रिः परिलिखति॥ तत्रास्मेरमस्वेति सकृन्मंत्रेण द्विस्तूष्णीं पू
र्वपरिलिखनस्योपर्येव परिलिखति॥ ततो हिरण्यं हस्ते गृहीत्वा स्फ्येन पदमुद्धिख्येत्यास्मापावपत्यस्मे तं वंधुरिति। ततः प

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दस्यान्तेउदकं निनीयाध्वर्युर्यजमानायपदंसमर्पयति त्वेराय इति ॥ ततोयजमानोमेराय इति स्थालीस्थंपदं प्रतिगृह्णाति ·
ततोध्वर्युर्मर्मवयमित्यात्मानं हृदयप्रदेशेसंस्पृशति ॥ उदकोपस्पर्शनं ॥ ततोयजमानस्सकाशात्पदं हृत्वाध्वर्युः पत्न्यैसमर्प
यति ॥ ततोनेष्टा । ततोराय इति पत्नींवाचयति ॥ ततोध्वर्युःसोमक्रयण्याःसमीक्षमाणांपत्नीं समख्ये इति वाचयति । त
त्पदंकृत्विजगुप्तेपत्नेनस्थापयीत्वारक्षणीयंयथानयाति । ततोध्वर्युर्हस्तौप्रक्षाल्यानामिकायांहिरण्यंवध्नीते ॥ ॥
षष्ठीकंडिका ॥ ॥ ततोयजमानपुरुषंसोमोपनहनमाहसोमपर्याणहनमाहरोष्णीषमाहरेति प्रेष्यति । ततएवंप्रेषितोयज
मानपुरुषोयददतिशयेनशोभनवासोभवति । तत्सोमोपनहनं सोमबंधनार्थमाहरति ॥ सोमपर्याणहनाख्योष्णीषंचयथास
पत्नेआहरति ॥ ततोध्वर्युर्यजमानोवासोमोपनहनंक्रियप्रदेशंप्रतिहरति ॥ अस्मिन्कालेवोपरवदेशेसोमनिवपनादिपर्व
शोवरखंडनांतं ॥ प्रतिप्रस्थाताचसोमपर्याणहनमुष्णीषंचक्रयप्रदेशंप्रतिहरति ॥ ततोब्रह्मयमानाध्वर्युप्रतिप्रस्थात्रादयः
सहैवोपरवदेशस्थंसोमंप्रतिगच्छंति । ततोगमनेप्रारब्धेप्रारब्धेएवतेगायत्रौभाग इति वायजमानंवायजमानंवाचयति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

ततः सोमसमीपे ब्रह्मयजमानौ दक्षिणातउपविशतः। अध्वर्युः प्राङ्मुखउपविश्यास्तकोसीति सोममालभते॥ यजमानस्यालं
भद्रतिहरिस्त्वामितः॥ अतऊर्ध्वं सोमविक्रयपर्यं सोमं नछिनत्ति। यो वशिष्ठस्तावान्लतारूपदावतिष्ठते। एकोसोममध्ये पति
तानां निरसनं कुर्वंति नापरे॥ ततोध्वर्युः सोमोपनहने अभित्यमितिमंत्रेण दशकृत्वः सोमं मिमीते। ततो मध्यमाङ्गुष्ठाभ्यां
मंगुलीभ्यां चतुर्थं मिमीते। ४ ततस्तर्जन्यंगुष्ठज्यतिस्तभिस्तृतीयवारं मिमीते ४ ततो नामिकाङ्गुष्ठज्येकया कनिष्ठिकया पंच
मं॥ ततः पुनरेकयैव कनिष्ठिकया षष्ठं। ततो नामिकया कनिष्ठिकया च सप्तमं। ततो मध्यमानामिकाकनिष्ठिकाभिर १६
ष्टमं॥ ततस्तर्ज्जनीसहिताभिश्चतसृभिर्नवमं॥ ततः सर्वाभिर्दशमं। दशकृत्वोपि मंत्रावृत्तिर्भवति। ततो वशिष्ठं सर्वं सो
ममंजलिनागृहीत्वा सोमस्योपर्यध्यावपति॥ ततः सर्वतः सोमोपनहनस्यांतान्संगृह्योष्णीषेणावध्नाति प्रजाभ्यस्त्वेति॥
ततोंगुल्यामध्ये विवरं करोति प्रजास्त्वानुप्राणंत्विति॥ ततस्तं सोमं सोमविक्रयिणोप्रयच्छति॥ ॥सप्तमीकण्डिका॥ ॥त
तोध्वर्युः पंचकृत्वः सोमं पणते॥ कलाशफाभिमिः पंचवारं सोमविक्रयिणः सकाशान्याचनइत्यर्थः। तत्रपर्वं सोमविक्रि

Mahendra Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यिन् क्रय्यस्ते सोमो राजा इति सोमविक्रयिणमध्वर्युः पृच्छति ॥ ततः सोमविक्रयी क्रय्य इत्याह ॥ ततोध्वर्युस्तं वैते क्रीणानीति सो
मविक्रयिणं पृच्छति ॥ ततः स क्रीणाहीति प्रत्याह ॥ ततोध्वर्युः कलया ते क्रीणानीति सोमविक्रयिणं याचते ॥ ततः सोमविक्रयी
भूयो वा अतः सोमो राजार्हतीति प्रत्याह ॥ ततोध्वर्युर्भूय एवात इत्या रभ्यत स्येवाजिनमिस्यं तं पठित्वा ततः शफेन ते क्रीणानीति
सोमविक्रयिणः सोमं प्रार्थयते ॥ ततः सोमविक्रयी पुनर्भूयो वा अत इति प्रत्याह ॥ पुनरप्यध्वर्युर्भूय एवात इति तस्यैवाजिनमि
त्यं तं पुनः स्मार्द्धं तं ते क्रीणानीति सोमविक्रयिणं याचते ॥ ततः स भूयो वा अत इत्येवं प्रत्याह ॥ पुनरध्वर्युर्भूय एवात इति वाजिन
मित्यं तं पुनः स्मा गवा ते क्रीणामीति सोमविक्रयिणं पुनः कथयति ॥ ततः सोमविक्रयी क्रीतः सोमो राजा वपांसि पुत्रू हीत्यध्वर्यु
प्रत्याह ॥ ॥ ततोध्वर्युर्भूंङ्त इत्यादि सोमविक्रयिणं प्रत्याह ॥ ततोध्वर्युर्हिरण्यमालभस्वेति यजमानं प्रत्याह ॥ ततो यज
मानो हिरण्यमालभते ॥ ततो त्वारब्ध हिरण्यं यजमानं शुक्रं त्वे त्यमुं मंत्रं वाचयति ततः सग्मेत इत्यनेन सोमविक्रयिणं हिर
ण्यसंदर्शनेन प्रलोभयति । ततो स्मेत इति हिरण्यं यजमानसंनिधाने निदधाति ॥ ततः सोमविक्रयीत यजमान सन्निधौ मु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

कं हिरण्यं गृह्णाति॥ ततो जां पुरस्तात्प्रत्यङ्मुखीमवस्थाप्याजामालभस्वेति यजमानं प्रुयाह्॥ ततो यजमानो जामालभते॥ त
तो जायाः कृतालंभं यजमानं तपसस्तनूरिति वाचयति ततः सव्येन हस्तेन। जां सोमविक्रयिणे समर्पयन्दक्षिणेन हस्तेन
मित्रो न एहि इति सोममादत्ते॥ ततः सोममादायागते ध्वर्यौ यजमानउत्तिष्ठति न वा॥ ततो ध्वर्युर्यजमानस्य दक्षिणऊरौ वासः
प्रत्युद्गतं उस्रोहमिति सोमं निदधाति॥ ततो यजमानः सोमविक्रयिणं विलोकयन्स्वानभ्राजेति स्वरेण जपति॥ ततो नु सो
मक्रयणाननुदिशतीति पद्यते॥ सोमः क्रीयते यैर्गोहिरण्यादिभिर्द्रव्यैस्तान्सोमविक्रयिणे निवेदयतीत्यर्थः। ततो १७
यजमानउष्णीषं विस्रंस्य शिर उद्घाटयति॥ पत्नी चोष्णीषं जालं वा विस्रंस्य शिर उद्घाटयति॥ ततः सोमविक्रयिणः स
काशाद्धिरण्यं बलाद्गृहीत्वा सोमविक्रयिणं विचित्रेण वंशदंडेन कुट्टयति न वा॥ ततो ध्वर्युर्दीक्षितदंडं मैत्रावरुणाय समर्प
यति मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा प्रयच्छामीति॥ ॥ अथवाग्नीषोमीयएव यजमानवरणानंतरं दंडदानं॥ नेद
नीं॥ अष्टमां कंडिका॥ ॥ ततो यजमानो हस्तेन सोमपोटलकं गृह्णाति॥ ततो ध्वर्युर्गृहीतसोमं यजमानं परिमाग्न इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाचयति ततो यजमानः प्रतिशिरसि पाणिं मंतर्द्धाय तस्य पाणेरुपरि सोमं कृत्वो दायुषेत्युत्तिष्ठति ॥ ततो यजमानः प्रतिपंथा
मित्यनेन दक्षिणतः स्थापितमनः शकटं प्रतिगच्छति तत्स्थानः सोमक्रयार्थमागच्छद्भिः सहानेयं ॥ तथा च मनुः ॥ सच्छदिष्केणा
नसा राजानमच्छयंतीति ॥ आनीय च सोमक्रयदेशस्य दक्षिणतः प्राङीषं छामार्थमुपरिकलंजादिना छादितं युगशम्यायो
क्रोपलंभनादि सर्वांगोपेतं स्थाप्यते ॥ तस्य चानसः प्रागान्तवेटकोपवेशनस्थानात् द्वे फलके उद्धृत्य निःकास्यते ॥ ततोध्व
र्युरस्मिन् शकटे कृष्णाजिनं प्राग्ग्रीवमुत्तरलोमास्तृणात्यदित्यास्त्वगसीति । ततस्तस्मिन् कृष्णाजिन अदित्यै सदआसीदेति सो
मं निदधाति ॥ ततः सोममालभस्वेति यजमानं प्रत्याह । ततो यजमानः सोममालभते । तत आलब्धसोमं यजमानं प्रत्याह ·
ततो यजमानः सोममालभते । तत आलब्धसोमं यजमानं अस्तभ्नाद्यामित्यमुं मंत्रं वाचयति ॥ ततोध्वर्युर्वनेषु वीति सोम
पर्याणहनेन पटकुटीस्थानीयेन सोमं परितत्य ासमंताद्वेष्टयित्वा सा सह यजमानस्यासनकृष्णाजिनयोर्मध्ये अन्यतर
तकृष्णाजिनं सूर्यस्य चक्षुरिति मंत्रेण शकटस्य पुरस्ताद्भागे वंशादिकमारोप्य तस्मिन्नासजति ॥ अवलगयति ॥ यदि यज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मानस्यासनार्थमेकमेव कृष्णाजिनं भवति तदा तस्य कृष्णाजिनस्य ग्रीवां छित्वा तथैव पुरस्ताद् वलगयति॥ ततऽस्त्रावेत॰
मिति दक्षिणामनड्वाहमनतसियुनक्ति। न। ताने नैवमंत्रेणोत्तरं युनक्ति। ततः सुवुसलणो यस्मान्नुदेशादनसः फलके नु॰
द्धृते तस्मिन्नुदेशे शकटस्योपयोरंतराले भूमावेव निष्कन्पला शश्चाखेयानड्वाहौ गमनाय प्रेरयति॥ वुला च सोमक्रयानं
तरं प्राङ्गतिक्रम्य पूर्वेण शकटं परिक्रम्यापरेणावापरिक्रम्य शकटस्य दक्षिणे भागसन्निहितएवानुगच्छति शालायां सो
मनिधानं यावत्॥ ततोऽध्वर्युः शकटं पूर्वेण प्रदक्षिणं परीत्य पश्चाज्जत्वा अपालं गृहीत्वा सोमाय क्रीतायानुब्रूहि होता १८
रं प्रेष्यति सोमायपयुह्यमाणायानुब्रूहीति वा अपालं वशा हेनपश्चादावह्नारजु रुह्यते यथा अवतारैना प्रवर्त्तमानं वि
धार्यत इति कर्कः॥ पश्चाज्जागेव ह्नलं यमानं का बं अपालं वशा हेनो चते। येनात्वं प्रदेशमारोहतः शकटस्य स्तंभने
न पर्यावर्त्तनं वार्यत इति हरिस्वामिनो याज्ञिकाश्च॥ ततो दीक्षितः सोमममन्वारभते प्रेषदानसमकालामेव। ततो होता प्र
थमायामृचि त्रिः पठितायां होत्रध्वर्युः यजमानादयः शकटमनुगच्छंतः प्रथमं प्राच्यां दिशि किंचिद्गत्वा प्रदक्षिणमावृत्य त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थैवशाकटं पुरस्कृत्य पश्चिमाभिमुखाः शालां प्रतिगच्छन्ति ॥ शालां प्रतिगमने प्रारब्धे अध्वर्युर्भद्रो मेसीति यजमानं वाचयती
ति ॥ ततोध्वर्युः शालां प्रतिगच्छन्नेव यमेवा वसु ब्रुह्मण्या माह्वयति सुब्रह्मण्य एव सुब्रह्मण्यामाह्वयतीति ॥ हरिस्वामिनः ॥ त
त्र सुब्रह्मण्यो ३ ८ सुब्रह्मण्योमित्यभ्यस्तं त्रिः पठित्वा इंद्रागच्छेत्यादि सकृत्पठति । गौतमब्रुवाणेत्यस्यांते अहे सुत्यामागच्छ
मघवन्नित्यादि आगच्छेत्यंतं पठन्ति ॥ शातमकृवाशोखांतरीयत्वान्निगदो लिख्यते ॥ सुब्रह्मण्यो ३ सुब्रह्मण्यो । ३ सुब्रह्मण्यो ।
३ सुब्रह्मण्यो । ३ सुब्रह्मण्यो । ३ सुब्रह्मण्यो । ३ इंद्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने । गौरावस्कंदिन्नहल्या
यै जारकौशिक ब्राह्मण गौतमब्रुवाण । अहे सुत्यामागच्छ मघवं देवा ब्रह्माण आगच्छत आगच्छत आगच्छत ॥ ततः शाला
याः पुरस्तात्प्रतिप्रस्थाताग्नीषोमीयं पशुमानीय शाकटसमीपे तिष्ठति कर्णगृहीतं । कीदृशं पशुं । कृष्णसारंगं कृष्णवर्णं व
र्णांतरमिश्रितं । कृष्णवर्णाभावे लोहितसारंगं ॥ लोहितवर्णं वर्णांतरमिश्रितं ॥ ततोध्वर्युरग्नीषोमीयं पशुमालभस्वेति यजमा
नं प्रत्याह ततो यजमानोग्नीषोमीयं पशुमालभते ॥ ततः कृपाश्वालंभं यजमानमध्वर्युर्नमोपि त्रयस्वेति वाचयति ॥ पशौ वने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चरति इदानीमसन्निहिते सति केवलं नमो मित्रस्येति तथा चनमेव कार्यं ॥ केचिदाहवनीयादुल्मुकमग्नीध्रीयपभुसमा
पेआहृत्य पभुमालंभं चवाचनं कार्यमित्याहुः ॥ ततः शालायाः पुरस्तात्समीपे प्राङीषमुदङ्गीषं च । अतः स्थापयि
त्वा तं भनेनानसर्ईषाग्रभागे उपस्तंभनं धारणं करोति वरुणस्योत्तंभनमिति । ततः शम्येन उद्धरति वरुणस्य स्कंभसर्जनी
स्थ इति ॥ ततो ध्वर्युः पृष्ठ्यान्तेनेषु न्नेतार्थ्वआसंदीं शकटसमीपे आहृत्योत्तरतः स्थापयंति ॥ ततो ध्वर्युर्वरुणस्यऋतसद
न्यसी त्वासंदीमभिमृशति ॥ ततो वरुणस्य ऋतसदनमसी त्वासंघां प्राग्नीवमुन्नरलोमकृष्णाजिनमास्तृणाति ॥ व
रुणस्य ऋतसदनमासीदेति कृष्णाजिने सोमं निदधाति ॥ ततऋत्वा रो ध्वर्यादयः सोमासंदीमुत्पाद्य पूर्वद्वारेण शालां प्र १८
विश्य दीक्षितसंवरेणाहृत्वा आहवनीयस्य दक्षिणतः स्थापयंति ॥ शालाप्रवेशकाले च यातेधामानीति यजमानं वाचय
ति ॥ तत आहवनीयस्य दाक्षिणतः सोमसहितामासंदीं स्थापयंति ॥ केचित स्थापितेसोमेन समीपे उदपात्रनिनयनं कुर्वं
ति ॥ ॥ नवमी कंडिका ॥ ॥ इति कात्यायनसूत्रपद्धतौ सप्तमोध्यायः ॥ ॥ अथातिथ्येष्टिः ॥ ॥ ततो वैष्णवनवकपाल:

पुरोडाशो भवति ॥ अत्रानिरुक्तयागपदार्थाः कार्याः। चतुरासनं। ब्रह्मोपवेशनं। प्रणीताप्रणयनं। आहवनीयस्यैव परिस्त
रणं। पात्रासादने। भूर्पाग्निहोत्रहवण्यौ स्फ्यः कपालानि च। शम्याकृष्णाजिनं। उलूखलमुसले। दृषदुपले। पात्री क्षान्त्वं। पवि
त्रछेदनानि पवित्रे। धृष्टिसंवपनोदकं। मदंतीपात्रद्वयं प्रद्वयं प्रत्स्यर्यं। इडकं यजमानस्य। अपरं पत्न्याः। स्थाली आज्यं श्रु
वेदश्च। उदलम ‿ः। एकोनविंशतिरिध्मकाष्ठानि। कार्ष्मर्यमयाः परिधयः। अश्ववालः प्रस्तरः एकस्मौ विधृती। बर्हिः
श्चेति। बर्हिश्चतुष्टयं। स्रुवो जुहूः। उपभृत् ध्रुवा। प्राशित्रहरणे। भ्रूनावदानं। पात्री। इडापात्री। षडवत्तं च। पक्ष्येयोक्तं ॥
यतकुशाः मंथनचतुष्टयं पीठं कुशास्तीर्णं त्रुतपात्रं हिरण्यं। द्वे समिधौ। मुखप्रक्षालनार्घ्यपात्रं च ॥ ततः स्योपहितपात्रीकरणा
दिग्रहणोपत्यध्वर्यो रत्वारंभं करोति। तत्र विशेषः। पंचकृत्वो ग्रहणं। देवस्यत्वसवितुः प्रभ्यां। अग्नेस्तनूरसि विष्णवे त्वा जुष्टं गृ
ह्णामि ॥ अत्र प्राकृतमंत्रे त्वाग्नस्य निहृत्तिः ॥ एवं प्रथमग्रहणं ॥ देवस्यत्वा सवितुः प्रभ्यां सोमस्य तनूरसि विष्णवे त्वा जुष्टं
गृह्णामीति द्वितीयं ॥ देवस्यत्वा सवितुः प्रभ्यां ॥ अतिथेरातिथ्यमसि विष्णवे त्वा जुष्टं गृह्णामीति तृतीयं। देवस्य त्वा श्येनाय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

त्वा सोमभृते विष्णवे त्वेति चतुर्थी। अग्नये त्वा रायस्पोषदे विष्णवे त्वेति पंचमं। चतुर्थपंचमग्रहणयोर्द्दिवस्येति मंत्रेस्य जुष्टं ग
ष्णामीत्यस्य चाभावः॥ ततो भूताय त्वेति शेषाभिमर्शनादि॥ अथवा शालासमीपे शकटं स्थापयित्वा एकस्मिन्वलीवर्द्दे वि
मुक्ते अपरस्मिन्नविमुक्ते एव वाध्वर्युः शालाप्रविष्टपत्नीपुत्रचतुरवत्तनाद्यहविर्ग्रहणं सादनांतं कृत्वा हविष्कृता वाचं विसृ
ज्य वोत्तरमनड्वाहं विमुच्यासंघाहरणाभिमर्शनादिप्रपादनांतं कुर्यात्॥ ततः पवित्रच्छेदनादि कंडनादि वा कर्त्तव्यं॥ उभय
था पि शास्त्रांतरे दर्शनात्॥ प्रोक्षणं विष्णवे त्वा जुष्टमिति॥ नवकपालेषु चतुर्थकपालोपधानानंतरमवशिष्टानि पंचवि २०
भज्य त्रीणि दक्षिणतः। द्वे उत्तरतः। उपसर्जन्यधिश्रयणानंतरं अध्वर्युर्यजमानमदंती गार्हपत्येधिश्रयति॥ पत्नीमदं
तीर्दक्षिणाग्नावधिश्रयति॥ मदंतीशब्देनानुपस्थ्यंते। अत आरम्भमुष्टिविसर्गपर्यंतं यत्किंचिदुदककार्यं क्रत्वर्थं प्र
णीताप्रणयनप्रोक्षणोदकोपस्पर्शनाचमनादिकं पुरुषार्थं च नैमित्तिकस्नानशौचाचमनादिकं तत्सर्वं मदंत्युदकेनैव
कार्यं। आज्यग्रहणे तिलस्वपि स्रुक्षु चतुर्गृहीतान्येव गृह्यते॥ आहवनीयकल्पनानंतरं मुल्मुकोद्वहनाभावः। प्राणाप

नेविष्टुंगछ। हवीष्यासाद्यात्मालंभोदकालंभांतेसकलादानादिहोमांतमग्निमंथनंवैश्वदेवपर्श्ववत्॥ ततोहोतृषदन
करणादिनानुयाजसमित्परिशेषणां॥ सप्तदशेनबर्हिणोत्यववाधनंइदमग्नयेसोमायविष्णवेदेवभ्यइत्यादिउत्तमप्रया
जत्यागे। ततआज्यभागौ। ततोवैष्णवोयागः। विष्णवेअनुब्रूहि। विष्णुंयज। अत्रापिमंद्रतरमातिथ्यायामितिपक्षेदेव
तावदमात्रसुपांशु॥ प्रागग्नीषोमीयात्सुपांशुपक्षेसर्वमुपांशुभवति॥ ततःस्विष्टकृदादि। प्राशित्रादिसर्वं। पवित्रप्रति
पत्तंतेयजमानस्यहुतपात्रंवेदौनिधायतस्मिन्प्रुष्ट्यादिक्रमेणसर्वैर्ऋत्विजआप्तयेत्वेतिमंत्रेणसकृत्कृद्वौचमाज्यंस्वलंस्व
लंपंगृहीत्वास्थाल्याःसकाशाद्द्विर्द्विःस्रुवेणात्गृह्णंतिति॥ ततोयजमानोप्येवमेवगृह्णाति॥ ततस्तद्धुतपात्रमाज्यसहि
तंदक्षिणस्यांवेदिश्रोण्यांनिदधायसर्वऋत्विजोयजमानसहिताःसहैवसंहिरण्यंतद्धुतभाजनस्थमाज्यंसमवमृशंति। अना
धृष्टमसीतिमंत्रेणततोयैःसहतानूनप्त्रमाज्यंस्पृष्टंतेभ्यःकदाचिदपिद्रोहोऽपकारोनकार्यः॥ ॥प्रथमाकंडिका॥ ॥
ततोध्वर्युस्तद्धुतभाजनस्थमाज्यंकिंचित्कंपयित्वाअन्नन्नयेनपात्रेणपिधायमृगवद्देशेनिदधाति। ततोयजमानोग्ने

अ·प

ब्रुतप्रादृत्याहवनीये समिधमाधायमदंतीरूपस्पृश्य प्रागाटतरं मुष्टिमेखलं कुरुते पत्नी च गार्हपत्येत् स्तीं समिधमाधायमदं
तीरूपस्पृश्य प्रागाटतरं मुष्टिमेखलं कुरुते ॥ ततो ब्रुह्मो प्रात होत्रध्वर्य्वग्नीध्रा यजमानव प्रजाअनापिकायां हिरण्यं वध्वा मदं
तीरूपस्पृश्याहवनीयं पूर्वेणागत्वा अं२८ भु२८ भुव इति सोममाप्याययंति विस्रंसालभं तदृत्यर्थः ॥ ततः प्रत्यागत्ये द्वारं
पश्चिमं त्रेणोत्तानानावा प्रस्तरे पाणीनि दधाति । ब्रुह्मादिक्रमेण । ब्रुह्मयजमानौ च दक्षिणतः स्थितावेव सोमालंभनिह्न
वैनकुरुतः । किंतु यथास्वयं चरभागमाहवनीयं पूर्वेणपरीत्य सोमाप्यायनं कृत्वा तथैव प्रत्यागम्य प्रस्तरे निह्नवं कृत्वा न २१
तो यथागतं गत्वा स्वस्थाने ऽपविशतः । ब्रुह्मयजमानभागयोः परिहरणं ॥ अग्निसंमार्गप्रैषः । अग्निसंमार्गः । स्रुहनं वि
हृतो हृज्जितिं । विहृत्स्तमयनुदत्विति । जुहुमभ्युह्यपरिधंजनं ॥ ॥ इह वातानुन प्राडिति निह्नवांतं ॥ न स्रुक्वाकः प्रैषः
प्रस्तरहोमाभावात् ॥ कर्कमते ऽभवति ॥ ततः संज्ञानाथामिति प्रस्तरादानं ॥ वंतुर्वयरुस्यं जनं । ततः परिधीनां विधृत्वा
श्वादानं ॥ ततोग्नीन्मदंत्यापा३द तिअग्नी धंशति प्रैषः मदंतीति प्रतिप्रैषः ॥ ततोमहृताभिति नीवैर्हरणं । ततस्ताभिरेहो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति ध्रुवस्य परिधिविधृतिसहितं प्रस्तरमाहवनीयस्योपरि स्थाप्य समीपे नैवातिहृत्याग्नीध्रेण हुताभिमर्दनीभिरभ्युक्षाग्नीधे प्र
स्तरं परिधिविधृतिसहितं निधाय स्वरस्सरणार्थं समर्पयति॥ ततश्च स्रुच्या दृत्या तानमालभते॥ ततउदकोपस्पर्शनं। संस्र
वाहुतिः। धुरि निधानं। विघाले भोजनभवति॥ समिष्टयजुर्होमवर्हिर्होमयोरभावः। वेदविमोकः पक्षे योक्त्रस्य च। वर्हिर्वेदे
स्तृतमेव तिष्ठति। प्रणीताविमोकः राक्षसभागः। भागावेक्षणं भागप्राशनमिति॥ ततः स्रुवब्रह्मणे स्रुवब्रह्मणमाह्वयेति स्रु
ब्रह्मणं प्रेष्यति॥ स्रुवब्रह्मणश्चातः पात्यस्य पुरस्ताद्वेदिमध्ये प्राङ्मुखस्तु ब्रह्मणः स्नानं करोति। पत्नीयजमानौ च स्रुवब्रह्म
णमन्वारंभेते॥ ॥इस्यानि[illegible]ष्टिः॥ ॥अथ प्रथमवर्षचरणं॥ प्रथमयत्ते प्रवर्ग्यो न भवति॥ ओचित्यमप्यत्र विकल्पेन भवति॥
तेन सोत्रलिख्यते॥ तत्र पूर्वं च यारणं शालाद्वाराणामपिधानं॥ पत्न्या प्रवर्ग्यस्पर्शनं न कर्त्तव्यमवैदिकैः शूद्रादिभिश्चा अत्रयाव
दुक्तं तावदेव भवति। नान्यत्प्रकृतितः किंचित्। ततो ब्रह्मयजमानहोत्रध्वर्युप्रतिप्रस्थातृप्रस्तोत्राग्नीध्राः संवाचमित्यध्यायं
शान्त्यर्थं पठंति। दरासनं। ब्रह्मणो दक्षिणाग्निमपरेणोपवेशनं। आहवनीयं दक्षिणेन वा॥ आहवनीयस्य परिस्तरणां के।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

चित्कुर्वंति। ततो गार्हपत्यस्य पुरस्तात्प्रागग्रानुदक्संस्थान्बहून्कुशान्नास्तीर्य तेषु कुशेषु दक्षिणत आरभ्योदक्संस्थानि घ
र्मपात्राणि द्वंद्वमासादयति॥ तथाहि। उपयमनी महावीरं। परिशासौ। पिन्वने। रौहिणकपाले। रौहिणहवन्यौ स्रुचौ। अ
नुत्कीर्णा। स्थूणामयूखं। धृष्टी। शतमाने। मुंजप्रबलवान्। विकंकतशकलान्विं८ शतिं प्रादेशमात्रान्। स्रुवं मुंज वेदं। प
वित्राणि। परिधींश्च। रज्जुसंदानमासंदीं। कृष्णाजिनं मधुं। सिकताः खरार्थाः॥ त्रिषु महत्सु शरावेषु पृथगासाद्यंते॥
अर्थवत्त्व॥ अग्निहोत्रहवणी वज्रः पवित्रछेदनानि पवित्रे॥ आज्यस्थाली। वत्साजं। शूर्पं। पात्री। पिष्टं। संयवनोदकं। हो २२
तृषदनं। मौंजः कूर्चः। औदुंबरी समित्। कृष्णाजिनं। सृतरौ महावीरौ च। अभ्युपशयेच॥ एतान्युपयमन्यादीनि पात्राणि
उदुंबराणि भवंति। यत्किंचिद्रज्जुजातं तन्मुंजमयं त्रिगुणं च भवति॥ ततो धर्याः पवित्रे स्थ इति विचित्र छेदनं॥ ततोऽग्निहो
त्रहवण्यां मदंतीः कृत्वा सवितुर्व इत्युत्पवनं॥ सव्यहस्ते कृत्वा दक्षिणेनोदिंगनं देवीराप इति। प्रोक्षिताः स्थेति तेनासां प्रोक्ष
णं॥ एवं प्रोक्षणीः संस्कृत्याध्वर्युर्ब्रह्मन्प्रचरिष्याम इति ब्रह्माणं प्रत्याह॥ होतरभिष्टुत इति होतारं॥ प्रस्तोतः साम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निगायेति प्रस्तोतारं ॥ ततो ब्रह्मणा प्रच २। तदनुज्ञातोध्वर्युरुपविश्यैकमेव महावीरं यमाय त्वा प्रोक्षामि। मखाय त्वा प्रोक्षामि। सू-
र्यस्य त्वा तपसे प्रोक्षामीति प्रतिमंत्रं प्रोक्षति। एवं त्रिः प्रोक्षितो भवति ॥ तूष्णीं परिघर्मस्यासादितपात्रजातस्य प्रोक्षणं। पात्रप्रो-
क्षणानंतरमेव प्रतिप्रस्थाता स्थूणामयूखं शालापूर्वद्वारेग्निः कास्पशालाया। दक्षिणतस्तत्र निखनति। यत्र निखातं स्थूणा-
मयूखं गार्हपत्यसन्निधावुपविष्टो होता पश्यंति ॥ दक्षिणतः स्थूणां गोर्वंधनार्थं निखनति ॥ स्थूणाया उत्तरतोजावंधनार्थं म-
यूखं निखनति ॥ ततः शालाया गत्वा गार्हपत्यस्योत्तरतो रत्निमात्रे एकं खरं निवपति ॥ तत्र पंचभूसंस्कारान्कृत्वा एकशराक-
स्याः सिकता निवपति ॥ तत आहवनीयस्योत्तरतो द्वितीयं खरं निवपति ॥ तत्रोश्विभ्यो भुष्यैति कृत्वा द्वितीयशरावस्याः
सिकता निवपति ॥ तत आहवनीयस्य दक्षिणतो भिन्नसन्निधौ तृतीयमुच्छ्रितखरमेवमेव संस्कारं कृत्वा तृतीयशरावस्याः सि-
कता निवपति ॥ तत आहवनीयं पूर्वेण घर्मासंदीं पर्याहृत्याहवनीयस्य दक्षिणतः सोमासंघा उत्तरतः प्राडीषामासादय-
ति ॥ आहवनीयसोमासंघारं तराले इत्यर्थः। सावासंदधुपादा अरत्निमात्रांगीवाल्वजरज्वाव्यूता च भवति ॥ ततस्तस्यामा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ०प संघां कृत्वाजिनमास्तीर्य तस्मिन्कृत्वाजिने अभिमुखपश्यावितरौ महावीरौ च निदधाति॥ एतत्सर्वं वस्त्रादिनाऽऽवस्यादयेद्वा॥ न
वा। अध्वर्युः पात्रप्रोक्षणानंतरमेव पूर्णाहुतिं वदाज्यं संस्कृत्य होत्राऽऽजं जंतीसु अवमाने स्कवेणाज्यमादाय देवस्त्वेतिमहावीरमन
क्ति॥ ततो रजतशातमानं गार्हपत्यस्योत्तरतो मुञ्जे खरे पृथिव्याः सं स्पृशस्पाहीत्यवगूहति सिकतामध्येऽधः प्रवेशयतीत्यर्थः॥
रक्मिकाशाते तत्शातमानं॥ ॥इति षड्विंशस्य प्रवर्ग्याध्यायस्य द्वितीया कंडिका॥ ॥ततः भृङ्गीयेति प्रस्तोतारं प्रेष्यति॥ पत्नी शि
रः प्रोर्णुते॥ उत्सीदेत्यागिसहितं वेष्टयति॥ ततो होत्रा संसीदस्वेति पठ्यमाने ध्वर्युर्मुञ्जपुवलवान्निगुणानादीप्य पुतिदिशं खरे करोति।
ततआज्यं संस्कृतं महावीरे निनीय ततोऽर्चिरसीमंत्रेणातेषु मुंजपुलवेषु तमाज्यपूर्णं महावीरं निदधाति॥ ततो महावीरस्योपरिसमी
पे प्रादेशं धारयंतं यजमानमनाधृष्टेति वाचयति॥ अथवा पुरस्तात्प्रभृति दिशं प्रादेशं धारयंतं यथालिंगमनाधृष्टा इत्यादीनं
च मंत्रान्वाचयति॥ ततो विश्वाभ्य इति मंत्रेण महावीरं दक्षिणेन भूमावुत्तानं पाणिं यजमानो निदधाति॥ ततो यजमान एव महावी
रस्योत्तरतो भूमौ प्रादेशं निदधाति नमो रूभ्यासीति ततो महावीरं धृष्टिभ्यां भस्मनापरिकीर्य धृष्टिभ्यामेव गार्हपत्यांगारैश्च परिकि

२३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रणं करोति॥ तत्त्रयोदशभिर्वैकंकतशकलैर्महावीरं परि॥ वेष्टयति। तत्र प्रथमं द्वौ शकलौ प्रागग्रौ परितो विक्षिप्तानामं
गाराणामुपरि निदधाति॥ एकं महावीरस्य दक्षिणतो द्वितीयमुत्तरतः स्वाहा मरुद्भिः परिश्रीयस्वेति मंत्रेण सहैव द्वौ निदधा
ति॥ तत एकादश तूष्णीं॥ तत्र द्वावुदगग्रौ॥ एकं महावीरस्य पुरस्तात्। अपरं पश्चात्। ततो द्वौ प्रागग्रौ पूर्ववत्॥ ततो द्वावुदग
ग्रौ॥ पुनर्द्वौ प्रागग्रौ॥ पुनर्द्वावुदगग्रौ॥ एवं द्वादश॥ त्रयोदशं दक्षिणतः प्रागग्रं॥ ततः सुवर्णशतमानेन महावीरमपिदधा
ति दिवः स८ स्पृशस्वेति मंत्रेण। रुक्मिकाशतमानेशतमानं॥ २ ॥ इति षड्विंशप्रवर्ग्योपायेत्तृतीयाकंडिका॥ ॥ततश्च
ङ्गायेति प्रैषः॥ ततः कृष्णाजिनखंडैर्दंडसंयुक्तैर्व्यजनाकारैस्त्रिभिः परितः परिकीर्णानंगारान्शकलांधुक्षितानुपवा
जयति मधु मध्विति मंत्रेण। तत उपवाजनानंतरं त्रयाणां धवित्राणां मध्ये एकं धवित्रं प्रतिप्रस्थात्रे समर्पयति॥
द्वितीयमग्नीधे तृतीयं स्वहस्त एव धारयति॥ ततश्च ब्रह्मसामसमाप्तौ छंदोगवर्गात्सर्वं घर्मस्य तन्वो गायेति प्रैषः॥ त
तोध्वर्युः प्रतिप्रस्थाताग्नीध्रश्चंगारान्धवित्रैर्धुन्वंतो वीजयंतस्त्रिःप्रदक्षिणं परियंति॥ तत उपस्पृश्य धवित्राण्यपतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

कुर्वंति। स्वयंच पूर्वपूर्वापेक्षया बहिस्तिष्ठंति। ततः पुनरप्यंगारान्नीजयंतः प्रदक्षिणं त्रिः परियंति। तत्रापसव्यकरं। अ-
विहितत्वात्। अप्रदक्षिणपरिगमनमात्रस्यांकृतत्वात्॥ अथापसलवित्रैर्दत्वंतिरिति॥ अथवोत्तरं देववस्परिक्रमणे॥
हविर्नोधर्मस्त्यतः परं कार्यं ततोज्वालायां महावीरं प्रज्ञायांसु वर्णशतमानं क्वचिन्निधाय मुंजप्रदेशे स्थापयित्वा स्रुवेणाज्ये
नमहावीरं प्रतिप्रणवं परिषिंचति॥ होत्रापप्रथमानस्यस्तस्य प्राणवे प्राणवे इत्यर्थः। ततः प्रतिप्रस्थाता रौहिणौ करोति। तत्र-
स्थोपहितपात्रीकरणं॥ पात्रांतरे प्रोक्षणीहस्तौ यच्छूर्पाग्निहोत्रहवण्योरादानं॥ प्रतपनं। गमनं। विलालंभः पिष्टेक्षणं॥ २४
अपद्व्यनिरसनं। तदभावे हविषोभिमर्शनमेव। पुनः पिष्टानामालंभनं॥ चतुर्मुष्टिकं द्रव्यस्य ग्रहणं। शेषाभिमर्शनं।
प्रांडीक्षणं। उत्थानं। उत्तरतोगमनं। अवणस्य पश्चात्सादनं॥ प्रोक्षणीः स्रुचि कृत्वा ब्रह्माणं समीक्ष्य रौहिणयोः प्रोक्षणं। पा-
त्रामावपनं॥ ततउपवेषमादायांगारणां प्राचः करणं। प्रथमकपालधर्मेण दक्षिणोत्तरयो रौहिणकपालयोरुपधानं॥
अभ्यूहनं। उपसर्जन्यधिश्रयणं। ततः पिष्टानामीक्षणं। सपवित्रायां पात्र्यां संवापः उपसर्जनी हृदा स्वतिनयनं॥ सपवि

त्राभ्यां प्रतिग्रहणं॥ स्रपवनं। विमृज्यालंभनं। अधिश्रयणं। प्रथनं। अद्भिरभिमर्शनं। एवं द्वितीयस्य पात्रं अंगुलिप्रक्षालनं।
पर्यग्निकरणं। श्रपणं। आलंभः। अभिवासनं। अभितप्य पात्रं अंगुलिप्रक्षालननिनयनं। यजमानस्य तत्यागः। ततई इंद्यावापृ
थिवी पूर्व्वं चिंतयन्नित्यस्मिन् मंत्रे होत्रा पठ्यमाने प्रतिप्रस्थाता हवनीयरिति॰ ओं उंवरान्परिधीन्परिदधाति॥ मध्यमदक्षिणोत्तरा
न्त्रीन् नतूलीमेव। तत आगत्य रौहिणहवन्योः स्थापनं। तयोः संस्कृता देवाज्यादुपस्तारः तत्रस्थाभिघारः। उद्वासनं। प्राणदानं।
ततः कपालयोरंजनं। उद्वासनं। तत उत्थाय रौहिणहवन्या वादयाहवनीयाद्दक्षिणोत्तरवालाद्यपति॥ एवमंतं प्रतिप्रस्था
तृकर्तृकं कर्म। ततो होत्रा प्रस्तवतीमभ्विने ऽनुच्यमाने ध्वर्युरुपोत्तिष्ठन् रुचितो घर्म इत्याह॥ प्राकृतं चेडुत्तरं देववत्सपरिक्रमणं
नर्त्विक्कर्त्तव्यं। ततो यजमानसहिताः षट् ऋत्विजो गर्भो देवानामित्यादिनमस्ते अस्तु मा मा हिंसीरित्यनेन सार्द्धेन कं
डिकाषट्केन धर्ममुपतिष्ठंते॥ षडुपतिष्ठंते इति शतपथे प्रस्तोतुरग्रकृत्वात्। षड्ग्रहणं स यजमानाः सर्व ऋत्विज उपतिष्ठं
त इत्येवंपरं॥ ॥ततोध्वर्युः पत्न्याः शिरस उद्घाटनं करोति॥ ततः पत्नीं महावीरमीक्षमाणां त्वष्टमंत इत्यस्मै मंत्रं वाचयति।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प ततः साम्नो निधने प्रस्तोत्रा गीयमाने अहः के — नेति मंत्रेण दक्षिणं रौहिणमाहवनीये जुहोति॥ इदमह्ने इति त्यागः॥ इदं घर्मायेति
वा। आह। केतुना यजुषो घर्मदिवत्ये इत्युक्तत्वात्॥ ४ ॥ इति षड्विंशे प्रवर्ग्याध्याये चतुर्थी कंडिका॥ ॥ ततोध्वर्युर्देवस्त्वेति
मंत्रेण रज्जुसंदानं गृह्णाति॥ ततः पिन्वनमादत्ते॥ प्रतिप्रस्थातापि तूष्णीं रज्जुसंदानं पिन्वनं चादत्ते॥ ततोध्वर्युरपरेण गार्हपत्यं
दोहनार्थं गच्छन्। इत इड एहि॥ सरस्वत्येहीति गामाह्वयत्यध्वर्युः। ततो मुक्ति एहीत्येवं गोर्व्यावहारिकनाम्ना त्रिरुच्चैराह्वयति॥ प्र-
तिप्रस्थाताप्यध्वर्युमनुगच्छति॥ ततो धेनुमायेति प्रैषः॥ ततो दक्षिणेन द्वारेण निष्क्रम्य गोः समीपे गत्वा अदित्यै रास्नेति गां पाशेन प्रति २५
मुच्य ततः स्थूणायां बध्नाति। ततः पूषासीति वत्समुत्सृजति॥ ततो गोरपरपादौ संदानेन बध्वा घर्माय दीष्वेति वत्सं स्तनं [illegible]
तमपनयति॥ ततोश्विभ्यां पिन्वस्वेति पिन्वने दोग्धि। ततोर्थपर्याप्तं दुग्ध्वा स्वाहेन्द्रवदिति विप्रुषो दोहनकाले पिन्वने इतस्ततः
पतितानभिमंत्रयते॥ ततो यस्ते स्तन इति स्तनानालभते॥ एवमेव प्रतिप्रस्थाता अजां मयूखे बध्वा तूष्णीं दोग्धि॥
न त्रानां पाशेन प्रतिमुच्य स्थूणायां बध्वा वर्करमुत्सृज्य संदाय वर्करमुष्णीयपिन्वने यावदर्थं दोहयित्वा स्तनानालभते।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केचिदजायावर्कुरं संदानेन बध्नंति ॥ तदप्युक्तं । एवंशब्देन सर्वस्मात्तिदेशान् ॥ खांतरे वर्करस्य साक्षाच्छ्रुतत्वाच्च ॥ ततः पयोगा
येति प्रैषः स ततउत्तिष्ठ ब्रह्मणस्पत इति होत्राऽनूच्यमाने गोसमीपादुत्तिष्ठति ॥ ततउपद्रव पयसेति होत्रानूच्यमाने उर्वंतरिक्षमि
ति गोः समीपात् शालां प्रतिगच्छति । आपस्तंबः ॥ यदि घर्मदुघो ह्का लेनागच्छेदन्यां दुग्ध्वा प्रव्रज्य तां सुत्वा पात्रा ह्मणायदद्या
यमनभ्यागनिष्यस्यादिति । ततो यथागतं प्रत्यागत्य दुग्धं हविस्तुगृह्ये निधाय कस्यचिद्धस्ते समर्प्य वाध्वर्युर्गायत्रं छंदो सी
ति प्रतिमंत्रं परिश्रासौ संदंशाकारौ आदत्ते ॥ ततो वशिष्ठशफो गायेति प्रैषः ततस्ताभ्यां संदंशाभ्यां महाधाभ्यां द्यावापृथिवी
भ्यां त्वेति महावीरं परिगृह्णाति । ततो महावीरं परीशाभ्यां मूर्ध्वमुत्पाटयत्यध्वर्युः ॥ विरोधात्प्रुति प्रस्थाता मुंजवेदेना
धस्तादुपमज्य तललग्नं तिकताभस्मादिकं पातयित्वो पयमन्याधस्तादुपगृह्णाति ॥ अंतरिक्षे रोति ॥ ततः शाला गृहमयादप
रेपा द्वारेण शाला यावहिर्निः सृत्य द्वारे गत्वा कस्मिंश्चिद् विपुले समे पात्रे महावीरं निधाय परितो लघुपाषाणैरवष्टभ्नाति ॥ त
तो जायसा महावीरमवसिंच्य शांते जाते इंडाभ्विनातिगोः पयो मध्ये निनयति ॥ ततो यथागतं शालायां गार्हपत्यस्य समीपमाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

त्मवेरस्योपरि महावीरं धारयित्वा पैतुद्रुमाणास्यतिरिति होत्राप द्यमाने ध्वर्युराहवनीयं प्रति घर्मं हस्त एव गच्छन्। समुद्रा
यत्वेति वा ततनामानि स्वरेण जपति पितृमतेस्वाहे त्यंतानि॥ ॥इति षड्विंशे प्रवर्ग्याध्याये पंचमी कंडिका॥ ॥ततः
स्वाहा घर्माये त्यनेनोपयमन्या रक्षा वा घर्ममध्ये घृतमासिंचति यद्यजापयो तसेककाले धर्माग्निः स्वत्यवहिः पात्रे पति
तं भवति॥ततः स्वाहा घर्मः पित्र इति जपति॥ततोति क्रम्याश्राव्य घर्मस्य यजेति॥होतारं प्रत्याह॥ततो विश्वा आशा इति
मंत्रेण वषट्कृते जुहोति॥इदं घर्माय॥ततो दिविधा इति मंत्रेण घर्मं त्रिरूर्ध्वं कंपयति॥सकृन्मंत्रेण द्विस्तूष्णीं॥ततोनु २६
वषट्कारे हुते स्वाहाग्नय इति पुनर्जुहोति॥इदमग्नये॥ततो बुह्ला अश्विना घर्ममिति हुतशेषं घर्मपात्रस्थमभिमंत्रय
ते॥अपाताम् इत्यनेन यजमानोपि पात्रस्थमेवाभिमंत्रयते॥ततोध्वर्युः पिन्वमानं इतस्ततः पात्रमध्ये उच्छलंतं घर्मं
मिषे पिन्वस्वेति अभिमंत्रयते॥ततो धर्मं स्त्रिसु धर्मेत्पुत्तर पर्यार्द्र प्रस्नुत्क्रामति॥ततो मेन्य स्मरुति घर्ममाहवनीयादु
तरे खुरे निदधाति॥ततो धर्मम ध्ये शकलानित्य ज्य त्य ज्य नितरामत्का अत्का तेर्विकांकतशकलैर्घमस्यमाज्यमाहव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीये जुहोति स्वाहा प्रफलेश्वराय स्वाहेति प्रतिमंत्रं। कृत्वा कृत्वा प्रतिहोमं शाकलं प्रथमपरिधौ निदधाति॥ इदं प्रफलेश्वराय। इदंग्रा
वस इति द्वितीये। इदं प्रतिरवेभ्य इति तृतीये। चतुर्थं शाकलं कर्मेअक्त्वाऽकृतमवोदीचीं दिशमीक्षमाणोपसव्यं कृत्वा
दक्षिणाप्रदेशे वेदिमध्ये वर्हिष्षुपगूहति॥ इदं पितृभ्यस्तु ऊर्द्ध्व वर्हिभ्यो घर्मपावभ्य इत्यपसव्येन त्यागः। ततोयामुपस्पर्श
नमुभयो। इदं द्यावापृथिवीभ्यामिति पंचमे। इदं विश्वेभ्यो देवेभ्य इति षष्ठे। सप्तमं सकलं सर्वलेपाक्तं दक्षिणोक्षमाणोत्तु
त्तरतावस्थितायप्रतिप्रस्थात्रे समर्पयति॥ इदं रुद्राय रुद्रहूतय इति त्यागः। ततोपां स्पर्शनं। ततः प्रतिप्रस्थाता तमध्व
र्यणा समर्पितं शाकलं शालाया उत्तरतउदग्गुं निरस्यति॥ ततः स्वाहा सं ज्योतिषेति मंत्रेणोपयमन्यां घर्म्यमासिंचति। त
तः साम्नो निधने प्रस्तोत्रा पठ्यमाने ऽ ध्वर्यु रहः केतुनेति मंत्रेणोत्तरं रौहिणं जुहोति॥ इदं घर्माय त्येवत्यागः॥ ततः परिधौ स्था
पितानि पंच शाकलान्याहवनीये प्रक्षिपति॥ ततउपयमनीस्थस्य धर्मस्याग्निहोत्राहुता होमं करोति। तत्र पूर्व कूर्च निधानं॥
समिदाधानं। पुरोऽग्नायां पूर्वाहुति होमः। समंत्रकः। इदं सूर्याय। कूर्चे निधानं। गार्हपत्यावेक्षणं॥ ततः पूर्वाहुते रुत्तर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

तोद्वितीयाहुतिहोमं ॥ स्रुक्स्रुवौ दंडप्रजापतये द्विः प्रकंप्य कूर्चे निधानं । उपमार्जनं च ॥ समंत्रकपूर्वाहुतिहोम इति सर्वेसूत्रेषु । ततो
षाजस्य नववुपहवपूर्वकं होत्रध्वर्युब्रह्मप्रस्तोतृप्रतिप्रस्थात्रग्नीध्रयजमानानां क्रमेण मधुहुतमित्यनेन मंत्रेण भक्षणं । य
जमानस्य पृथग्मंत्रपश्चाद्वा भक्षणं । ततउपयमनीं दक्षिणेषुदरे प्रक्षाल्य निदधाति । अथवा परिधौ निहितानां शकलानामस्मिन्
काले त्वाहवनीये प्रहरणं । ततः संसाद्यमानायानुब्रूहीति प्रेष्यति ॥ संसाद्यमानेभ्योनुब्रूहीति वा ततो होता सूक्तवसाद्भगव
तीस्तूयमाने केचित् धेनवेत्तणोदके प्रपस्तुंति । ततः सर्वघर्मपात्रजातमासंद्यां करोति । तत्राभीममिति महावीरस्यासंद्यां नि ३७
धाने मंत्रः ॥ इतराणि पात्राणि सर्वाणि तूष्णीमासंद्यां निदधाति ॥ ततः सर्वेषां नक्तंवाचमिति शांतिकरणं । वारणामुच्छादनं । आप
स्तंबः ॥ यत्र क्वच प्रक्रांते प्रवर्ग्ये आदित्योभ्यस्तमियान्नक्तं तां तादेव विरमेच्छोभूते शेषं समापयादिति ॥ तथा यदि धर्मेण प्रचरन्त्वा
दित्यो स्तमियाद परस्यां वाहिर्दर्भेण हिरण्यं प्रवध्योद्वयं तं मनसस्परीत्युपस्थायोदुत्यं चित्रमिति वाभ्यां गार्हपत्ये कृत्वा प्रवृज्य
श्वोभूते वयः सुपर्णा इत्यादि समुपतिष्ठंत इति ॥ ॥ इति षड्विंशस्य प्रवर्ग्याध्यायस्य षष्ठी कंडिका ॥ ॥ अथपसदिधिः ॥

नेत्रचतुरासनं॥ब्रह्मोपवेशनं॥प्रणीताप्रणयनं॥आहवनीयस्यैवपरिस्तरणं॥पात्रासादनं॥अग्निहोत्रहवणी॥वज्र॥
शम्यादृषदुपलं।पवित्रच्छेदनानिपवित्रे।स्थालीआज्यंच।वेदश्चान्तकाणं।एकादशेध्मकाष्ठानि।एकहस्तरणपर्याप्तंव
र्हिः।स्रुवोजुहूः।उपभृत्।योक्त्रं।पत्नकुशाश्च।आतिथ्याप्रस्तरविधृतीपरिधयः।कुशास्तीर्णपीठं।तत्रःपवित्रछेदनं।प्रो
क्षणीसंस्कारः।पात्रप्रोक्षणं।असंचरेप्रोक्षणीनांनिधानं॥कुक्कुटाहननं।आज्यनिर्वापोवेदवंधः।अग्नीधएवाज्याधिश्रय
णं॥अध्वर्युःपर्यग्निकरणं॥ततोवेदिसमीपेगत्वासन्नणवर्जोदानं॥सव्येकृत्वादक्षिणेनालभ्यजपः॥स्तृतायामेववेद्यां
तृणानिधानं॥स्तंवयजुर्हरणोत्तरस्मातिथ्यावर्हिषोवयवंप्रछिद्यप्रछेद्योत्करंप्रतिहरति।पूर्वःपरिग्रहः।नरेखाकरणा
खननं।उत्तरपरिग्रहःनानुमार्जनं।अग्नीधःप्रोक्षणीधारणं।अध्वर्योःस्फ्यमुद्यम्यप्रोक्षणीप्रैषः॥स्रुवौसंमृद्धीतिविशेषः
प्रोक्षणीमदंतीरासादयेतिवाप्रैषः।तस्योदकप्रहारः।नपाणेरवनेजनं।अपरेणप्रणीतानांस्यधावर्हिषासादनं.
ततःस्रुवजुहूपभृतांसंमार्गः।संमार्जनापासनं।पत्नीसन्नहनं॥आज्योद्वासनं॥पत्न्यावेक्षणं॥जुह्वांतूष्णीमष्टगृहीत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहणं। उपभृति चतुर्गृहीतग्रहणं। अथवा जुह्वां चतुर्गृहीतं। उपभृत्स्वष्टगृहीतं प्रकृतीवत् तूष्णीमेव। तत इध्मप्रोक्षणं॥ वेदिप्रोक्ष
णं। बर्हिः प्रतिगृह्य वेद्यां निधानं। बर्हिः प्रोक्षणं। तत्र स्रुग्भ्यामिति विशेषः मूलावसेकः प्रणीतासु पवित्रकरणं॥ बर्हिर्विस्रंसनं। आ
निध्याप्रस्तरस्य ग्रहणं॥ ब्रह्मणे समर्पणं॥ संनहनविस्रंसनं। दक्षिणस्यां वेदिश्रोणौ निधानं॥ अन्यैरवछादनं॥ तत एकहृद्बर्हि
स्तरणं। एकहृदित्येकधातु एकवारमित्यर्थः॥ तेन एकेनैव मंत्रेण पश्चात्प्रागेव सर्वं स्तृणीयादित्यर्थः॥ तत इध्मासमिध आ
दाय प्रस्तरस्य च॥ आहवनीयकल्पनं। नोत्सुकोद्वहनं। परिधिपरिधानं। स्रुच्छ्रपानुपस्पृश्य धोराधानं। आहवनीयेक्षणी आवृत्य
विधृत्योः स्तरणं। प्रस्तरस्य च। अभिनिधानं। जुहूपभृतोरासादनं॥ आज्यस्थाल्याश्च॥ सर्वालंभः। आत्मालंभः। उदकालंभ॥ ए
हि होतरित्यामंत्रणं॥ होतृषदनस्थापनं॥ सामिधेनीप्रैषः॥ संतत्वान्विति प्रैषः। इदमहं नवमेनेत्यवबाधनं। पूर्वाघारः। अग्निसं
मार्गप्रैषः। अग्निसंमार्गः। आश्रावसी दहोतरित्येतावद्देवब्रूयात्॥ अग्निर्देव इत्यादि। ततो होता होतृषदनमुपविश्य प्रयाजाभा
वे पिबवना स्रुगादापनं पठति। ततो ध्वर्युर्जुहूपभृतावादाय निक्रामन्नोमार्थंगच्छन्नसन्नग्नये नुब्रूहीति होतारं प्रेष्यति।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आ आज्याहा ग्निं यजेति जुह्वामुपगृहीतपक्षे अर्द्धमाग्नेः पूर्वार्द्धे होमः। इदमग्नये। ततः सोमायानुब्रूहि सोमं यज। द्वितीयस्या
र्द्धस्य मध्ये होमः। इदं सोमाय। तत उपभृदाज्यस्य समानयनं कुर्वन्त्रिहलवेनु ब्रूहि स्व हविर्भ्यं यज॥ ॥पश्चार्द्धभागे होमः॥ उपभृत
दुगृहीतपक्षे पूर्वं जुहूस्थं चतुर्गृहीतमग्नये हुत्वा उपभृतोर्द्धं समानीय सोमाय हुत्वा पुनः। समानयनं कुर्वन्त्रिहलवेनु वा
चनं कुर्यात्॥ ततः स्रुचौ सादयित्वा सोमाप्यायनादि स्तुवृत्सरपाप्रैषान्तमार्त्तिर्ध्यावत्॥ ब्रह्मोऽज्ञातहोत्रध्वर्युर्ग्नीध्रयजमाना
अनामिकायां हिरण्यं बध्वा मदन्तीरुपस्पृश्याहवनीयपूर्वेणागत्वा सोमस्यालंभं कुर्वन्ति॥ अ ८ क २८ घृत इति ततस्तथै
व प्रस्तारस्य प्रस्तरे उत्तानहस्तादक्षिणोत्तानाविष्टारायइतिपाणीनिदधति॥ ततः पवित्रप्रतिपत्तिः। अग्निसंमार्गप्रैषः॥
अग्निसंमार्गः। व्यूहनं। अग्नेः सोमस्य विहृतो रुज्जिति। अग्निः सोमो विहृतमपनुदन्त्विति। अभ्युक्ष्य परिध्यंजनं॥ न सूक्त
वाकप्रैषः। प्रस्तरहोमानावानुकर्कमतेनुभवन्ति। सूक्तवाकप्रैषः। प्रस्तरादानं। अंगुल्यग्रं जुह्वामंजनं मध्यस्योपभृति। मूल
स्याज्यस्थाल्यां। ततः स्रुवेणाज्यं गृहीत्वा। यजमानेन्वारब्धे याते अग्ने यःशयेति जुहोति॥ इदमग्नये यःशया येतन्वे। इदम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प ग्नयेति वा। याते ऽग्ने रुग्रापा ग्रेयानीतिवा वचनात्॥ ततः परिधिविधून्योरादानं॥ अग्नीन्त्वं दस्वपाइति प्रैषः मदंतीति प्रत्याहाग्नीत्॥ ततो
मरुत्तामितिनीवैर्हरणं॥ ततस्ताभिरेहीति ब्रुवतोऽध्वर्युमाहवनीयहरणं॥ अग्नीधाआहते। नमदंत्सुदकेनप्रस्तरस्याभ्युक्षणं। त
तोऽग्नीधे निधानार्थंसमर्पणं प्रस्तरस्य। ततस्त्र्युक्षुच्या इत्वा त्वा लंभः॥ उदकालंभः॥ संस्रवाहुतिः। उत्तरां सेस्रुचोर्निधानं घृता
चीइति॥ वेद्यालंभाभावः। वेदविमोकः। पक्षयोक्रमस्य॥ हु कल्पह्वर्हिर्होमः। प्रणीताविमोकः॥ सुब्रह्मण्या प्रैषः॥ तदाह्वानं॥
ग्नुपसदिष्टिः॥ अपराह्णे तानूनप्त्रघृतमध्येयजमानदुग्धं निनीयं यजमानाय व्रतं देयं॥ ॥ततः प्रवर्ग्यः शांत्यादिशां २९
त्यन्तः॥ तत्र विशेषः॥ रात्रिः केतुनेति रौहिणयोर्होमः। इदं त्रा त्रैः। इदं घर्मायेतिवा। अग्निहोत्राहुताहोमे इदमग्नय इति
ततउपसत्। तत्र याते ग्नेयः शयेत्युपसदाहुतिः। ततोनस्तमितेवाग्यमनप्रैषः। अस्तमितेवाग्विसर्गप्रैषः। व्रतकरणं
प्रैषः। वाग्विसर्गः॥ ॥अष्टमाध्यायस्य द्वितीया कंडिका॥ ॥त्रिस्तनं प्रथमायां दोहयति। त्रैस्तनं व्रतदुघे धुक्ष्वेति प्रैषः
एकस्तनमितिवा॥ प्रथमायामुपसदि त्रिस्तनमेकस्तनंवा व्रतकरणं। गौर्वौ दुग्ध्वा गार्हपत्ये श्रित व्रतस्य श्रपणं। द

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिणाग्नौपत्याः राज्ञौयत्नेन रक्षणं॥ मेहनस्वपनेपूर्ववत्॥अपरात्रेव्रतकरणंच पूर्ववत्॥प्रातर्विवुद्धवाचनं।अनुदिते॰
वाग्वंधप्रैषः।वाग्यमनं।उदितेवाग्विसर्गप्रैषः।व्रतकरणप्रैषः।वाग्विसर्गः॥ ॥अष्टमाध्यायस्यद्वितीयाकंडिका॥ ॥
त्रिस्तनंप्रथमायांदोहयति॥त्रैस्तनंव्रतंदुग्धेधुक्ष्वेतिप्रैषः।एकस्तनमितिवा।प्रथमायामुपसदित्रिस्तनमेकस्तनंवाव्रतकरणं.
गावोदुग्ध्वागार्हपत्येदीक्षितव्रतस्यश्रपणं॥दक्षिणाग्न्योपत्याः राज्ञौयत्नेनरक्षणं।मेहनस्वपनेपूर्ववत्।अपरात्रेव्रतक
रणंचपूर्ववत्।प्रातर्विवुद्धवाचनं।अनुदितेवाग्वंधप्रैषः।वाग्यमनं।उदितेवाग्विसर्गप्रैषः।व्रतकरणप्रैषः।वाग्विसर्गः।द्वि
स्तनंव्रतंदुग्धेधुक्ष्वेतिप्रैषः।द्विस्तनंदोहयित्वाश्रपणंपूर्ववत्।पूर्वाह्णेप्रवर्ग्यःशांत्यादिशांत्यंतः। तत्राहः केतुनेतिरोहिण
होमः।इदंसूर्यायेत्यग्निहोत्राहुताहोमेत्यागः।ततउपसत्।तत्ररजःशयेत्युपसदाहुतिः।इदमग्नयेरजःशयायेतन्वे।इ
दमग्नयइतिवात्यागः।ततोवेदिमानंतत्रशालायाःपूर्वद्वारमध्यात्प्राचीनप्रक्रमान्द्विपदान्प्राच्यांप्रक्रम्यशंकुनिखननं.
तस्यशंकोरतःपात्यसंज्ञेतिकर्कादयः॥तस्यशालाशंकोरंतरालदेशस्यातःपात्यसंज्ञेतिहरिस्वामिनः॥ ॥ततोव्रह्मयज्ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

मानोऽन्तरवेदेर्दक्षिणतोबर्हिर्वेदिवेदिसंस्पर्शावुपविशतः।एवंअग्नीषोमप्रणयनादर्वीकअन्वेबोपवेशनंब्रह्मणः॥अथ
वायव्यपत्रकर्मकुर्वंतितत्रतत्रगत्वासन्निधौदक्षिणतउपविशति॥ब्रह्मणःसमंत्रकआसनसंस्कारः॥ततोयजमानवा
चंयच्छेतिप्रैषः॥शालाद्वार्यस्योत्तरतःषट्कासादनं।अग्निहोत्रहवणी।वज्रः।पवित्रच्छेदनानिपवित्रेअंतर्धानतृणीशम्या
च।ततःपवित्रच्छेदनं।मदंत्युदकमग्निहोत्रहवण्यांकृत्वा।प्रोक्षणीसंस्कारः।वज्रांतर्धानतृणशम्यानांप्रोक्षणंपदद्धोरचैकःप्रक्र
मः।एवंविधप्रक्रमपरिमाणं।काष्ठादिगृहीत्वामध्यमशंकोरारभ्यदक्षिणस्यांदिशिपंचदशसुप्रक्रमेषुशंकुंनिखनति॥सा ३०
वेदेर्दक्षिणश्रोणिः।पुनस्तस्मान्मध्यमशंकोःउत्तरस्यांदिशिपंचदशप्रक्रमान्प्रक्रम्यशंकुंनिखनतिसावेदेरुत्तराश्रोणिः
पुनरस्तस्मान्मध्यमशंकोःप्राच्यांषट्त्रिंशत्प्रक्रमान्प्रक्रम्यशंकुंनिखनतिसवेदेःपूर्वार्द्धः।एषपाषदस्यान्तंच।ततस्तस्माछंद
कोर्दक्षिणस्यांदिशिद्वादशप्रक्रमान्प्रक्रम्यशंकुःसवेदेर्दक्षिणोंसः।पुनरपितस्मात्पूर्वार्द्धशंकोरुत्तरतोद्वादशसुप्रक्र
मेषुशंकुः॥सवेदेरुत्तरोंसः।एवंवेदिमित्वाश्रोणिप्रारभ्यदक्षिणपार्श्वेदक्षिणांसांतंयावत्स्फ्येनरेखाकार्या।एवमुत्तरश्रो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णेरारभ्योत्तरांसपर्यंतं च ॥ सर्वतः स्फ्यं प्रयापरितनोति मध्ये पृथिव्या मिति सर्वांतरे ॥ अत्र वेदिलाधनोपायभूतः श्लोकः ॥ पंच
दशमथैकविंशतिकमपरं परतस्त्रिकं चापि ॥ द्वादशसु पादेशऽग्रमः सोमे रज्जुप्रमाणमेतदिति । ततो वेदिपरिसमूहनं ॥ उत्त
रतो वेदेश्चात्वालादपरस्यां दिशि रथांतरालेऽत्करकरणं । चात्वालद्वादशसु प्रक्रमेषु प्रत्यगुत्करः इति मानवे । परिशिष्टे च
चात्वालादुत्करं कुर्याच्छामित्रस्य रथांतरमिति ॥ ततोंतः पात्यादारभ्य पूर्वार्धांशं कुर्यावत्स्यप्सा संततवरंडकं कुर्यात् ॥ ॥
ततउपरवदेशेउपविश्य स्तृणवज्रादानं ॥ स्फ्येकरणं । दक्षिणेनालभ्य जपः । उपरवदेशे तृणनिधानमादिसतृणपुरी
षप्रक्षेपांतं । ततोंतः पात्येउपविश्य पूर्वपरिग्रहप्रैषः ॥ पूर्वपरिग्रहः स्फ्यादयवधि दक्षिणतउत्तरतश्चपरिग्रहणं । उपर
वदेशं एवं विहत्येवखनं ॥ ततोऽग्नीधो हरणं संमर्शनं च ॥ ततसंमर्शनांतेशम्यांच स्फ्यं चादाया ध्वर्युर्वेदेस्तृणं सास्यदद्वय
परिमाणोष्विषु प्रक्रमेषु प्रतीच्यां दिशि चात्वालमानं ॥ तत्र शम्यानिधानाद्युत्तरवेदिप्रदानं तं पभुवत् ॥ उदुंबरशाखाभिः प्र
क्षशाखाभिर्वोत्तरवेदिछन्नावसतीति ॥ तत्रापस्तंबः ॥ अपरेण यूपावटं संचरमवशिष्य वेद्यामुत्तरवेदिदक्षूपदासोमेकरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

तीति॥ एवमन्येष्वपिसूत्रेषु॥ युगमात्रीयजमानदशपदप्रमाणावोत्तरवेदिः॥ षडङ्गुलीत्र्यंगुलैःपूर्णं। स्नात्वयावत्प्रमाणोत्पादिवत्
रस्त्रसाधनोपायेनसाधनीया॥ ॥ततोपराह्णेद्विस्तनंव्रतकरणं॥ ततः प्रवर्ग्यः शान्त्यादिशान्त्यंतः॥ तत्ररात्रिः केतुनेतिरौहिण
होमः। अग्निहोत्राहुताहोमेग्निर्देवता। ततउपसत्। तत्ररजःशयेत्युपसदाहुतिः। अनस्तमितेवागंधप्रैषः। वाग्यमनं॥ अस्तमितेवा
ग्विसर्गः। व्रतकरणप्रैषः। वाग्विसर्जनं। ततोद्विस्तनंव्रतदुघेधुक्ष्वेतिप्रैषः। ततोव्रतयोर्यथोक्तंश्रपणं॥ एत्रौमेहनस्वपनेपू
र्ववत्॥ अपराण्हेयथोक्तंव्रतकरणं॥ प्रातर्विबुद्धवाचनं॥ अनुदितेवाग्यंधप्रैषः। वाग्यमनं। उदितेवाग्विसर्गप्रैषः। व्रतकर ३१
णप्रैषः। वाग्विसर्जनं। एकस्तनंत्रिस्तनंव्रतं दुग्धंनर्षद्पएकस्तनं॥ यदिवेनत्रएकस्तनंतर्हिद्वित्रिस्तनं॥ दुग्धाययथोक्तंश्रपणं
ततः प्रवर्ग्यः। तत्राह्नः केतुनेतिरौहिणहोमः। इदंसूर्यायेत्यग्निहोत्राहुताहोमेत्यागः। उपसत् तत्रयातेअग्नेहरिशयेत्युपसदाहु
तिः॥ इदमग्नयेहरिशयायेतन्वे। इदमग्नयइतिवा। ततोर्द्धव्रतप्रदानंपत्नीयजमानाभ्यां॥ ततस्तदानीमेवद्वितीयः प्रवर्ग्यः॥ तत्र
रात्रिः केतुनेतिरौहिणहोमः॥ अग्निहोत्राहुताहोमेइदमग्नयइतित्यागः॥ ॥ततउपसदिष्टिः॥ तत्रहरिशयेत्युपसदाहुतिः॥ ततः प्र

तत१

वर्षवारणपक्षेऽपसत्समासांते पुत्रवर्गोत्सादनंभवति॥ ततष्षड्विंशाध्यायेपठितंसदिहलिख्यते॥ ॥ततोंतः पात्यसमीपेसंलग्ने·
वेदिमध्येऽपयमन्यादिसर्वंपरिघर्म्मंनिदधाति॥ ततःशालाया दक्षिणेनद्वारेणोच्छिष्टखरं निर्हृत्यदक्षिणतोविप्रकृष्टंनिदधा
ति। ततोवृत्तयजमानौशालाद्वार्यंदक्षिणेनापविशतः॥ ततोध्वर्युराजंसंस्कृत्यचतुर्गृहीतंगृहीत्वाआहवसमीपेआगच्छति॥
तिसृभिःशालाकाभिःएकःशालाकः॥ एवंविधान्त्रीन्शालाकानादायाग्नीध्रस्तेषांत्रयाणांमध्येएकमाहवनीयेप्रदीप्याहवनी
यस्योपरिमुखमात्रेधारयति॥ अध्वर्युस्तिष्ठन्स्रुक्त्विचतुर्गृहीतस्यतृतीयांशंयातेघर्मदिव्याशुगितिजुहोति॥ इदघर्मस्यदिव्या
यैश्रुचे इतित्यागः। इदघर्मायेतिवा। यातेधर्मइतिकात्यायनवचनात्॥ ततआग्नीध्रोद्वितीयंशालाकमाहवनीयेप्रदीप्यमानाभिद
ध्नेधारयति। ततोध्वर्युस्तिष्ठन्नेवयातेधर्मायेतिवा॥ ततआग्नीध्रुशालाकमादीप्यजानुदघ्नेधारयति। अध्वर्युराग्नीध्रहस्तोन्न
तोयंशालाकमादायाहवनीयेप्रास्योपविश्यचतुर्गृहीतशेषंयातेघर्मपृथिव्याशुगितिजुहोति इदंघर्मस्यपृथिव्यैश्रुचे। इदं
घर्मायेतिवा॥ ॥ततःपत्नींपुरस्कृत्यसर्वेशालायाःपूर्वद्वारेणबहिर्निष्क्रामंतिश्लेष्मस्यत्वेत्यध्वर्योर्निष्क्रमणमंत्रः। ततोंतः पा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प स्येआगत्यसामगायेतिप्रुक्तोतारं प्रेष्यति॥सर्वेनिधनंपठंति॥ततः सामसमाप्तौ सर्वसंभारवेदिंप्रतिसर्वेगच्छति॥ अर्द्धमार्गेतत्स्वंवे
निधायपुनः सप्रैषंसामगानंसर्वेषांनिधनपाठः।उत्तरवेदिसमीपेगत्वापुनरपिसप्रैषंसामगानंनिधनंसर्वेषां॥ततउपविश्यप्र
वृंजनीयस्यमहावीरस्यनाभेः पुरस्तान्नाभिसंलग्नस्यैवनिधानंयजुः स्वक्तिरितिमंत्रेण।ततः पूर्वंद्वितीयंमहावीरंनिदधाति॥ततःपू
र्वंतृतीयं॥अयमेवनिधानमंत्रः॥तृतीयमहावीरस्यपूर्वं तु लोमुपशयांनिदधाति॥परीशासावभितोनिदधाति।एकंदक्षिणतःद्वि
तीयमुत्तरतः। ततो बहिःप्रवेशेअभितोरौहिणहवन्योस्रुचौअवकूपे निदधाति॥ततउत्तरस्यारौहिणहवन्याउत्तरतोध्रुवांनिदधाति॥ ३२
दक्षिणारौहिणहवन्यादक्षिणतोघर्मासंदीनिदधाति।अभ्रेरुत्तरतः कृष्णाजिनंनिदधाति।सर्वतोधवित्राणि॥एकमासंघादक्षिणतः
द्वितीयंपश्चात्।तृतीयंकृष्णाजिनस्योत्तरतः।ततः परिधीनपिदक्षिणपश्चिमोत्तरतोधवित्रेभ्योबाह्यतोनिदधाति।ततोरज्जुसंद
नंवेदमुपयमंन्यांनिधायासादितानांपात्राणांपश्चान्नामुपयमनींप्रागग्रामासादयति॥ततउपयमन्यादंडमभितोदक्षिणोत्तरेपि-
त्वनेसादयति।ततः पिन्वनयोः पश्चात्स्थूणामयूखं।प्रागग्रंसादयतिस्थूणांदक्षिणतोमयूखमुत्तरतः।तयोःपश्चाद्धृष्टीआसादय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति। ततः सर्वपात्रमध्ये अप्सु स्कन्दकूर्चादि निदधाति॥ ततः प्रचरणीयौ स्रुवौ सर्वपात्राणामुत्तरतः। पूर्वापरौ निदधाति पूर्ववत्॥ ततोमा
र्जालीयधिष्ण्यस्य स्थानस्य दक्षिणतो वेदेर्बहिः स्तुच्छियरखरं निदधाति॥ ततोगर्मे वंतिघर्मपात्राणि घर्मं मन्त्र इति मंत्रेण दुग्धेन पूरयति॥ ता
निवसन्न। महावीरत्वयं। पिन्वने। उपयमनी स्रुवश्चेति। तत्रासेचनवतां पूरणां कुर्वता अर्द्धभूयो वा पयो वशेषणीयं॥ तस्यास्था
पनं कार्यं। अपरा ह्नेयजमानायवुतमिश्रस्य तस्य दानार्थं। ततो वर्षाहर ऽ सामगायेति प्रैषः। प्रस्तोतृस्तस्य गानं॥ ततोध्वर्युस्रुद्रपा
त्रं गृहीत्वा विक्रुद्ददिति मंत्रांते उत्तरवेदिमीशानकोणादारभ्य त्रिर्वारं परिषिंचति॥ अत्र सक्तूलमंत्रेणाद्विसक्तूत्तौ॥ ततइष्टाहोत्रीय
ऽ सामगायेतिप्रैषः। तद्गानं। तत्रापि सर्वविधनमुपयंति। ततः सर्वेषां वुहादीनां पत्नीयजमानयोश्च क्रमेण चात्वाले मार्जनं॥
सुमित्रियान इति मंत्रेण। पत्न्या अपि मंत्रपाठः॥ ततो यजमान उद्वयमित्यनेन मंत्रेणैशानीं दिशं प्रति गच्छति॥ ततः पश्चादव
लोकनम कुर्वतः। शालां प्रत्यागच्छन्ति सर्वे। ततो यजमान एधोसीति मंत्रेण समिधं हस्तेनादत्ते॥ ततः समिदसीति मंत्रेण हव
नीयेतां समिधमादधाति॥ पत्नीं च तत्कालीं गार्हपत्ये समिधमादधाति॥ ततो यजमानः स्वस्थान उपविश्य प्रतंजनीयो सुवर्णरजतश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तमानैत्तरतो ददाति। धर्मदुघामु प्राजात्न्यो ददाति॥ यजमानवृत दुर्घा होत्रे ददाति पत्नीवृत दुर्घा होत्रे ददाति पत्नीवृत दुघामुप्राजात-
न्यो ददाति॥ ततोग्नीध्रेजां ददाति॥ ॥इति प्रवर्ग्योत्सादनं॥ ॥अथाग्निप्रणयनमुपपमंत्र्युपनिवपनांतं पश्रुवत्॥ महा-
वेदि पश्चात्मुत्तरेण प्रदीप्तस्येधास्योत्तरवेदिं प्रतिहरणं कठसूत्रात्॥ ततो हविर्धानयोरक्षरे प्रक्षालनं॥ ततउत्तरवेदेः पुरस्ता-
दुभयोर्निधानं॥ तयोर्मध्ये महद्धविर्धानमध्वर्युर्गृहीत्वा वेदि दक्षिणेनानीत्वा शालाया दक्षिणतो नयति॥ प्रतिप्रस्थाता-
च द्वितीयं हविर्धानमादाय वेदिमुत्तरेणानीत्वा शालाया उत्तरतो नयति॥ शालायाः पश्चादुभौ शकटयोर्मुखे संस्पर्शयतन्द- ३३
स्ताचारः॥ ततोध्वर्युः स्वकीयं हविर्धानं शालां दक्षिणेनैव प्रत्या नयति॥ प्रतिप्रस्थाता शालामुत्तरेण स्वकीयं हविर्धानं प्रत्या-
नयति ततोध्वर्युप्रतिप्रस्थातारौ द्वे अपि हविर्धाने वेदिमध्ये शालाया अग्रे पश्चान्मुभयतः प्रागग्रे अरत्नि द्वयांतराले स्थाप-
यतिः॥ अध्वर्युः पश्चात्तोरत्निमात्रे दक्षिणं स्थापयति॥ अन्यश्च पश्चाया उत्तरतो रत्निमात्रे उत्तरं हविर्धानं स्थापयति॥ तत-
स्तयोर्द्वयोर्हविर्धानयोरुपरि उदगग्रमेकं छदिर्मध्ये निदधाति॥ छदिषोभावेभिन्नं वा। छदिस्तृणमयः कटः। वंशमयः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलंजोभिन्निः। छदिर्हविर्धानस्योपरिछादनार्थं तच्चदशारत्नी दीर्घे त्रिभागाधिकारत्निचयविस्तारं भवति॥ ततः शरेषीकानि र्मि
तां रराट्यां ललाटपट्टिकां हविर्धानयोः पुरस्तादासजति॥ अवलगयति॥ ततो द्वाभ्यामुछ्रापीभ्यां हविर्धानयोः परिवारणं करोति॥
उछ्रीये ते इत्युछ्राप्योपाभ्र्वकटको॥ तौ चाष्टादशारत्निप्रमाणौ॥ ततः पूर्वोक्तप्रमाणामेव द्वितीयं छदिः पूर्वनिहि। तस्य छदिषः
पश्चादुदग्रं हविर्धानयोरुपरि निदधाति। एवमेव तृतीयं पुरस्तादुदगग्रं निदधाति। एवं हविर्धानमंडपनिष्पादनसामग्रीं शकटयो
रुपरि स्थापयित्वा शालापामागछति॥ ब्रह्मयजमानौ शालाद्वार्यं दक्षिणेनोपविशतः। तूष्णीमासनसंस्कारः॥ ततोध्वर्युर्गार्ह
पत्ये पूर्णाहुतिवदाज्यं संस्कृत्य शालाद्वार्यं परिस्तीर्य समिधमाधाय चतुर्गृहीतं शालाद्वार्ये जुहोति युंजत इति इदं सवित्रे॥ ततदु
र्ध्व गार्हपत्यं कार्यं शालाद्वार्य एव कर्त्तव्यं॥ ततः शालाद्वार्य एवाज्यं पूर्णाहुतिवत्संस्कृत्य पुनश्चतुर्गृहीतं गृहीत्वा पत्नीभिः कमस्व
न्निप्रेष्यति॥ ततो ब्रह्मयजमानाध्वर्यवः पूर्वद्वारेणाग्निः क्रम्य दक्षिणहविर्धानसमीपे आगत्योपविशंति॥ पत्नी च दक्षिणेन द्वारेणाग्निः
क्रम्य तत्रागछति। ततोध्वर्युर्दक्षिणस्य हविर्धानस्य दक्षिणे वर्त्मनि दक्षिणाचक्रस्य मार्गे हिरण्यं निधाय परिस्तीर्य देवि छुरिति तच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुर्गृहीतमाज्यं जुहोति। इदं विष्णुर्विचक्रमे। ततः संस्रवं पत्न्या दक्षिणहस्ते निनयति। पत्नी च तेन संस्रवेण हविर्धानस्य दक्षिणमक्षधु
रमपराग्रमनाभ्यां कृत्वं देवश्रुतावित्यनक्ति। एवमनेनैव मंत्रेणोत्तरमक्षधुरमनक्ति॥ ततोऽध्वर्युराज्यस्थालीं स्रुक्स्रुवं च प्र
तिप्रस्थात्रे समर्पयति॥ पत्नी वाङ्गृहीतं दक्षिणेन द्वारेण शालायां प्रवेश्य गार्हपत्यमपरेणानीत्वोत्तरेण विहारं पूर्वद्वारे
णानि: सार्योत्तरस्य हविर्धानस्य समीपे आनयंति॥ ततः प्रतिप्रस्थाता पूर्वं संस्कृताद्वाज्यात्स्रुचि गृहीतमाज्यं गृहीत्वोत्तरस्य ह
विर्धानस्य दक्षिणे चक्रमार्गे हिरण्यं निधाय परिस्तीर्येरावतीति च गृहीतं जुहोति॥ इदं विष्णुर्विचक्रमे॥ ततः पत्न्या हस्ते संस्रवं नि
नयति॥ पत्नी च देवश्रुतावित्युत्तरस्यानसो दक्षिणमक्षधुरमनवकृतमनक्ति॥ एवमेवोत्तरं॥ ॥अष्टमाध्यायस्य तृतीया कंडिका॥ ३४
ततोऽध्वर्युर्हविर्धानप्रवर्त्तनायामंत्रितस्तु इति शाखायनसूत्रादेहि होतारिति होतारमामंत्र्य होतरि समीपे आगते सति हविर्धानमग्रं प्रव
र्त्यमानाभ्यामनुब्रूहीति होतारमाह॥ ततः प्रथमायामृचि त्रिरुक्तायां हविर्धानयोरुत्था ध्रेवप्रवर्त्तनं कुर्वंति॥ केचित्तु रथाकुरि हविर्धा
ने गृहीत्वा अग्रतो नयंति॥ केचित्तु भूमिसंलग्ने एवो त्कृतंति॥ ततो यजमानं प्राचीप्रेतमिति मंत्रेण वाचयति॥ चक्रघर्षणेन हविर्धा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नयोरक्षः खर्जन्तीति चेत्॥ तदा त्वं गोष्ठमिति प्रायश्चित्तार्थं वाचयन्ति॥ कालाकृतिश्च क्रियते॥ वरुणाय स्वाहेत्यौत्तरवेदिकाहवनीये वचनं
च॥ तत उत्तरवेदेः पश्चात्त्रिषु प्रक्रमेषु हविर्धानयोः स्थापनं॥ इत्थं परिमिते प्रदेशे वा नातिसमीपे। नातिदूरे। ततो हविर्धानयोश्चक्र
मध्यफलकाधारे स्थापनं॥ ततोऽध्वर्युरुत्तरमेथामितिति द्वे हविर्धाने अभिमंत्रयते॥ ततो द्वे प अथ न सीउत्तरेण परिक्रम्याध्वर्युर्दक्षिणं वि
र्धानमुपस्तंचतेनोपस्तभ्नाति विष्णोर्नुकमिति मंत्रेण॥ तत उत्तरीये दग्निरात्निसमचतुरस्रे हविर्धानं साधयित्वा प्रथमं तस्य हविर्धा
नस्याग्नेयकोण स्थूणां निखनति विष्णवे त्वेति मंत्रेण। ततः प्रतिप्रस्थातोत्तरं हविर्धानमुपस्तभ्नाति देवो वेति मंत्रेण॥ ततोऽध्व
र्युरेव हविर्धानस्य ईशानकोणे द्वितीयां स्थूणां निखनति विष्णवे त्वेति॥ अथवा उभे प्रथमं हविर्धानस्य दक्षिणभाग एव निखनति।
एकामाग्नेयकोणे। द्वितीयां नैर्ऋत्यकोणे॥ ततस्तत्भागे उभयोर्वाग्वीशानकोणे वायव्ये स्थूणाद्वयं निखनति॥ यदि पूर्वे आग्नेये
शानयोर्निखाते तदा नैर्ऋतवायव्ययोर्द्वे स्थूणे तूलीं निखनति॥ ततश्चतुर्ष्व कोणेषु निखातस्थूणाचतुष्टयादन्यदपि लोकसिद्धं द
शारत्निपरिमितहविर्धाननिष्पादने यद्यप्रोतितदपि करोति॥ अधिकस्थूणानिखननं॥ उपरिष्टात् छल्लकवंशादिस्थापनं च॥ पूर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प स्यां दिक्षु रत्निद्वयविस्तारं द्वारं कुर्यात्॥ अपरस्यां च द्वितीयं द्वारयोर्मध्ये पक्षा कार्या। पक्षां दक्षिणोत्तरारत्निमात्रे दक्षिणां द्वारस्थू-
णां निखनन्ति। द्वितीयां पक्षामुत्तरेणारत्निमात्रे। एवमपरद्वारेपि द्वारस्थूणयोः पक्षामभितो निखननं॥ उपरिमध्यवलः प्रा-
गग्रः कार्यः अन्यपि लोकसिद्धा वंशवलकादयः प्रागग्रा उदगग्रा वा यथासंभवं कार्याः रज्जुवृक्षत्वक्तृणादिना परस्परं निबध्नी-
याश्च एवं हविर्द्धानं काष्ठैर्वा वस्त्रि छंदयेत् ता वस्त्रि ध्यायतत्तदुपरि तश्च छादयति॥ तच्च पूर्वोक्तप्रकारेणानेनैव क्रमेण॥ पूर्वमे-
कं छदिरुदगग्रं हविर्द्धानस्योपरि मध्ये निधाय पुरस्ता ~ रथां ललाटपट्टिकां पूर्वद्वारस्योपर्यवलगति॥ वध्नाति॥ ततः पूर्वद्वा-
रस्य दक्षिणद्वार्याया आरभ्यापरद्वारस्य दक्षिणां द्वार्यां यावद्दक्षिण्या हविर्द्धानस्य दक्षिणपार्श्वे परिश्रयणां वेष्टनमावरणं क- ३५
रोति॥ ततोपरद्वारस्योत्तरद्वार्याया आरभ्य पूर्वद्वारस्योत्तरद्वार्यां यावद्वितीयया च्छाया हविर्द्धानोत्तरपार्श्वे परिश्रयणां आव-
रणं करोति॥ ततो हविर्द्धानस्योपरि पूर्वं छदिषः पश्चादुदगग्रं द्वितीयं छदिर्निदधाति॥ ततः पूर्वस्थापितछदिषः पुरस्तात्तृती-
यं छदिरुदगग्रं निदधाति॥ एवं हविर्द्धानं परितदुपरि द्वाभ्यां छादयित्वा ततो यजमानं प्रति मध्यमं छदिरालभस्वेति॥ प्रेष्यति। ततो यजमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नोमध्यमंस्तुदिरालभन्ते॥ अध्वर्युः पुनर्द्विस्तुरितियजमानंवाचयति॥ ततोरराघ्यामालभस्वेतियजमानंप्रत्याह॥ ततोयजमानोर
राघ्यामालभन्ते॥ तत्रकृतान्वारंभंयजमानंविद्वान्रराटमसीतिवाचयति॥ ततउष्णुग्याभ्यावालभस्वेति॥ यजमानंप्रत्याह॥ ततो
यजमानः पूर्वद्वारेस्थित्वाद्वेअप्युष्णुग्याभ्यावालभन्ते॥ ततोविद्वान्ः श्नप्रेष्येतियजमानंवाचयति॥ ततोध्वर्युः पूर्वद्वारस्यद
क्षिणस्थूणांमूलतोग्रपर्यन्तपुत्थाप्याः प्रांतेनसहपरिव्ययति। परिवीवणेनोच्छ्रायींस्थूणायासहवध्नातीत्यर्थः। तत्रैवं। पूर्वकाष्ठ
स्तस्यामूलछिद्रेमुंजरज्जुंप्रवेश्यतांप्रोतयित्वातांकाष्ठस्यचिमुच्छ्रायप्रवेश्यतन्मूलप्रोतपारज्ज्वाविद्वान्ः स्पृरितिमंत्रेणसीव्यति।
उत्थायीप्रांतस्थूणांचसंयोजयतीत्यर्थः॥ एवंपरिवीवणस्यप्रारंभंकृत्वाविद्वान्ध्रुवोसीतिमंत्रेणसूचीप्रोतरज्जुमूलेग्रंथिंब
ध्नाति॥ एवंरज्जुमूलेग्रंथिंकृत्वातांरज्जुंस्थूणामूलेप्रदक्षिणामावेष्ट्यावेष्ट्यतरज्जुस्थूणांतरालेनाधः सूचिंप्रवेश्योर्ध्वंनिःकास
येत्॥ एवंपुनः पुनरुच्छ्रायीप्रांतेरज्जुंप्रवेश्यप्रवेश्यस्थूणाग्रपर्यंतंप्रदक्षिणांस्थूणामुच्छ्रायीप्रांतेनपरिवीयांतस्थूणयासहर
ज्जुंबध्वामूलग्रंथिविसृष्टसनंकुर्यात॥ एवंसर्वस्थूणानांप्रदक्षिणांपरिवीवणंकार्यंपूर्वद्वारस्योत्तरंस्थांस्थूणांयावपरिसमाप्तिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं परिपूर्णं हविर्द्धानं निष्पाद्य वैष्णवमसि विष्णवे त्वेत्येतावता मंत्रेण तदभिमृशति ॥ ॥ ततस्तु धुर्गरागप्राप्तमन्नादेर्योजनं हविः
शेषस्य सोमादेर्भक्षणं च हविर्द्धानमध्येन कर्त्तव्यं ॥ हविर्द्धानमध्ये सोमे अप्सु च प्रवेशिते शुभ्रकारेण प्रेक्षमाणं प्रतिमा प्रेक्षथा
इति ब्रूयात् ॥ सदसि चैवं स्तोत्रशस्त्रकाले ॥ ॥ इति हविर्द्धाननिष्पादनं ॥ ॥ अष्टमाध्यायस्य चतुर्थकंडिका ॥ ॥
अथोपरवखननविधिः ॥ दक्षिणस्य हविर्द्धानस्य यत्तु तुंगं तस्याधोभूमौ तूपरवान्खनति ॥ तत्र च हविर्द्धानमध्यात्प्रच्छेदेन चतु
र्द्धा विभज्य दक्षिणपूर्वं चतुष्कमध्ये प्रादेशद्वयपरिमाणं चतुरस्रं साधयित्वा तस्य कोणेषूपरवान्परस्परं प्रादेशमात्रांतरालां
न्परिलिखति ॥ तत्र पूर्वमभ्रादानं देवस्य त्वा स० आददे नार्यसीत्यनेन ॥ ततो दक्षिणपूर्वं परिलिखति ॥ इदमहं० रक्षसा ३६
मिति मंत्रेण । ततः उत्तरापरं परिलिखति । ततो दक्षिणापरं । ततः उत्तरपूर्वं । इदमहमिति सर्वेषां प्रत्येकं मंत्रः । अथवा प्रथममु
त्तरापरं । ततो दक्षिणपूर्वं ततो दक्षिणापरं । ततः उत्तरपूर्वमिति परिलेखनक्रमः ॥ अथवा दक्षिणपूर्वादारभ्य प्रदक्षिणमुप
रवखननं । सर्वपक्षेषूत्तरपूर्वमुपरवं तेष्वेव परिलिखेत् ॥ ततः परिलेखनानंतरं यथापरिलिखितं परिलेखनक्रमेण हस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सीत्सनेन वै स्तवीमित्यंते नाखननति ॥ सर्वेषामपमेवखननमंत्रः॥ ततइदमहं तामित्यादिभिश्चतुर्भिर्मंत्रैः प्रतिमंत्रंखननक्रमे
णोपरवेभ्यः पांशूनुनिष्कास्य पुरस्तादुत्तरतोवापुरीषंपति॥ ततःपुनस्तूष्णीमेवखात्वाखात्वातूष्णीमेव पुनःपुनः पांशुनि
ष्कासनं॥ यावद्बाहुमात्रंखननंसंपद्यतेअंतेपर्यास्यत्रपनंतत्सर्वेभ्य उपरवेभ्य उत्कृत्यांकिरामीत्यनेनकर्तव्यंप्राचीं
उदीचींवा॥ एतावत्पर्यंतंसर्वत्रखननक्रमएवतत्रदक्षिणक्रमः॥ पश्चात्सर्वेभ्यउत्कृत्यपश्चादित्यस्यानेरत्यर्थः।
कुतः॥ उत्कृत्यांकिरामीत्यंततउद्वपतीतिश्रुतेः।अंततइत्यंतेइत्यर्थइतिहरिस्वामिनः। एवंबाहुमात्रान्खात्वाअस्याया
विध्वातेषांपरस्परंसंभेदंकुर्यात्॥ पूर्वदक्षिणस्योत्तरापरेणउत्तरापरस्य पूर्वदक्षिणेनेति।अस्यायासंभेदनाशक्तौसम्यकू
समतयैवसभेदंकुर्यात्॥ तच्च दक्षिणपूर्वस्यापरदक्षिणेनसहतस्योत्तरापरेणतस्योत्तरपूर्वेणतस्यपूर्वदक्षिणेनेति।पूर्व
योर्नसंभेदनमितिकर्कः।ततउपरवानवमृशस्वेतियजमानंप्रतिप्रैषोध्वर्योः॥ ततोयजमानस्वराडसीतिप्रतिमंत्रंखननक्रमे
णाउपरवाणामवमर्शनंकरोतिनिम्नोन्नतत्वपरिहारार्थंखातस्यस्रुवाग्रप्रमाणतासंपत्तिविश्वासार्थंचमध्येतत्वपर्यंतंसर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ०प

तः स्पृशतीत्यर्थः॥ ततोध्वर्युयजमानौ हस्तावुपरवयोः प्रवेश्य भेदमार्गेण परस्परं हस्तस्पर्शीकुरुतः। तत्राध्वर्युराग्नेयकोणो
परवे हस्तं प्रवेशयति। वायव्यकोणोपरवे च यजमानो हस्तं प्रवेशयति॥ एवं हस्तौ प्रवेश्य परस्परं स्पृष्ट्वाध्वर्युर्यजमा
नं पृच्छति यजमान किमत्रेति॥ ततो यजमानो भद्रमिति प्रत्याह॥ ततोध्वर्युरुपांशु तन्नौ सहेत्येवं ब्रूयात्॥ तत उत्थापनैर्ऋ
तकोणोपरवेध्वर्युर्हस्तं प्रवेशयति॥ पूर्वोत्तरे यजमान ईशानकोणोपरवे हस्तं प्रवेशयति। ततः संभेदमार्गेण परस्परं स्पृ
ष्ट्वा यजमानोध्वर्युं पृच्छति॥ अध्वर्यो किमत्रेति॥ ततो भद्रमित्यध्वर्युः प्रत्याह॥ ततो यजमानस्तन्मन्नुपांशु पठति॥ त
तो लौकिकोदकेन पूर्वदक्षिणाद्युपरवादारभ्य प्रदक्षिणमुपरवान्प्रोक्षति रक्षोहणो वो वलगहनः प्रोक्षामि वैष्णवानिति।
प्रत्युपरवं मंत्रावृत्तिः। ततो रक्षोहणो० नो वनयामीत्यनेन प्रदक्षिणं सर्वेषूदकशेषावनयनं करोति॥ ततो बर्हिः ८ विभ्रा
गशाग्रपदगणानि चोपरवाणामधः प्रदक्षिणमवस्तृणाति। रक्षोहणो० वलगमवस्तृणामीति मंत्रावृत्तिः॥ तत उपरवाणामुपरि
सूक्ष्मान्कुशान्बहूनास्तीर्य तेषामुपर्यधिषवणफलके वारणे प्रादेशमात्रे विपुले अरत्निमात्रे दीर्घे व्यंगुलांतें परस्परं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संनह्णो वा कीलकैः संधिते वा प्राक्शालि ते प्राग्ग्रेषूपदधाति ॥ रक्षोहणो० इत्यनुपदधामि वैष्णवीरिति मंत्रेण । अनभ्रात्वा दालां
हनैः पांसुभिरधिषवणफलके पर्यूहति मध्ये च भूमिं पूरयित्वा दृढं करोतीत्यर्थः । तत्र रक्षोहणो वां वलगहनो पर्यूहामि वैष्णवी
इति मंत्रेण । ततस्तयोः फलकयोरुपर्यधिषवणं चर्मं परिसमंतात्कर्तनेन वर्तुलत्वमापादितं सर्वं रक्तं वैष्णवमसीति मंत्रेणानि
दधाति । ततस्तस्मिंश्चर्मणि पंच ग्रावाणो निदधाति वैष्णवास्थेति मंत्रेण । तत उपरवाणां पुरस्ताद्यथास्वमार्गं चतुरस्रं खरं करोति
तत्र उच्छ्रिखा भुक्षेति संस्कारवयं कृत्वा सिकतानुपकिरति ॥ ॥ इत्युपरवखननं ॥ ॥ अथ सदसः करणमुच्यते ॥ तत्रातः
पात्यात् षट्क्रमान् प्राच आपद्यायामुपरिगत्वा ततो दक्षिणस्यां दिशि महांतं सततमपदं प्रक्रम्य तत्रौदुंबरीमुदुंबरवृक्षजातां सं
कर्णां सदसोमध्यस्थूणां यजमानप्रमाणां निखनति सदसो दक्षिणार्द्धस्य मध्ये औदुंबरी भवति । तत्र देवस्य त्वेत्यभ्रादानं । इद
महमित्यवटपरिलेखनं ॥ उदकालंभः । औदुंबरीपंचमांशसंमितं खननं । प्राच्यां पांसूद्वापः । अवटस्य पुरस्तात्सागग्रायामौ
दुंबर्या निधानं । तस्या उपरि कुशमुष्टिनिधानं । ततो यवोशीत्यप्सु यवावपनं । ततस्ताभिः सयवाभिरद्भिर्दिवे त्वा प्रोक्षाभीत्यौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प उंवर्यग्रप्रोक्षणं ॥ अंतरिक्षाय त्वा प्रोक्षामीति तन्मध्यप्रोक्षणं ॥ पृथिव्यै त्वा प्रोक्षामीति तन्मूलस्य प्रोक्षणं ॥ ततः शुंधंतामिति
उदकस्रोतस्या वटेति नयनं । उदकालंभः ॥ ततः पितृषदनमसीति प्रागुदगग्रबर्हिषामवस्तरणं ॥ उदकालंभः । ततउद्दिवमि
त्यौदुंबरीमध्वर्युरुच्छ्रयति ॥ उज्ञाताय ध्वर्युणा सहोच्छ्रयणं करोति ॥ ततोध्वर्युर्यजमानश्चौदुंबरीमूलं पंचमभागमवटमध्ये प्र
वेशयति ॥ ततो ब्रह्मवनित्वेति उपांशुनि खटं पूरयति ॥ ततो ब्रह्म ८ हेति मेत्रावरुणादंडेन सर्वतश्चिः प — पतिपरिपिद्दय
ति । उत्खातं पुरीषमवटमध्ये प्रवेशयतीत्यर्थः ॥ स कृत्स्नं त्रिणा छिन्नत्ति । ततः समं भूमिं कृत्वा अद्भिरुपसिच्य औदुंब ३८
रीमालभस्वेति । यजमानं प्रेष्यति ॥ यजमान औदुंबरीमालभते ॥ ततोध्वर्युः कृतालंभं यजमानं ध्रुवासि ध्रुवो यमिति वाचय
ति ॥ अत्र मंत्रे अस्मिन्नायतने पुत्रपाशव्यादिति पठितव्यं ॥ अस्मिन्नायतने पशुभिर्भूयादित्येवं वा ॥ ॥ अत आज्यसंस्कारः स्रुवस्ये
व संमार्गः ॥ औदंवर्याः परिस्तरणं ॥ ततः स्रुवेणाज्यं गृहीत्वौदुंबर्यग्रे कर्णयो रंतराले जुहोतीति भूमिपर्यंतं स्रावयति ॥ घृ
तेन द्यावापृथिवी इति मंत्रेण । होमस्थानात् घृतेन भूमिं प्राप्नेत्याहेति वदति ॥ इदं द्यावापृथिवीभ्यां ॥ मनुः । अंतराकर्णौ हि र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णं निधाय घृतेनेत्यभिजुहोति आमूलाद्वल्कायययतीति ॥ तथा औदुंबरीं वर्विल्वास्थूणानां क्रमो यस्योन्या इति
च ॥ ॥ सर्वत्र मंत्रवत्सु होमेषु नाम्नातो पित्वा हाकारः कर्तव्यः ॥ ५ ॥ अष्टमस्य पंचमी कण्डिका ॥ ॥ अथ सदहोमानं ॥
तत्र ऊर्ध्वदगायतं अष्टादशारत्निदीर्घं । तदर्द्धेन तिर्यक् । अथवा एकविंशत्यरत्निदीर्घं । तदर्द्धेन तिर्यक् । नवारत्निर्वा । सर्वपक्षे कूर्दगा
यामस्य मध्ये पश्चात्कार्या । अर्द्धपश्चाया दक्षिणतः ॥ अर्द्धमुत्तरतः ॥ प्रागायामस्य मध्ये औदुंबरी । अष्टादशारत्निपक्षे सदसः साधनश्लो
कः । नवके लक्षणं कुर्यात् त्रीणि कुर्यात् त्रिषु त्रिषु । उत्तमो नवकः पाशः सदहोमानत्रुच्यते इति ॥ मध्यवलकूददर्वंशः कार्यः ॥ पूर्व
स्यां दिशि द्वारं कार्यं अपरस्यां च । पश्चात् उभयतो द्वार्यो हविर्द्धानवत् ॥ कोणेषु स्थूणानि खननं ॥ लोकत एवार्थात् प्राप्नोति वल
कवंशनिधानवंधनादि तत्सर्वं कृत्वा नवभिः कूदिर्भिः पर्याच्छादनं कुर्यात् ॥ छदीं बिलदलो दीर्घप्रमाणतः नीयभागे नदीर्घाणि ॥
विस्तारतः नीयेन च विस्ततानि भवंति ॥ तानि च त्रीणि पूर्वापरायफ दगग्राणि सदसो दक्षिणभागे ॥ एवमेव त्रीणि मध्यमे भागे ॥
एवमेव त्रीण्युत्तरभागे तत्र मंत्रः ॥ इंद्रस्य छदिरिति मंत्रेण प्रथमं दक्षिणभागे ॥ मध्यमं छदिरुदगग्रमात्रे पत स्यपश्चाद्दैवमेवधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीयमारोपयेत्॥ मध्यमस्यपुरस्तादेवमेवतृतीयं॥ अनेनैव क्रमेण मध्यप्रदेशेऽन्तरप्रदेशे चत्रीणि त्रीणि छन्दांस्यारोप
येत्॥ प्रतिछन्दिर्म्मत्राहुतिः॥ शाखांतरेयत्रविशेषस्तदिष्टासंख्याविशेषः। आपस्तंबः। नवाग्निष्टोमे पंचदशोक्थे षोडशषोडशि
निसप्तदश वाजपेयेति एतेचैकविंशतिः सत्राहीनानामितिमानवेच॥ नवछन्दांस्यग्निष्टोमेऽदक्लानि पंचदशोकथे सप्तद
शातिरात्रे एकविंशतिसत्राहीनयोरेकादशषोडशिनिवाजपेयेचेति॥ ततः षड्भिः परिवारकैः सदसः परिवारणं॥ ईशानको
णादारभ्य पूर्वद्वारेत्तरस्थूणां यावत् पूर्वपार्श्वे प्रथमं॥ पूर्वद्वारदक्षिणस्थूणात आरभ्याग्नेयकोणांतं पूर्वपार्श्वे द्विती
यं आग्नेयकोणादारभ्य दक्षिणपार्श्वे नैर्ऋतकोणांतं तृतीयं॥ नैर्ऋतकोणादारभ्यापरद्वारदक्षिणस्थूणापर्यंतं पश्चि
मपार्श्वे चतुर्थं। अपरद्वारोत्तरस्थूणात आरभ्य वायव्यकोणांतं पश्चिमपार्श्वे पंचमं॥ वायव्यकोणादारभ्येशानकोणांत
मुत्तरपार्श्वे षष्ठमिति॥ एवं षड्भिः परिवारणं परिव्येति प्रत्येकं मंत्रावृत्तिः। ततो हविर्धानवत्सूत्रस्तोद्वार्याः परिवारणक
टकप्रांतैः सहपरिषीव्यति॥ तत्रविशेषः। द्वार्याः परिवारकैरसह परिषीव्यते इदमस्य स्तूरितिमंत्रः। रज्जुमूले ग्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिंकरोमि गोइंद्रस्य क्रुवो सो नितन्तो निष्ठ्यं नं सदहें द्रमसी त्यभिमन्त्र्यानि॥ ॥इति सदो निष्पत्तिः॥ ॥अथाग्नीध्रुष्पादनमुच्य
ते॥ तत्र हविर्द्धानगृहस्यापरभागमुत्तरेण भवति॥ हविर्द्धानं च दशारत्नि दीर्घं। तस्य पूर्वो विभागः पंचरत्निः। अतस्तं पंचार
त्निपरिमितमपरभागमुत्तरेण पंचारत्निप्रमाणमेव समचतुरस्रं दक्षिणापूर्वद्वारमाग्नीध्रुं साधयेत्॥ तथा कर्त्तव्यं। यथा हवि
र्द्धानाग्नीध्रयोरपरांतौ समौ भवतः। इदमेव चाग्नीध्रस्य स्थानं कुतः। उत्तरेण हविर्द्धाने दक्षिणेनाग्नीध्रमिति ज्ञापकात्। ह
विर्द्धानाग्नीध्रांतरे द्रोणकलशमेनामाघ्राप्यतीति सूत्रकारप्रस्थानाच्च॥ तदाग्नीध्रमर्द्धं वेदिमध्ये। अर्द्धं बहिर्वेदि॥ अथ
वा वक्रु वेदिमध्ये अल्पं बहिः। अथवा सर्वमपि वेदिमध्य एव कर्त्तव्यं॥ अत एव ज्ञापकान्महविर्यां संग्रहो न भवतः। तयोर्हि क्रु
तयोराग्नीध्रस्य सर्वस्यांतर्वेदिकरणपक्षाश्रयणो हविर्द्धानाग्नीध्रांतरे संचरो न वा क्लिप्यते॥ तथा सति हविर्द्धानाग्नीध्रीययोरंतरग
मनविधानानि वाध्यंते॥ आपस्तंबवचनाच्च॥ वेदिं करोति दर्शपूर्णमासवत्सन्नमनवर्जमिति सन्नमनं मध्यसंगृहीतकरणं। प्रकृता
वुक्तं॥ मध्ये संनततरा भवतीति॥ एवमाग्नीध्रं परिपूर्णं कृत्वा लीमेव निष्पाद्य वैश्वदेव मसीत्यालभते॥ ॥इत्याग्नीध्रकरणं॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

अथ धिष्ण्यनिवापः प्रोच्यते ॥ आग्नीध्रस्य मध्ये आग्नीध्रीयं अष्टादशाङ्गुलं समचतुरस्रं कुर्यात् ॥ तत्र उदङ्मुखः पंचभूसंस्का
रान् कृत्वाभिरक्षोमुष्येति संस्कारद्वयमधिकं कृत्वा वात्वालाय हृतं पुरीषं यजमानेनान्वारब्धे स्त्र्येन संस्कृतायां भूमौ निवप
ति विभूरसीति तत्र स्थले नवचतुरस्रमष्टादशाङ्गुलं धिष्ण्यं रचयेत् ॥ ततो रौद्रेणानीकेनेति सिकताः प्रकिरति ॥ ततः सदसि षट्
धिष्ण्यान्निवपति ॥ तत्र धिष्ण्यस्थानविधायकश्लोकः ॥ ॥ सदो मध्यमरेखायां तत्रोदीचीनिरामया ॥ तस्याः प्राच्यं पदं
त्यक्त्वा ततो धिष्ण्यानि कारयेत् ॥ इति ॥ तत्र पूर्वद्वारमपरेण पश्चायामुत्तरतः संलग्नमेव होतृधिष्ण्यं ॥ ओं वर्याग्नेय्यां मैत्रा ४०
वरुणं धिष्ण्यं होतृधिष्ण्यमुत्तरेणाष्टादशाङ्गुलमन्तरं परित्यज्य ब्राह्मणाच्छंसि धिष्ण्यं निवपति ॥ तस्योत्तरतो ह्यावाकधिष्ण्यं ॥
सर्वेषां धिष्ण्यानामष्टादशाङ्गुलापि प्रमाणं ॥ अंतरालं चाष्टादशाङ्गुलं भवति ॥ एवं सर्वेषां धिष्ण्यानां स्थानानि साधयित्वा क्र
मेण निवापं कुर्यात् ॥ तत्र पूर्वत्प्र उदङ्मुखो होतृधिष्ण्ये सप्त संस्कारान् कृत्वा पुरीषं निवपति वह्निरसीति स्र्येनान्वारब्धे ॥ ऐन्द्रेणे
ति सिकतानिवपति ॥ ततो मैत्रावरुणादीनां धिष्ण्येषु पंचसु सर्वमाग्नीध्रीयवदुदङ्मुखः सिकतोपनिवपनांतं करोति पुरीषं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवापमंत्रमात्रेविशेषः॥ क्रान्त्रोसीतिमैत्रवरुणस्य॥ तुथोसीतिब्राह्मणाच्छंसिनः। उशिगसीतिपोतुः। अंघारिरितिनेष्टुः। अवस्यू
रित्यच्छावाकस्य॥ एवंदक्षिणधिष्ण्यानांनिवापंकृत्वाआग्नीध्रीयधिष्ण्याद्दक्षिणंसंप्रतिआर्जवेनवेद्यंतेवेदिमध्येमा
र्जालीयधिष्ण्यंसाधयेत्॥ वेदिपूर्वांतदक्षिणांतयोःकिंचिदर्धच्छिद्रमंतरालंरक्षणीयंनतुपूर्वांतएवधिष्ण्यकरणं॥ तत्रसप्तसंस्काराः द
क्षिणाभिमुखोयजमानान्वारब्धः शुंध्यूरसीतिस्फ्येनपुरीषंनिवपति॥ रौद्रेणेतिसिकताभ्यप्रकिरतिसर्वधिष्ण्येषु॥ अन्वारंभकृ
सर्वधिष्ण्येषुपुरीषनिवापमात्रमेव। केचित्सर्वधिष्ण्येषुसप्तसंस्कारान्सिकतानिवापेचप्राङ्मुखाःकुर्वंति॥ ॥ततःसदोद्वा
रंपूर्वेणोत्तिष्ठन्नध्वर्युःसम्राडसिकृशानुरितिप्रतिमंत्रमाहवनीयादीनीक्षते॥ सम्राडसीत्याहवनीयं॥ परिषद्यइतिचात्वालस्यद
क्षिणतोवेदिमध्येवर्हिष्यवमानदेशं। नभोसीतिचात्वालं॥ संमृष्टोसीतिशामित्रं॥ ऋतधामेत्यौदुंवरीं॥ समुद्रोसीतिब्रह्मासनं। प्र
शास्तृधिष्ण्यान्नैर्ऋत्यांवर्तमानं। तत्रैवस्थितःपश्चिमाभिमुखोभूत्वाअजोसीतिशालाद्वार्यं॥ ततोऽहिरसीतिप्राजहितं॥ ततःप्राङ्मु
खोभूत्वासमूढोसीत्यनेनोत्करमीक्षते॥ ॥अथाग्नीषोमीयस्यप्रारंभः॥ द्विरासनं। ब्रह्मयजमानयोरुत्तरवेदिंदक्षिणेनबहिर्वे

व२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प दिवेदिस्पृष्ट्योरुपवेशनं ॥ वृणाः समंत्रक आसनसंस्कारः । यजमानवाचं यच्छेति प्रैषः प्राजहितवर्जं परिस्तरणं ॥ शालाद्वार्यस्य
पश्चादुत्तरतो वा पात्रासादनं अग्निहोत्रहवणी । वज्रः शम्या दृषदुपलं । पवित्रच्छेदनानि पवित्रे । स्थाली आज्यं च वेदश्च । अभ्रिः ।
इध्मं चतुष्टयं आतिथ्यासंवंधिवर्हिश्चतुष्टयं । तत्र वर्हिर्वेदिमध्यादुद्धृत्य सन्नहनेन वध्वानुपकल्पते ॥ शकटं वर्हिश्च ॥ स्रुवः
स्रुक्कंकं च पात्रे जनीसप्तकं ॥ पूर्णाष्टकं ॥ उखापंचकं । मंथनचतुष्टयं ॥ प्राशित्रहरणं इडापात्री षडवत्तयोर्कृतकुशाः । कुशास्तृतं
पीठं ॥ अंतर्धानकटः ॥ सर्वाणि सोमपात्राणि च । ग्रावाणोप्यधिषवणदानीयेहोपकल्प्यंते ॥ ततो वाग्यतः पवित्रे छित्वा प्रोक्षणीः ४१
संस्कृत्य पात्राणि प्रोक्ष्य संचरे निदधाति । कुक्कुटाहननं आज्यनिर्वापः वेदवधः । ततो भ्रिमादाय महावेदेः खननं । उत्तरपरिग्र
हः । अंतःपात्यसंलग्नं वेदिपश्चिमांते अनुमार्जनं ॥ स्व स्रुवेणाज्यच्छेदवत्तापाकरणादिकालस्यानुक्तत्वात्स्रुचांतरोक्तकालेषु
कर्त्तव्यं ॥ तत्र प्रातः प्रथमोपसदोनंतरं वा उपसत्समासानंतरं वा उत्तरपरिग्रहानंतरं वा वर्हिः प्रोक्षणाद्याग्नीध्रेण शाखा
च्छेदनानुमार्जने कृत्वा सवनत्रयार्थं दध्यर्थं त्रयाणां षड्गृहीतानां क्रमेणापाकरणं कर्त्तव्यं ॥ तत्रैवं प्रायसरस्वतिवते भागामितिगोः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाखया स्पर्शने विशेषः। प्रातः सवनदप्यर्थं वत्सापाकरणानंतरं च सपूर्वगर्ये दक्षिणर्मार्थं वत्सापाकरणं। नवेंद्रायभागमिति॥ त
तउपवेषकरणं। शाखोपगूहनमिति॥ ततोग्नीद्रतः पात्रसन्निधौ वेदिमध्ये समीप एव प्रोक्षणीर्धारयति। ततो ध्वर्युः स्फ्यमुप
स्यप्रोक्षणीरासादये ध्मं वर्हिरुपसादयेति षंडपैर्वदाति॥ अत्र नस्योदकग्रहारः पाणेः प्रक्षालनं॥ ततोग्नीत्प्रोक्षणीरंतः पा
त्र्यदेशे आसाद्ये ध्मं आतिथ्य वर्हिः शकटवर्हिश्चासादयति अंतः पात्य एव। अत्राहविष्कृतिः। ग्रावद्रोणकलशादिकं सौमिकं इध्म
वर्हिश्च जुह्वादिपात्रकं च सर्वमयज्ञासादयति सर्वशाखान्॥ ततो ध्वर्युः प्रोक्षणीरनुप्रयैवांतः पात्यदेशे समीप एव वेदिरसी
त्वि वेदिं प्रोक्षति॥ ततः इध्मं वर्हिश्च जुह्वं यंवाग्नीषोमीयार्थं निधाय वुध्मन्वर्हिः प्रोक्षिष्यामीति पृष्ट्वा शकटवर्हिषः प्रोक्षणं करो
ति॥ तत्र पयस्यापक्षे वर्हिः रसिक्त्वा यां त्वेति॥ अनूवंध्यापक्षे वर्हिरसित्वा जुष्टमितिविशेषः। अदित्यै व्युंदनमित्यस्येनोदकेन
मूलान्युपसिंचति॥ वकृतरमवशेषयति॥ ततोऽपराह्णि वर्हिर्विस्रंसनं। नपुस्तरग्रहणं। संनहनविस्रंसनाद्यवछादनांतं॥ ततो
वेद्यां पतितं तृणादिकमुत्करे प्रक्षिपोत्तरवेदित्वरोपरवधिम्य वर्जं सर्वा वेदिमुपयस्याहृदयुग्धान्तुसृणीयात्॥ पूर्ववत आरभ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प

स्तीर्यमाणस्याग्नेः पूर्वस्तु नस्य मूलानि प्रच्छाद्य प्रत्यगपवर्गं स्तृणीयात्। ततो यजमानायार्द्धवृतप्रदानं॥ सप्रवर्ग्ये च्चेत्प्रवः
र्ग्योत्सादनदेशे बंधं पूर्वं वृतभाजने आसिञ्चति स्मिन्नर्द्धवृतमासिञ्च यजमानाय प्रयच्छेत्॥ साग्निचित्ये वृतं पूर्वमेव सर्वं सम
र्पितं चेत्क्केवलस्यापि प्रवर्ग्योत्सादनदेशे यस्यान्नप्रदानं कार्यं॥ पत्न्याश्चार्द्धवृतप्रदानं॥ ततो ध्वर्युः शालां प्रविश्य शालाद्वार्ये
आग्नीध्रीयाग्नेः प्रणयनार्थं शालाद्वार्ये इध्माधानं कुर्यात्॥ तत्र वृत्व यजमानयोर्दक्षिणातः प्रवेशनं वृत्वा च स्वासनादुत्थाय
पूर्वेणोत्तरं वेदिमाग्नीध्रीयमुत्तरेण शालाद्वार्यं पूर्वेणागत्य शालाद्वार्यस्य दक्षिणातः उपविशति॥ ततः इध्माधिश्रयणं। ततवृ
पयमनीनामुपकल्पनं॥ ततोग्नीध्रस्त्व शालाद्वार्य एवाज्याधिश्रयणं। पर्यग्निकरणं॥ उदकालंभः। ततः स्रुचमादायां ४२
तःपात्रेगत्वा स्रुचः संमृष्टि पत्नी ८·संनह्याज्येनोदेहीत्यवशिष्टः प्रैषः। अत्र स्योदक्यहारः॥ अंतःपात्रेस्थ्यासादनं॥ ततोनि
रूढपशुवच्छालाद्वार्ये पात्रसंमार्गः॥ संमार्जनानां पशुवन्नरक्षणं। ततः पत्नीसंनहनं॥ आज्योद्वासनं। पत्न्यावेक्षणं॥ ततआज्य
मादाया नीअयंतःपात्रे प्रोक्षणीनां यथास्थासादनं ततो यजमानः उत्संगे सोमं निधाय शालाद्वार्यमपरेणोपविशति॥ ततो·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्युः सोमक्रयणीपदं यजमानस्याग्रे शालाद्वार्यमपरेणापरिकिरति॥ अथवैतत् सोमक्रयणीपदं चतुर्धा विभज्य एकं भाग
माहवनीयप्रणयनकाले उपयमनीषु प्रक्षिपेत्॥ द्वितीये भागेनाक्षधुराभ्यंजनं कुर्यात्॥ तृतीयं भागमाग्नीध्रीयस्योपम
नीषु प्रक्षिपेत्॥ चतुर्थं भागमत्रावसरे शालाद्वार्यमपरेणपरिकिरेदिति॥ ततोनंतः पात्वदेशे आज्योत्पवनं॥ प्रोक्षणफस्य व
नं॥ आज्यावेक्षणं॥ इक्षणेनेनानाज्यकरणं॥ ततः पृषदाज्य संयोजनं॥ पशुवदाज्यग्रहणं॥ आज्यनाधारणं॥ यजमा
नस्य पुत्रपौत्र भ्रातादपश्चापि वृता अविभक्तधना यजमानमन्वारभंते॥ तेषांसयजमानामेकेनवाससाछादनं॥ इतस्त
तस्ततश्चरत्स्वपि वृतेष्वन्वारंभस्यानादरः॥ ६ ॥ षष्ठीकंडिका॥ ततः प्रदीप्तस्येध्मस्योपरि त्वष्टः सोमेति प्रचरणापा
लाइपास्रुचाज्यस्थाल्याः। सकृद्गृहीतमाज्यं गृहीत्वा जुहोति॥ इदं सोमाय। ततः सकृद्गृहीतेनैव जुषाणो अप्तुरिति। द्वितीया
माहुतिं जुहोति॥ इदमप्तवे॥ ततइध्मसंनहनम्योपयमनीभिहृपयम्यच होतारं प्रत्यग्नयेप्रक्रियमाणायानुब्रूहीति प्रैषः॥
सोमायप्रणीयमानायानुब्रूहीति वा॥ ततः पंचग्रावाणो द्रोणकलशं सर्वाणि सोमपात्राणि इध्मं वर्हिश्चानुष्टुपं वसंनहनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प वर्हं। वपाश्रपण्यौ द्विगुणांत्रिगुणोद्देशने मंथनवजुष्यं च॥ एतान्यादाय सर्वे आहवनीयं प्रत्यध्वर्युमनुगच्छंति ब्रुत्वा च। गमनेप्रा
रब्धे गते नयेति। यजमानं वाचयति॥ सदउत्तरेणौतस्सर्वं हृत्वा आग्नीध्रे दक्षिणद्वारेण प्रविश्याधिष्ण्यस्योपरि धारयित्वा स्थापयति॥
निधानात्सर्वं ब्रुत्वा यजमानो दक्षिणात उपविशतः॥ ब्रुत्वाग्नीध्रमुत्तरेण गत्वा पूर्वद्वारेण प्रविश्य धिष्ण्यस्य दक्षिणत आस्ते। ब्रु
त्वा णात्रूलीमासनसंस्कारः॥ अध्वर्युः प्रचरणीमाज्यस्थाल्याः सकृद्गृहीतमाज्यं गृहीत्वा परिस्तरणं समिदाधानपूर्वकं आ
ग्नीध्रीये अयं त्वस्तिजुहोति॥ इदमात्र यह्स्येतावानेव त्यागः॥ होमानंतरं ग्रावद्रोणकलशसोमपात्राणि यैर्गृहीतानि त एवा ४३
ग्नीध्रमध्ये निदधति॥ सोमासंघा अर्थ्यादानी मेवाग्नीध्रे निधानं मानवेत्युक्तं॥ ततः शेषमिध्मादिकमादायाग्नीध्रीयमुत्तरेण ग
त्वा पूर्वद्वारेण निःक्रम्य गत्वा आज्यसोमवर्जितं सर्वमाहवनीयस्योत्तरतो निदधाति॥ ब्रुत्वा च पूर्वेणाहवनीयं गत्वा दक्षिणतो
वहिर्वेद्युपविशति॥ ततः प्रोक्षणीरादाय ध्मप्रोक्षणं॥ हवीरोत्तरार्द्धे प्रोक्षणां वेदिरसौत्रे॥ उत्तरवेदिपश्चाद्भागस्य वा॥ वर्हिः प्रो
क्षणं। सशो वो मृलावर्हांसेकः॥ प्रोक्षणीनामाहवनीयस्योत्तरतो निधानं॥ वर्हिर्विस्र॰ स्य पुरस्तादानिथ्याप्रस्तरग्रहणं॥ ब्रुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदानं संनहनविस्रंसनं स्त्रीयमाणप्रदिश्यस्यश्रोणौ निधानं॥अग्नेरवखण्डनं॥एकहृद्धर्हिस्तरणं एकधानुएकवारमेवेत्यर्थः।
ततस्तत्तस्य दक्षिणाभागे प्लक्षशाखोपस्तरणं॥ततः समित्स्रुक्स्रुवादानादिष्ठिती यसमिदाधानानंतरं आज्यस्थाल्याः प्रवरणं सकृ
दाज्यं गृहीत्वोत्तवित्सविति॥आहवनीये जुहोति॥इदं विष्णवे॥ततः सूर्यस्त्वेति जपः॥प्रदक्षिणां प्रत्याहृत्य विधृत्योः स्तरणा
यात्मालंभतांतं पशुवत्॥ततः पाणीप्रक्षाल्य यजमानहस्तात्सोममादाय हविर्धानं यजमानं प्रविशति दक्षिणास्य हविर्धान
स्योपस्थे प्राग्रीवमुत्तरत्वोम कृत्स्नाजिनमास्तीर्य यजमानेसोमे कृतान्वारंभे कृष्णाजिनस्योपरि देवस्सवितरिति सोममासा
दयति।ततो यजमानन्वारंभं ऽस्त्रा एतन्नमिति सोममुपतिष्ठते॥ततो यजमानः स्वाहा निर्वरुणस्येति मंत्रेण हविर्धानान्निः
क्रम्याग्नेव्रतपायातवतन्वमिय्यभूत इत्यनेनाहवनीये समिधमाधाय स्वमदंती ह्रपस्पृशंगुलीर्विसृजते॥पत्नी च गार्हपत्ये तू
ष्णीं समिधमाधाय स्वमदंती ह्रपस्पृशंगुली विसर्गं कुरुते॥ततोध्वर्युर्मदंतीभ्यो त्वा लेनिनयति॥ ॥अतदूर्ध्वं यजमानस्य
नामग्रहणं तस्यान्नभोजनं च कर्त्तव्यं नातः प्राक्॥अतदूर्ध्वं यतो व्रतस्याभावः॥ ततः सवनीयपुरोडाशादिशेषस्याशनं यजमानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प नाग्र॥ यजमानो गृह्णहविर्द्धाने ऽपरेण स्कन्दं दक्षिणातिक्रम्यापरोबुस्थाण्डुपविशत्येष संचर इति मानवे॥ ७ ॥अष्ट
मस्य सप्तमी कण्डिका॥ ॥अथाभ्यादानदियूपनिखननं स्वर्वंचगृहनांतं॥ उपाकरणमंथनयोर्वैघ्रपिविकल्पोस्ति
तथापि करणपक्षः श्रेयान्॥ शतपथे ऽकरणपक्षंनिंदित्वा करणविधानात्। अनुदितहोमवत्॥ अतउपाकरणमंथने कृत्वा
द्विगुणरशनया क्रमतस्त्वेति पशुं बध्वा यूपे न पुनश्छिदे वस्त्वेति॥ तत्राग्नीषोमाभ्यां जुष्टं नियुनज्मीति॥ प्रोक्षणे त्वाजु
ष्टं॥ आस्योपग्रहणं॥ अधस्तादुपोक्षणं॥ ततइध्मप्रैषादिवपामार्जनांते विशेषः॥ प्राकृतं वेद्यन्ते सोमे दी।क्षिते दंडस्य ४४
मैत्रावरुणायप्रदानं॥ शेतां तु श्रुक्रूणामित्यस्याभावः॥ नेष्टुः पत्नीमुदानयेति प्रैषः॥ उन्नमप्रयाजं कृत्वा वपायाअभिघारः। त
तो ध्रुवायआज्यस्यालाः। ततः पृषदाज्यस्य। नाज्यभागौ। जुह्वामुपस्तीर्य हिरण्यमवधाय वपामवधायग्नीषोमाभ्यांछा
गस्यैव पायेमेदसोनुब्रूहीत्याह॥ ततो वपां जुह्वामवधायोपरि। हिरण्यमवधायोपरिष्टादभिघारयति॥ ततउत्थायातिक्र
म्याश्राव्याग्नीषोमाभ्यांछागस्य वपां मेदः प्रेष्येति वक्ति। इदमग्नीषोमाभ्यां छागस्य वपां मेदः प्रेष्येति वक्ति॥ इदमग्नीषोमाभ्यां॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वपाश्रयणीपरनुप्रहरणं॥ स्रुचोरासादनं। चात्वाले सर्वेषां मार्जनं॥ ८ ॥अष्टमीकण्डिका॥ ॥ततो वपामार्जनान्ते दण्डक
लशमादाय चात्वालोत्करान्तरेण निष्क्रम्य नद्यादिस्थाः स्यंदमाना अपो गत्वा हविष्मतीरिति मंत्रेण कलशेन ताः स्यंदमाना
अपो गृह्णीयात्॥ अनन्तमिति ते हृद्यें। अत्र मस्य संभावनापां वपायामकृतायामपि अनन्तमिनएव वसतीवरीर्गृह्णाति
तदा च सुब्रह्मण्याह्वानं वपान्तएव भवति। वसतीवरीभिः संबंधाभावात्॥ नेदानीमिति पित्रभूतिः। एतदपि न कृतं सूर्यश्चास्त
मितो यदा तदा वपामार्जनान्तएव स्वकीयास्मणिकातः गृह्णीयात्॥ यदि पूर्वं यजमानः कृतसोमयागो भवति॥ अथ यजमानः
सोमयाजी न चेत् तदा कृतसोमयागस्य सन्निकृष्टवासिनो मणिकात् वसतीवरीर्गृह्णीयात्॥ अथ यदि कृतसोमयागः
सन्निकृष्टवासी न चेत्॥ तदा उल्कुषीं दीपिकां लौकिकाग्नेः प्रज्वाल्य तां गृहणकाले कलशस्योपरि धारयन्स्यंदमानानां व
सतीवरीर्गृह्णीयात्॥ अथवा हिरण्यं कलशस्योपरि धारयन्स्यंदमानानां वसतीवरीर्गृह्णीयात्॥ ततः प्रत्यागत्य चात्वालोत्क
रान्तरेण प्रविश्याग्नीध्रीयमुत्तरेण गत्वा शालायां शालाद्वार्यमपरेणाग्निर्वै इति मंत्रेण सादयति॥ ततउत्करे प्रत्यागत्य सुब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प एषां प्रेष्यति ॥ स्रुवस्रुचामेषु स्रुवस्रुचामाहवनीये तापयेदिति ॥ तत उत्करे स्रुवस्रुचामार्जनं ॥ अपरे त्वाहुः ॥ वपामार्जनान्ते पूर्वं स्रुवस्रुचामार्ज
नं ॥ कुतः ॥ स्रुवस्रुचं च प्रेष्यतीति वचनाद्वपामार्जनान्तरं तस्या अनुकर्षणात् ॥ तत्र कारणं प्रेष्यानान्तु अयं क्रमो वसीयते ॥ वपान्ते स्रुव
स्रुचामिति त्रिरिति ॥ शाखान्तरे सूत्रे च प्रयेव मेवोक्रमस्ति ॥ अतः पूर्वं स्रुवस्रुचेषु स्रुवस्रुचामाहवनीये तापयेदिति उत्करदेशे स्रुवस्रुचा
नं ॥ तदनन्तरं अध्वर्योर्वसतीवरीग्रहणमिति ॥ अयं क्रमोऽप्यत्र दृश्यते ॥ ततः पशुपुरोडाशनिर्वापः ॥ तत्र पूर्वं द्विरासनं ॥ प्रणी
ताप्रणयनं ॥ ततः पात्रासादनं ॥ शूर्पं । कपालान्येकादश कृष्णाजिनं ॥ उलूखलमुसलं पात्रीधान्यं उपवेषः ॥ संयवनोदकं । ४५
शृतावदानं । पुरोडाशपात्री । एतान्यासाद्य पात्रान्तरे प्रोक्षणी हस्तार्पणधूर्पाग्निहोत्रहवणीरादानादि ध्रुवा असदन्नित्यन्तं प्रकृति
वत् ॥ ग्रहणे अग्नीषोमाभ्यां जुष्टमिति प्रकृतिवत् ॥ नात्र कुक्कुटाहननाद्युनिर्वापवेदवंधाः ॥ सर्वालंभान्ते इन्द्रं होतर्मैत्रावरुणा
विति तावाह आज्यभागौ प्रकृतिवद्यजपैषौ कृत्वा जुह्वामुपस्तीर्य पशुनिर्वोपस्तीर्य पुरोडाशस्यावद्यन्नग्नीषोमाभ्यां पुरोडाश॰
स्यानुब्रूहीत्यनुवाचयति ॥ ततोऽर्थमेधार्थहविः प्रत्यभिघार्य उपभृति द्विरवद्य दर्शमवदाय द्विरभिघार्यातिक्रम्याश्राव्याग्नीषो॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माप्म्यां पुरोडाशं प्रेष्यति॥ प्रशास्तारं प्रेष्यति॥ हुत्वा समानीय निर्गुणास्विष्टकृद्यागः। नात्र संवराभ्युक्षणं॥ प्राशित्रादिचतुर्द्धा
करणावदानभागवर्जं मार्जनांतं कार्यं॥ पशुपुरोडाशेडायां मैत्रावरुणस्य भक्षः॥ पश्विडायां मैत्रावरुणस्य प्रतिप्रस्थातुश्च॥ त
तः पशुविशसनादिदक्षिणाग्निहोमांते विशेषः॥ स्तोमादीनामग्रहणं॥ अग्नीषोमाभ्यां छागस्य हविषो नुब्रूहि॥ अग्नी - माप्म्यां छाग
स्य हविः प्रेष्येति प्रधानयागे प्रैषौ॥ यूपाग्न्योरंतराले नेडापुत्याहृत्योत्तरेण हवनीयं हविर्द्धानं च सदसि नयनं॥ गुदतृतीयस्य
चोपयहोमार्थं अनेनैव संचरेण सदसि नयनं॥ जाघन्याश्चानेनैव मार्गेणाग्नीध्रीयमुत्तरेण च पत्नीसंयाजार्थं शाला॰
यां नयनं॥ अध्वर्युः पत्नीसंयाजार्थमाग्नीध्रीयमुत्तरेण गत्वा शालाद्वार्यं पूर्वेण गत्वा तं दक्षिणेनोपविशति॥ शालाद्वा
र्ये पत्नीसंयाजान्द्रष्टांताः॥ ततोस्तमिते दक्षिणाग्निहोमः। वेदविमोकः। पश्चेयोक्त्रसंच। न समिष्टयजुः। एकहद्वर्हिर्होमः
प्रणीताविमोकः। राक्षसभागः। नेदीदंदी। क्षितवसनं परिधाय प्रायश्चित्तस्य स्यायां तं गच्छामीति श्च्छते। पशुपुरोडाशा
गभूतान्यपि समिष्टयजुः पूर्णपात्रादिकर्मापवर्गीतान्यत्र न भवंति॥ ततो युक्तामतेति प्रैषः सर्वान्प्रति। ततः सर्वे देव॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

यजना द्वहिर्भिः संचरंति ॥ पत्नीशालाद्वार्यस्य पश्चात्प्राङ्मुखीउपविशति ॥ यजमानश्चोत्तरवेदेः पश्चादुपविश्योत्संसोमं निदधा
ति ॥ हविर्धानमध्वर्यवम्मेवानीय ॥ ततोध्वर्युर्वसतीवरी कलशं पत्नेनादायप्राजहितमपरेण गत्वा दक्षिणेन शालाद्वारेण
निर्हृत्य मार्जालीयं दक्षिणेन गत्वा दक्षिणस्या मुत्तरवेदिश्रोणौ कलशं निदधाति ॥ इंद्राग्न्योरिति मंत्रेण ॥ ततः कलशमादाय
यथेतं प्रत्यागत्य पत्न्या अग्रेण शालाद्वार्यस्य पश्चात्पुनर्निदधाति ॥ ततः पत्नीतं कलशमालभते । ततोध्वर्युः प्राजहितमपरे
ण गत्वा पुनः कलशमादाय पूर्वद्वारेणाग्नीध्रीयमुत्तरेणाग्नीत्वोत्तरस्या मुत्तरवेदिश्रोणौ कलशं सादयति । इंद्राग्न्योरि ५८
ति मित्रावरुणयोरिति वा । ततः कलशमादाय विश्वेषां देवानामित्याग्नीध्रे सादयत्याग्नीध्रीयस्य पश्चात् । कठसूत्रात् । ततो
यजमानात्सोममादायाग्नीध्रे पूर्वस्याप्पितामासंद्यां निदधाति नसोमेव ॥ दीक्षितो राजा वाग्नीध्रे सोमं निदधाति ॥ ततउत्क
रेस्रुवुल्लप्येस्रुवुल्लण्यामाहयपैतापुत्रीयामिति स्रुवुल्लपणं प्रुष्यति । ततो यथा पाहूतं चत्वारो दोहाउपसृष्टदिवक्षालनं
ताः । क्रमेणास्प्रवर्ग्यस्त्रुप्रुवर्ग्येनु दधिधर्मवर्जिता स्त्रयः ॥ आतन्त्यसमनाद्वे विशेषः । इंद्रस्य सरस्वति वततस्त्वाभागमितिसवनीय

दोहनं त्रयाणां। इंद्रस्य त्वा भागमिति दधिघर्मदोहस्य। ततएकस्यां स्थाल्यां दुग्धमाति आग्नीध्रे यर्थमातंचनीयां ततो दोहनं यत्नेन
कचित्सुगुप्ते निधानं॥ महता प्रयत्नेन रक्षणं कार्यं। ततो मैत्रावरुण पयस्यार्थमत्र वत्सापाकरणं॥ तत्रैवं द्रायमित्रावरुणाव तेना
गमितिगोहृपस्पर्शनमंत्रे विशेषः॥ आपस्तंबसूत्रेतु उत्तरपरिग्रहानंतमेव पयस्यार्थवत्सापाकरणमुक्तं॥ कठसूत्रे चात्रैवोक्तं.
वत्सान पाकृत्याग्नीधु यजमानो वसतीति॥ अत्र शाखाछेदनादि दोहनांतं न वत्सापाकरणं तं सर्वमाग्नीध्रेणाकर्त्तव्यं॥ सवनी
क ५ यानांनिर्वापाद्यलंकरणांतस्याग्नीत्कर्तृत्वविधानात्॥ शाखांतरे पि प्रतिप्रस्थातुः सवनीयनिर्वापे कर्तृत्वमुक्तमस्ति। वत्सा
पाकरणेपि वचनेन तन कर्तृत्वमेवोक्तमस्ति। अत्रमानवे विशेषः। सर्वाः स्रुचः संमृग्यन्नाग्निनक्षंपत्नीसंयाजांतः संतिष्ठते याभुवं
षिकविध्यावर्हिः सन्नत्यतिया यजमानस्य तु तमुक्तामाग्नीध्रे दुहंति॥ या पयस्यास्तां मैत्रावरुण्ये पयस्यायै यां प्रवर्ग्यस्यतां दधि
धर्मायेति। तेन वत्सापाकरणे दधिधर्मार्थं पयस्यार्थं चैकैकस्य वत्सस्यापाकरणं॥ नतु बहूनां वत्सानां॥ यजमानं ब्रूयाच्च
दोहयित्वाग्नीध्रे दधिकर्त्तव्यं। प्रवर्ग्य गवी दधिधर्माय दोह्या॥ पत्नीं तु तदुघा च पयस्यायाइति॥ ततः प्रातर्यूपपरिव्ययणार्थं र

अ०प शनायायूपेपरिवेष्टवासनं॥ततोध्वर्योः राचौशायनार्थगृहदानंमलापकर्षणासमर्थस्नपनं॥ चंदनालंकरणादंतधावन
दानं।ततः शयनं॥ प्रातरुपयोक्ष्माणासकलवस्तूपकल्पनं॥ ॥इतिश्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीपुजाप
तिसुतयाज्ञिकदेवकृतायांकात्यायनसूत्रपद्धतौअष्टमोध्यायःसमाप्तः॥ ८ ॥ ॥नवमिकण्डिका॥शुभमस्तु॥ ॥श्रीविश्वे
श्वरायनमः॥ ॥श्रीकृष्णायनमः॥रामः॥रामः॥ ॥श्रीगणपतयेनमः॥ ॥अथसुत्याहपद्धतिर्लिख्यते॥ तत्रराज्ञेपरभा
गेयजमानपुरुषाः प्रसुप्तान् ऋत्विजः प्रबोधयंति॥सौम्यकर्मप्रारंभार्थंकृत्यापयंतोत्यर्थः॥ ऋत्विजः प्रबुध्यध्वमित्येवंपुनः ४१
पुनरुच्चार्य॥ ततः सर्वेऋत्विजोदंतधावनंकृत्वास्नात्वाधौतवस्त्राणिपरिधायाचम्यतिलकादिकृत्वापवित्रपाणयोब्रह्मादि
क्रमेणशालाद्वार्यसमीपेअपउपस्पर्शंततः स्वस्वकर्माणिप्रवर्तंते॥ तत्रद्विरासनं॥ ब्रह्मयजमानावग्निप्रणीतंदक्षिणेनउप
विशतः॥अथवापूर्वेणोत्तरवेदिमाग्नीध्रीयंचोत्तरेणशालाद्वार्यंपूर्वेणागत्यदक्षिणेनशालाद्वार्यस्यउपविशतः।ब्रह्मणः
समंत्रकआसनसंस्कारः उपवेशनंच। ततोयजमानवाचयत्येतिप्रैषः॥ प्राजहितवर्जंसर्वेषांपरिस्तरणंततः शालाद्वार्यमु०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पविशनः। ब्रह्मणः समंत्रकआसनसंस्कारः उपवेशनंच। ततोयज्ञमानवाचंयच्छेतिप्रैषः। प्राज्ञहितवर्जंसर्वेषांपरिस्तर
णंततः शालाद्वार्यमुत्तरेणपात्रासादनं॥ तस्यपश्चाद्वाअग्निहोत्रहवणी। वज्रः शम्याद्दृषदुपलं। पवित्रछेदनानि। पवित्रे।
स्थाली। आज्यंच। वेदश्च। दक्षिणाहिरण्यम्यः। इध्मचतुष्टयं। स्रुवोजुहूः पृच्छेवसाहोमवन्यौ॥ उपभृद्द्वयं। ध्रुवाचेति। स्फ्यकस
दूकं। प्राशित्रहरणं। पात्नेजनीद्वयं। पृषदाज्यार्थंदधि। हिरण्यशकलानि। उपाकरणतृणं। उखोपर्वकामंथनचतुष्टयंयोक्त्रं॥ यूत
कुशाः कुशास्तंहोतृपीठं। इडापात्रीअंतर्धानकटः॥ षडवत्तंच। एतान्यासाद्य पवित्रकरणादिपात्रप्रोक्षणांतं। अंसंचरेअतिप्र
णीतमुत्तरेणशालाद्वार्यस्यपुरस्ताद्वाप्रोक्षणीनांनिधानं। कुक्कुटग्रहननं। आज्यनिर्वापोवेदवंधः। अग्नीधएवाज्याधिश्रयणं॥
अध्वर्योः पर्यग्निकरणं। उदकालंभः। आग्नीध्रगृहेअग्नौतुवेदिमध्येएवप्रोक्षणीर्धारयन्ति। अध्वर्योः स्फ्यमुद्यम्यप्रोक्षणीप्रैषः।
उत्करेस्फ्योदकप्रहारः। नपाण्योः प्रक्षालनं। अग्नीध्रेएवप्रोक्षणीसादनं॥ अंतः पात्रएवस्फ्यसादननिधायबर्हिर्वेश्च। अग्नीधः
पश्चुवत्सात्र्वसंमार्गः। संमार्जनानांयत्नेनरक्षणं॥ पत्नीसन्नहनं। आज्योद्वासनं॥ पत्न्याअवेक्षणं॥ ततः स्रुगाज्यदृषदाज्यस्थाल्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प याद्यायाग्नौ ध्रुवमध्ये आज्यमुत्पूयप्रोक्षणीश्चोत्पूयाज्यमवेक्ष्यतानाज्ये कृत्वा पृषदाज्यसंयोजनं॥ पशुवदाज्यग्रहणं॥ आत्मानं
धारणं॥ ततआज्यस्थाल्यादायाग्नीध्रीयात्सोमं ग्रावादीनि च पूर्वदिननिहितान्याहवनीयसमीपे आज्यसोमवर्जितानां निधा
नं॥ ततइध्मप्रोक्षणाद्यात्मालंभनांतमग्नीषोमीयवत्॥ एकहृदेवस्तरणं॥ इहविस्तविनिहोमाभावः॥ ॥इतिविशेषः॥
आत्मालंभोदकालंभांते पाणिप्रक्षालनं॥ सोममादाय सयजमानो हविर्धानं प्रविश्य सोमपोटलकं विस्रंस्याधिषवणचर्म
णि ग्राव्णः संमुखान्निधाय दक्षिणस्य हविर्धानस्येषांतरेणाईसोमं कुंडलिकासहितं यजमानेसोमान्वारब्धे ग्रा-- कुपरि सोमो ५८
पनहनेनैवप्रक्षिपति। हृदे त्वेति मंत्रेण ततो यजमानो विसृज्य विश्वास्त्वाभितिसोममुपतिष्ठते॥ ततो यजमानस्यशाला
द्वार्यपविष्टस्य लोकद्वारीयसामगानं॥ उदङ्मुखोपविष्टस्य॥ ततएहिहोतः प्रातरनुवाकायेति प्रैषः॥ हविर्धानपूर्वद्वारम
ध्येपृष्ठ्यायाउत्तरतोहोतृषदनस्थापनं॥ पूर्वसांद्वार्युपविशतीति शांखायनसूत्रात्॥ ततोहोतर्युपविष्टे आहवनीयेसमिदाधानं
कुर्वन्देवेभ्यः प्रातर्यावभ्योनुब्रूहीत्याह। देवेभ्योनुब्रूहीत्येके। ततउत्तरेगत्वा सुब्रह्मण्ये सुब्रह्मण्यामाह्वयेतापत्नीयामिति सुब्रह्म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णां प्रेष्यति॥ततः स्रुक्स्रुवाणां ग्रहणं॥अध्वर्युर्जागरणं कुर्वन्नातरनुवाकं शृणोति॥समीपे उपविष्टः स्वप्यादा॥अग्नीधः सवनीयनि
र्वापः॥ चतुरासनं वृस्तोपविष्ट एव। प्रणीताप्रणायनं। परिस्तरणाभावः। शालाद्वार्यस्य पश्चादुत्तरतो वा पात्रासादनं भूर्ये। कपाल्या
नेकादश। कर्परं। कृष्णाजिनं॥ उलूखलमुशलं॥ प्राचीधान्यं। शाखोपवेषः संयवनोदकं। दोहनचतुष्टया संयवनार्थं दधिच॥ भृ
तावदानं। वाजिनपात्रं। पंचविलापात्री। दोहनचतुष्टयं। ततः स्फ्योपहितपात्रीकरणं॥ पात्रांतरे प्रोक्षणी हृत्वा स्वार्यभूर्याग्निहोत्रहव
णीराधानादि। ग्रहणे इंद्राय जुष्टं गृह्णामि॥ एकादशकपालार्थं व्रीहीणां यवानां वा ग्रहणं॥ इंद्राय हरिवते जुष्टं धानार्थं यवानां॥
इंद्राय पूषण्वते जुष्टं। करंभार्थं यवाग्रहणं। ततः शेषामर्शनादि। पात्रांतरे प्रोक्षणीः शुचिः कृत्वा हविषां प्रोक्षणं॥ इंद्राय त्वा जुष्टं।
इंद्राय हरिवते त्वा जुष्टं॥ इंद्राय पूषण्वते त्वा जुष्टं। नानावीजधर्मानुक्ताः। ततः कृष्णाजिनादानादिकणनिधानांतं॥ तत्र विशेषः॥ तन्द
कुकण्डहननं। एकवीजपक्षे कणानां तेविभज्यालंभः॥ इदमिंद्रस्य। इदमिंद्रस्य हरिवतः॥ इदमिंद्रस्य पूषण्वतश्च॥ ततः कृष्णाजिनादा
नादि पेषणं॥ उपवेषादानादि शालाद्वार्यएव कपालोपधानं। भर्जनोपधाने च प्रथमकपालधर्मेण। तत्राभ्यूहनाभावः। ग्रोहणांते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प उपस्तरणादिपरिक्षालनांतः पत्नीवृतदुग्धायाः स्थाल्यादोहः तन्निरीक्षणादि पुरोडाशविधेश्रयणांतं ॥ ततोपवाज्ञां कर्मरोधेश्रयणं
घर्मास्यविश्वायुरिति ॥ उभयोः पर्यग्निकरणं । श्रपणं । तत्रे पयसि दधि प्रक्षेपः ॥ पुरोडाशस्य माभेरिस्मा लंभः । माभेषमा संवि
ग्नक्थं मिति धानानां । ततो धानाउदाय्य विभज्या लंभः । इदमिंद्रस्य हरिवतः । इदमिंद्रस्य पूषण्वत इति ॥ ततः पूषण्वद्भागस्य धान्यम
सति दृषद्ग्रावापादि पेषणं ग्रोहणांतं ॥ पिष्टानामीक्षणं धानानां च ॥ ततः सवित्रा यापि षट्संवापः । अग्नीध उपसर्जनीरानीयस
पवित्रहस्तस्तो परि मंत्रां तेनिनयति । संदध्यो षधीभिः समोषधयो रसेन ॥ स ॰ रेवतीर्जगतीभिः पच्यंताऽ संमधुमतन्मधुम ४८
तीभिः पच्यंतामिति दध्नु पसर्जनी प्रतिग्रहणं । ततः संयवनं । पुरोडाशाकारस्य करंभस्य करणं । अन्नवद्भचित्स्थापनं पाद्यं गुलिषु
भालनं । पुरोडाशस्यातमेहृरित्स्वभिवासनं । अभितप्यपाअंगुलि दुक्षालनस्य तितयनं स्थापितेः संमार्जनैः भ्रताव दानवाजितपा
त्रं पंचविला पात्रीणां संमार्गः ॥ संमार्जनानां पुनर्यत्नेन रक्षणं । नद्यासनं । अतदुर्ध्वं कर्म पुरोडाशं । अलंकुर्विति प्रेषानंतरं भविष्यति
तावत्कालमग्नीध्र यत्नेन रक्षणं करोति कारयति वा ॥ १ ॥ नवमस्य प्रथमा कण्डिका ॥ ॥ उन्नेतुः पात्रयोजनं तत्र चरवरस्येशानदि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भागे ऽपांश्वंतर्यामपात्रयोरासादनं करोति ॥ तयोर्मध्ये ऽपांशुग्रहपात्रं दक्षिणतः ॥ ततउत्तरतोंतर्यामस्य ॥ ततऽपांशुपात्र
स्य पश्चात्पुत्मकतं स्थानित्रीणि द्विदेवत्यपात्राण्यासादयति ॥ तेषां त्रयाणां मध्ये ऐंद्रवायवपात्रं रासुवं ॥ मैत्रवलापुक्तं पुश्च
मं ॥ द्वितीयं मैत्रावरुणपात्रमज्ञकावं ॥ अज्ञागलक्षनाकारकाष्ठावयवयुक्तं । पश्चात् । ततस्तृतीयमाश्विनपात्रमोष्ठं ॥
– ष्ठाकारकाष्ठावयवयुक्तं ॥ ततः पुत्मक ॥ ततः स्वरस्याग्नेयकोणे दक्षिणतः शुक्रपात्रमासादयति ॥ ततउत्तरतो मंथिपा
त्रं । ततः खरस्य मध्ये आग्रयणस्थालीमासादयति ॥ तस्या आग्रयणस्थाल्या दक्षिणतऽक्थ्यस्थाली ॥ तस्याः पुरस्तात्ऽ
क्थ्यपात्रं । आग्रयणस्थाल्या उत्तरत आदित्यस्थाली ॥ तस्याः पुरस्तात्आदित्यपात्रं । तथा च काठके दक्षिणाश्रोण्यामुक्
थ्यस्थालीं पूर्वमुक्थ्यपात्रमुत्तरस्यां श्रोण्यामादित्यस्थालीं पूर्वमादित्यपात्रमिति ॥ ततआग्रयणस्थाल्याः पुरस्तात्का – र्ष
मयेआश्वत्थमये वा स्रुक पुष्करदाकारे ऊभयतोमुखे मूलाग्रज्ञापक चिन्हयुक्ते ऽनुपात्रे आसादयति ॥ स्थालीव्यतिरिक्ता
नि सर्वाणि पात्राणि प्रादेशमात्राण्यानि मध्यसंगृहीतानि वैकंकतानि भवंति ॥ ततआग्रयणस्थाल्याः पश्चात्स्रुक पुष्करा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प कारांवारणांपरिप्लवांसंभरणीतोस्यांनिदधाति॥ एतानिपात्राणिखरेसादयित्वाद्रोणकलशंदक्षिणहविर्धानाक्षस्याधोमार्गे
णासमीपेनैवप्रागग्रंसंततंप्रस्तंचंपुर्यंभूमौनिधायाक्षस्योपरिष्टात्समीपेनैवान्यतरतोदशामरत्निमात्रंश्वेतवर्णांजीवोर्णांति
र्णितंपवित्रंहृत्वाद्रोणकलशस्योपरिनिदधाति॥ ततएवंविधमेवोभयतोदशांद्वितीयंपवित्रंपरिप्लवायांनिदधाति॥ तत
उत्तरस्यहविर्धानस्योपस्तंभनंपूर्वेणध्रुवस्थालीमनंतर्हितदेशेवर्हिःस्तृणान्यपोह्यसादयतिततस्तस्यैवानसोधुरिईषा
ग्रयोरुपरिप्रागग्रामुदगग्रांवाप्रुचरणींपालाशींस्रुवंसादयति॥ ततउत्तरस्यैवानसोक्षस्यपुरस्तादनसउपर्येवभृत्तंत्रं ५०
मन्मयंमहाकलशंविपुलमुखमासादयति॥ ततोक्षात्प्राक्शाकटस्याधस्ताद्भूमौमृल्लाभितापकविकृयुक्तान्दशवैकंकतां
श्चमसान्होत्रादिचमसक्रमेणप्रागग्रोदक्संस्थांनिदधाति। तेषांचलक्षणंपरिशिष्टे। विकंकतमयाःश्लक्ष्णास्त्वग्बिला
श्चमसाःस्मृताःचतुरंगुलखाताश्चतेषांदंडेप्रलक्षणं। होतुर्मंडलएवस्याद्वृत्तंणश्चतुरस्रकः॥ उद्गातृणांच -- स्याघ्राज
मानःपृथःस्मृतः॥ प्रशास्तुरवनतःस्याद्मध्येत्वृत्तशांसिनः॥ पोतुरग्रेविशालोत्साननेष्टुःसाद्विग्ररोहितकः॥ अच्छावाकस्यरा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्ना वभागेती धुस्त्वमयूपयस्तिनिगमेव ॥ नैयग्रोधाश्चमसाश्चातुरस्राः प्रस्थोदगग्रात्वग्बिला दंडलक्षणा इति । मानवेच ॥ दश
चमसान् नैयग्रोधान् रोहितकान्वेति । काटकेच । नैयग्रोधाश्चमसा रौहीतकावा सर्वाणिवा पर्णमयानीति ॥ ततउत्तरहविर्धा
नाक्षस्य पश्चाद्भूमौ शकटस्याधस्तादेकधन संज्ञकानुदकुंभान् त्रिःप्रभृति पंचदशपर्यन्तान् अयुग्मानुदकसंख्यान् निदधाति त
त्र हरित्वा मितो व्यवस्यामाह ॥ अग्निष्टोमेत्रय एकधनाः पंचवा ॥ अत्यग्निष्टोमेपि तावंत एवमुक्थ्ये पंचवा सप्तवा । षोडशि
न्यां सप्तवा नववा । वाजपेयेनववा एकादशवा ॥ अतिरात्रे एकादशवा त्रयोदशवा ॥ अप्तोर्यामेत्रयोदशवा पंचदशवेति ॥ यद्येवंन
कल्प्यते तर्हिः सर्वेविकल्पाः प्रक्रमावेव भवेयुः ॥ तथासत्ययुक्तोदक वृद्धिराप्यते ॥ तस्मादयथोक्तेवव्यवस्था युक्ता ॥ एतन्यात्र
योजनं सवनीयनिर्वपणं च प्रातरनुवाकोपाकरणानंतरं साहेत भवतीति ॥ ॥ द्वितीया कंडिका ॥ ततः प्रातरनुवाकसमाप्ति
वेलायामध्वर्युः श्रुत्यभूरित्यस्मिन्मंत्रे होत्रा प्रयुज्यमानेध्वर्युः प्रचरण्यां चतुर्गृहीतमाज्यं गृहीत्वा समिधमाधाय श्रृणोत्वग्निरि
त्याहवनीये जुहोति ॥ इदमग्न्य हविर्धानग्रावदेवसवितन्प्यः । ततः प्रचरण्यामेव पुनश्चतुर्गृहीतं गृहीत्वोदङ् गच्छन्नप ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

ष्यहोतरितिहोतारं प्रेष्यति ॥ ततउदङ्गच्छन्नेव मैत्रावरुणस्य चमसाध्वर्यवो होतृमैत्रावरुणसंबंधिचमसाध्वर्युं प्रेष्यति ॥ ने
ष्टापत्नीहृदानयेतिनेष्टारं । एकधनिन एतेन्तु दकुंभग्राहकान् ऋत्विज एव प्रेष्यति ॥ अग्नीध्रात्वालेवसतीवरीभिः प्रत्युपति
ष्ठासे होतृचमसेन चैत्यानीधं प्रेष्यति ॥ ततः सर्वे यथोपदिष्टं प्रैषार्थान् कुर्वंति । अग्नीध्रात्वालेवसतीवरीरानीय होतृचमसं
वानीयसमीपे तिष्ठति ॥ ततः सर्वे यथोपदिष्टं प्रैषाश्चात्वालोत्करावंतरेणैते सर्वे उदंचो निष्क्रम्य यस्यां दिश्युदकं भवति ॥
तडागादि स्थितं तस्यां गच्छंति ॥ ऋत्विग्यजमानौ पत्नी च ॥ उदकं प्राप्य अप्सु परिस्तीर्य समीपे उपविश्य देवीरापो अपां नपा ५१
दित्यध्वर्युर्गृहीतं जुहोति ॥ इदमध्वः । ततो मैत्रावरुणचमसेन रुद्रमाज्यं हृदे प्रेरयति कार्षिरसीति मंत्रेण ॥ ततः समुद्रस्य
त्वाक्षित्या इति मैत्रावरुणचमसेनापो गृह्णाति ॥ ततएकधनिन एकधनैरनेनैव मंत्रेणापो गृह्णंति ॥ पत्नी च हौ हौ पा
त्रेजनौत्कलीं प्रारयति ॥ अनेकपत्नीके प्रतिपत्नी हौ हौ पात्रे जनौ भवतः । एकैकतुर्वालेकार्थः ॥ अपरयप्रशोधनार्थः ॥ ततः स
वे देवयजनं प्रत्यागच्छंति ॥ होतः पठ इति ब्रुवंतः ॥ ॥ अत्र मानवे विशेषः ॥ यत्रहोतुः प्रातरनुवाकमुपब्रुवत उपशृण्याः

न्नदपो ध्वर्युर्वहंती तां गृह्णीयाद्यदि दूरे स्युश्चात्वालांते गृह्णीयादिति॥ ततः सर्वेषु चात्वालसमीपमागतेषु अध्वर्युश्चात्वालस्यो
परि मैत्रावरुणचमसं वसतीश्च परस्परं संस्पर्शयति॥ समापो अद्भिरिति॥ केचित्पूर्वं मैत्रावरुणचमसवसतीवरीष्वतिनयंति॥
ततो मैत्रावरुणचमसे वसतीवरीर्निनयंति॥ उभयत्र समापइति मंत्रः॥ ततोध्वर्युर्होतृचमसे वसतीवरीर्निनीय यजमानाय
समर्पयति॥ तासामपां निग्राभ्या इति संज्ञा॥ ततउत्थायाहवनीयं प्रतिगच्छति॥ ततो होताध्वर्युं पृच्छति॥ अध्वर्यो वेरपा इति॥
अध्वर्युरुतेवनंनमुरितिप्रत्याह॥ ततः प्रचरणीसंस्रवमग्निष्टोमसंख्येकृत्वा आहवनीये समित्पूर्वकं जुहोति॥ संस्रवाभावे आ
ज्यस्थाल्याः स्रुवेण गृहीत्वा जुहोति। यमग्नेपृत्स्विति इदमग्नये ततो हविर्धानद्वार्युपविष्टं होतारं दक्षिणेनातिक्रम्य मैत्रावरुणचं
मसमाधवनीये वनयति॥ अग्निः प्रातःसवन इति॥ ततो वसतीवरीणां तृतीयं भागमनेनैव मंत्रेणाधवनीये आसिंचति॥ एक
धनानामपि तृतीयं तृतीयं भागं ग्रहणक्रमेणाधवनीये आसिंचति॥ अनेनैव मंत्रेण॥ तत एकधनस्थाने वसतीवरिशेषमेकधन
शेषं च निदधाति॥ ॥तृतीया कण्डिका॥ ॥तत्राधिषवणचर्मण उत्तरतोध्वर्युयजमानौ उपविशतः॥ तयोर्मध्ये पूर्वोध्वर्यु

अ॰प रपरोयजमानः। ब्रह्मादक्षिणतआस्ते ॥ प्रतिप्रस्थातानेष्टुन्नेतारश्चापरेण दक्षिणं हविर्धानं परीत्य दक्षिणतः प्रत्यक्संस्थाउप॰
विशंति ॥ उदङ्मुखाः अपरेण हविर्धानमुन्नेतारउपविष्टोभवति ॥ तत्रप्रतिप्रस्थाता गछन्प्रतिहर्त्तारमंतरेणोद्गातृप्रस्तोतृमध्यां
वहिर्गछति ॥ इतरेचसर्वेषां पश्चाद्गछतः एवं सर्वे पर्युपविशंति ॥ तत्र पूर्वं अभिषवार्थवस्त्रनामीषांतरेणाहरणं ॥ हिरण्य
मनामिकायांवधनार्थमध्वर्युर्दापयन्त्वाग्नेपीषांतरेणाहरंति ॥ ॐ ॥ ततः संभरणी ॥ ततोदशापवित्रमुभयतोदशमिति ॥ ततोध्व
र्योः पाणिप्रक्षालनं। अनामिकायां हिरण्यबंधनं। अध्वर्योरेवप्रदानं ॥ वेदस्यत्वेत्यनेनपयस्वंतमिमं तेन। ततः प्राग्धिंकारादध्वर्यो ५२
र्वाग्यमनं। तस्मात्तस्माद्रूपंभूसवनइतिसंज्ञा॥ ततोयजमानोहोतृचमसं हृदयसंलग्नं धारयित्वा निग्राभ्यासुहस्तंनिदधाति॥अ
ध्वर्युर्निग्राभ्यासुहूतान्वारंभंयजमानं। निग्राभ्यास्थेतिवाचयति ॥ ततउपांशुसवनेध्वर्युः पंचकृत्वः सोमंमिमीते। इंद्रायत्वा वसुमते
रुद्रवंतेमिमइतिप्रथमंततोमनुष्येभ्यउपांशुसवनस्योपरिप्रक्षिपति ॥ इंद्रायत्वादित्यवतइतिद्वितीयं ॥ अभिमातिघ्नइतितृतीयं ॥
श्येनायत्वेतिचतुर्थं। अग्नयेत्वेतिपंचमं। ततोमितंसोमंयत्तेसोमदिवीत्यालभते॥ ततोध्वर्युरभिमृष्टान्सोमान्मुष्टिमावसे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंशुक्षुद्रकाभिषवार्थं पृथक्कृत्वा पात्रांतरे स्थापयति॥ ततः षडंशून्स्तुतिप्रस्थानुरंगुलं तरेकरणार्थं पृथक्करोति॥ ततएकं महांशुं कुडु
लिकात्वमापादितं ततीय सवनार्थं पृथक्कृत्य क्वचिन्निदधाति॥ ततो निग्राभ्याः क्षुद्रकाभिषवार्थं होतृचमसात्पात्रांतरे कृत्वा क्वचिन्नि
दधाति॥ उपांशुसवनं क्षुद्रकाभिषवार्थं पृथक्करोति॥ ॥तत्र प्रथमं महाभिषवस्य प्रारंभः॥ ॥तत्राध्वर्युणा पाणिप्रक्षालन हिरण्य
बंधने कृते॥ अत इतरेषां स्तुतिप्रस्थानां नेष्टुनेतॄणां पाणिप्रक्षालनं हिरण्यबंधनं॥ अध्वर्य्यादीनां सर्वेषामनुज्ञादानं॥ देवस्यत्वेत्यनेनाप
यस्तं तमित्यनेन॥ ततोध्वर्युः श्वात्रास्थेतिसोमस्योपरि निग्राभ्या आसिंचति॥ ततो निग्राभ्याभिरार्द्रीकृतं सोमं चतुर्धा विभज्य सर्वेभिषु
ण्वंति॥ अभिषवं करिष्यंतो वैरिणां मनसा चिंतयेयुः॥ अमुष्मै अमुकायाहं प्रहरामि न तुभ्यं सोमेत्यचं॥ यदि द्वेष्यः कश्चिन्न भवति तदा
तृणं मनसा चिंतयेयुः॥ तृणायाहं प्रहरामि न तुभ्यं सोमेत्येवं॥ मामेर्मासंविति मंत्रेण सर्वे धिषवणफलकाधारचर्मस्थसोमस्योपरि
ग्रावाणः प्रहरंति। तत्रैवं माभेर्मा सं। व॰ पाप्मानहतो न सोम इति मंत्रमुक्त्वा तृणायाहं प्रहरामि न तुभ्य॰ सोमेत्येवं मनसा चिंतयित्वा स
र्वे प्रहरणं कुर्वंति पुनस्तूष्णीमेव यावद्भिः प्रहारैः रसप्रस्नुतिर्भवति॥ तावत्प्रहरणं॥ ततइत्थलक्षणमेकपर्यायमभिषुत्य विरम्येत्त स्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तःपतितसाममेकत्रकृत्वापुंजंकुर्वंति॥ततस्तूष्णीमेवोपरिमितसंख्यंप्रहरंति॥पुनर्विरम्यपुंजीकृत्यपुनरभिषुण्वंति॥एवंविरम्यविरम्यपर्या
यत्रयात्मकेअभिषवेकृतेसर्वंसोममाप्याययंति॥अ६·ष्कर६·भुच्छइति॥ततोध्वर्युर्होतृचमसेतःप्रभृत्यल्पान्तंभूतंवधायप्रागपा(
कृपुवीमेनैवचरतिसप्रैषंयजमानंवाचयति॥संभरण्याभिषुतंसोमंगृहीत्वाधवनीयमध्येप्रक्षिप्यतदुदकेनसहघर्षयित्वा॥
ततआदायसंभरण्यैवाहृत्याधिषवणेप्रक्षिपति॥एवमेकोभिषवस्त्रिपर्यायःसमाप्तः॥ ॥एवमेवोद्वितीयोभिषवोनिग्राभ्यासेचनेः
ग्राध्रूपाहरणांतः॥एवमेवतृतीयोपिनिग्राभ्यासेचनाग्राध्रूपाहरणांतोभिषवःकार्यः॥तृतीयेयंविशेषः॥प्रागपगितिवाचनानंतरंग्रा
वाणांहोतृचमसस्योपरिनिधामचतुर्थंप्रागपागितिपुनर्वाचयति॥ततःस्ररसानंद्रूसंभरण्याधवनीयेवधायाध्रूपाहरणांतंकरोति॥एवंत्र
योभिषवास्त्रिपर्यायाःसमाप्ताः॥ ॥अयंमहाभिषवःउक्तः॥ ॥अथक्षुल्लकाभिषवउच्यते॥तत्रैकोध्वर्युरेवाभिषुणोति॥नसर्वे·तत्र(
पूर्वंक्षुल्लकाभिषवार्थंपात्रांतरेस्थापितंसोममधिषवणेप्रक्षिपति॥निग्राभ्याथ्रूपात्रांतराद्दोतृचमसेवनयति॥ततःप्रतिप्रस्था
त्रर्ध्यमवशेषितान्यंशून्मुतिप्रस्थातागृहीत्वासव्यहस्तांगुल्यंतरेषुद्वौद्वौअसंश्लिष्टौकरोति॥दक्षिणहस्तेनोपांशुपात्रंगृहीत्वाआस्ते॥त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थाव॥ काठके॥ सोमस्य षडंशून्स्तव्येपाणावतिष्ठतिद्वेद्वावसंश्लिष्टाविति॥ ततोध्वर्युः श्वात्रास्थेतिमंत्रेणनिग्राभ्याः सोमस्योपरिसिं
चति॥ ततः पूर्वमंत्रेणकुर्पांशुसवनसंज्ञकंग्रावाणामादायमाभेरित्तिप्रहरति॥ पूर्ववत्तृणाभिध्यानं॥ अत्राष्टकृत्वः प्रहरति॥ सकृन्मं
त्रः सप्तकृत्वस्तूष्णीं ततोभिषुतान्सोमान्त्रीनंशून्होतृचमसेवधायप्रागपाणितियजमानवाचयति॥ ततस्तेषामंशूनामधिषवणे
प्रतिप्रस्थेपः॥ ततः प्रतिप्रस्थातादक्षिणहस्तधृतपात्रगर्त्तस्योपरिसव्यहस्तांगुल्यंतरालेधृतान्षडंशून्धारयति॥ प्रतिग्रहणंचद्
योर्द्वयोरेवांतर्द्धानं। तद्ग्रहणं सहैव ततोध्वर्युरुभयतोदशेनपवित्रेणाधिषवणात्पांसोममादायप्रतिप्रस्थातृदक्षिणहस्तधृतग्रहपा
त्रमुपं ख्वस्योपरितेनैवसव्यहस्तांगुल्यंतरालेषुधृतानांषडंशूनांकुपरिद्वाभ्यांहस्ताभ्यांपवित्रंनिष्पीड्यषडंशुगलितंसोमंग्रहपात्र
मध्येपातयति॥ उपयामगृहीतोसिवाचस्पतयेपवस्वेतिमंत्रेण। प्रतिप्रस्थातानुत्तथैवतिष्ठति॥ अध्वर्युः पुनः श्वात्रास्थेतिनिग्रा
भ्यांआविच्यमाभेरितिप्रहरति॥ एकादशकृत्वोभिषुणोति॥ सकृन्मंत्रेणदशकृत्वस्तूष्णीं॥ ततः पूर्ववदेवप्रागपाणितिवाचनं॥ पू
र्ववदेवग्रहणं॥ ॥तत्रमंत्रः॥ उपयामगृहीतोसिदेवोदेवेभ्यस्पवति॥ ततः पुनर्मंत्रेणनिग्राभ्याआसिच्यद्वादशकृत्वोभिषुणोति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ॰प तत्र सकृन्मार्ष्टीति मंत्रेण ॥ एकादशकृत्वस्तूष्णीं ततः पूर्ववन्मार्गपावाचनं ॥ पूर्ववदग्निं चमसेव धायचतुर्थवाचनं ॥ ततो ग्रहणं त
थैव ॥ तत्र मंत्रे विशेषः ॥ उपयामगृहीतोसि मधुमतीर्न इति ॥ ततो गृहीतान्वडंशून्सोमे प्रति प्रस्थानैव निदधाति ॥ अत्रापस्तंबेवि
शेषः ॥ पवित्रमुपयामः सादनं च न विद्यत इति ॥ अंजलिना ग्रहणस्य मूलं भाष्ये विलोक्य ॥ ततो ग्रहणो गृहीतो भयतो दशेन प
वित्रेण परिमार्जनं । सादनभावः ॥ अभिचरन्नुहस्तेनाविस्रजन्मा दये दमुष्य त्वा प्राणां सादयामि इति मंत्रेण ॥ अमुष्येति पदस्था
ने ऽभिचर्यमाणस्य वैरिणो नामग्रहणं । उदकालंभश्च ॥ ततोभिचरन्नेव हस्तेन ग्रहमपिदधाति अमुष्य त्वा प्राणमपिदधाति ॥ अत्रा ५४
पि शत्रुनामग्रहः पूर्ववत् ॥ ततः स्वाहेत्युन्मार्य उर्वन्तरिक्षमन्वेमीति मंत्रेण हविर्धानान्निःक्रामति ॥ यजमानो होतृचमसमस्य ह
स्ते पर्यवधीत्वाध्वर्युमन्वारभते ॥ ततो यजमानः पुत्रोसेत्यु धनं मे स्तु गोर्मे स्तु इत्येवं यथा स्वाभिलषितं तन्मुख्यार्थयित्वाध्वर्यवे वरं द॰
दाति ॥ अध्वर्योर्यदिष्टं यजमानेन च यातुं शक्यते न तद्दातोस्यर्थः । क्षिप्रेण इमं ग्रहं जुहवानितो दमेव यजमानस्य वरप्रार्थनं न
प्रागुक्तप्रकारेणेति केचित् । इदं मेष्या दित्ये वं ब्रुवीतीति पितृभूतिः ॥ तत्रयुक्ततरमिवाभाति ॥ ततो यजमानात् वारव्यं एवाध्वर्युर्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जेतिस्थानं गत्वा दक्षिणपरिधिसंधिसमीपेऽन्नजुहूर्ध्वं तिष्ठन्नग्नेर्दक्षिणभागे स्रुक्स्रुवं गृह्य जुहोति। स्वाहाकृतो होतीति। इदं सूर्याय। काष्ठ
के। दक्षिणपरिक्रम्य दक्षिणार्द्धे ग्नेर्ध्वं तु तिष्ठन् जुहोतीति॥ मानवे च दक्षिणेन होतुर्गच्छन्नन्तरेणाभिप्रपद्य गृह्य दक्षिणं परिधिसंधिं
प्रस्रवस्यायं जुहोतीति॥ गृह्य कृत्वा पात्रमुन्मार्ष्टि॥ ततः प्रथमे॥ परिधौ नुन्नानं पाणिं प्रागुपमार्ष्टि॥ उन्मार्जनेन सोमलिप्तपाणिं परिधेर
धस्तात्प्रवेश्य पश्चादाकर्षति॥ तथा सति स्रुक्स्रुवस्य प्रागुक्तसंमार्जनवद्धस्तस्य प्राक्संस्थमुपमार्जनं संपद्यते॥ अभिवरस्वा सदु
रोवाकुषुभ्निषुं सोमं भुदेवांशाविति मंत्रेणाजुहुयात्॥ ततआग्रयणस्थालस्थां पांशुग्रहशेषस्यैकदेशानिनयनं॥ ततस्तृतीय
सवनार्थमवशेषितं सोमांशुं कुंडलिकामुपांशुपात्रे प्रास्यति तृतीयसवनार्थं॥ ततः प्राणाय त्वेति मंत्रेण पांशुपात्रस्य स्थाने
सादनं॥ ततउपांशुसवनं हस्तेन मार्जयित्वा पांशुपात्रस्योत्तरतस्तत्पद्धमेवोदङ्मुखमासादयति व्यानाय त्वेति मंत्रेण॥ त
तः संध्यावंदनाद्यावश्यकं सर्वे कुर्वंति॥ सूर्योदयं च प्रतीक्षंते॥ पत्नीयजमानयोर्मूत्रपुरीषादिकरणं॥ ॥चतुर्थी कंडि
का॥ ॥ततउन्नातारो द्रोणकलशं प्रोह्यादेधोक्षं प्रांचमधिषवणस्योपरि प्रेर्या धिषवणस्योपरि चतुरो ग्रावाणः संमुखान्नि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धायते यामुपर्युजी घमवस्थायोपरि द्रोणकलशं निदधाति ॥ अन्यतरतो दशं पवित्रं चो दग्दशं वा द्रोणकलशस्योपरि वितार्य
धायंति ॥ ततः पवित्रस्योपरि मध्ये हिरण्यं निधानं ॥ यद्युन्नातारः एतत्कुर्वंति ॥ तदा द्रोणकलश प्रोहणं विस्वयमेवाध्वर्युः कु
र्यात् ॥ ततऽन्नेताआधवनीयात्दुदंचनेनतो ममादाय पवित्रस्योपरि यजमानध्ः तच्च मसस्थाम्नुन्निग्राभ्या स्वासिंचति ॥ ततोय
जमानस्ताः निग्राभ्यः पवित्रे संततमासिंचति ॥ तस्याः संततधारया ध्रुव पर्यंता ग्रहा ग्राह्याः ॥ ॥ पंचमी कंडिका ॥ ॥
तत्र प्रथममुदितेसूर्ये अंतर्यामग्रहं गृह्णाति ॥ उपयामगृहीतो स्यंतर्यच्छमघवन्निति ॥ प्रागुक्तायाः संततधारया गृहीत्वा ९५
धारतः पृथक्कृत्वास व्य हस्ते कृत्वा दक्षिणहस्तस्थ नेनो भयतो दपवित्रेण परिमार्जनं ॥ नासादनं ॥ अति चरतऽपां भृग्रहवत्स
दनापिधाने ॥ मंत्रमात्रे विशेषः ॥ अमुष्यत्वोदानं सादयामीति ॥ अमुष्य त्वोदानमपिं दधामीति च ॥ यजमानो होतृच्चमसमन्वा
प्रदायाध्वर्युमन्वारभते ॥ उत्तरेण होतुः स्वयं गत्वा ग्रहं होतारं दक्षिणेन नीत्वोत्तर परिधिसंधि समीपे जुहूर्ध्वस्तिष्ठन्नग्नेरुत्तर
भागे जुहोति । स्वाकृतो सीति । इदं सूर्याय ॥ निःशेषहोमः । कृत्वा ग्रहपात्रमवाचं मुखादारभ्याधो वमार्ष्टि ॥ ततः प्रथमे परिधौ न्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ङ्गं हस्तं पुष्पगुपमार्ष्टि ॥ हस्तस्य प्रक्षालनेनोपमार्जनं पुष्पकलंस्पृष्टं संपद्यते ॥ ततः पुष्पागत्योदानाय त्वेति रवेरेत्वस्थाने उपांशुसव
न संस्कृष्टमंत्रयामपाडंसादयति ॥ कठसूत्रे तुल्य पुपांशुना सादनापुत्रराद्वेंहोम इति ॥ मानवेच ॥ उत्तरेणाहोतुर्गद्धति दक्षिणो
नाभि पुष्पस्य गृहमन्तरं परिधिं पुरस्तु स्तिष्ठन्निति ॥ ततो ध्रुवपुष्पं भूपात्रस्य पश्चादासादितं हैं ड्वाय वं पात्रमादाय वायो भूबे
ति मंत्रेणैं ड्वाय वं गृह्णाति ॥ सन्नत धारा या एवं ॥ वायवे त्वेति मंत्रांते स्वस्य गृहीत्वा पात्रं धारात्तो विछिद्य पुनर्मंत्रांते गृह्णाति ॥
इं ड्वायु इति मंत्रेण इं ड्वायुभ्यां त्वेत्यंतेन ॥ सर्वत्र धारया अधः पात्रं तथा धारणीयं ॥ यथा मंत्रांते सोमग्रहणं संपद्यते ॥ एवं
वारद्वयं गृहीत्वा परिमृज्य स्वस्थाने सादयति ॥ एष ते योनिः सजोषोभ्यां त्वेति मंत्रेण ॥ ततो मैत्रावरुणपात्रमादाय अयं वांमित्रा
वरुणेति मंत्रांते मैत्रावरुणं ग्रहं गृह्णाति ॥ गृहीत्वा पात्रस्योपरि कुशौ निधाय रायावयमिति मंत्रेण पयसा श्रीणाति ॥ ग्रहमध्ये यथो
वनयतीत्यर्थः ॥ ततः परिमार्जनम् ॥ तत एष ते योनिर्ऋतायुभ्यां त्वेति सादनं स्वस्थाने ॥ ततः शुक्रपात्रमादाय तं प्रत्नथेति शुक्रं ग
ह्णाति । परिमार्जनं । नात्रोदकोपस्पर्शनं ॥ एष ते योनिर्वीरतां पाहीति स्वस्थाने सादनं ॥ शुक्रपात्रं वैल्वं वैकंकतं वा भवति ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

अयं वेन इति वा भक्षग्रहणे मंत्रः॥ ततो मंथिनः पात्रमादाय वेन इति मंत्रेण मंथिनं गृह्णाति॥ ततः कुशावंतर्हीयमनोनयेष्विति सक्तुभिः
श्रीणाति॥ ततः परिमार्जनं॥ एष ते योनिः प्रजाः पाहीति भक्षस्योत्तरतः सादयति॥ तत आग्रयणस्थालीमादाय तस्यां द्वाभ्यां धारा
भ्यां ये देवास इति मंत्रेण आग्रयणं गृह्णाति॥ एकां धारां यजमानो होतृचमसादासिंचति। द्वितीयामुन्नेता आधवनीयादुदंचनेन॥ ए
वं धाराद्वयमिति याः संततिकाः कर्कभ्रू॥ आग्रयणस्थाल्यां पङ्क्तौ भक्षो यः प्रक्षिप्तः॥ तं पात्रांतरे कृत्वा पुनस्तत्स्थाल्यां अभिसिंचति॥ सा ए
कधारा द्वितीया तु संतधारैवेत्येवं कृत्वा मे वचस्त्वचो रत्नि॥ तेनायं पक्षः। तम्फलः। आग्रयणान्तरं स्थालीमुखं पवित्रेण सर्वतो वेष्ट ५६
यित्वा तस्य समीपे धारयित्वा हिं हिं हिं इति त्रिरुच्चार्य सोमः पवत इति वषट्कारशेषमस्मै ब्रह्मण इत्यादिकं सकृद्ब्रूयात्॥ अयं मं
त्रो विश्वेभ्यस्त्वा देवेभ्य इति देवतादेशात् प्रथमस्थानेनोच्चारणीयः देवतादेशनप्रभृत्युपांश्वेव॥ प्रथमस्थानं चोपांशूच्चार
णापेक्षया किंचिदुच्चैः॥ ततोध्वर्योर्वाग्विसर्गः॥ आग्रयणस्थाल्याः परिमार्जनं। एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्यासादनं खरेम
ध्ये॥ प्रातःसवने यान्युच्चैः कर्माणि प्रैषादीनि तानि सर्वाण्यपि प्रथमस्वरेणोच्चार्याणि॥ माध्यंदिनसवने यान्युच्चैर्याणि च नीचैस्ता

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निसर्वाणिमध्यमस्वरेण। तृतीयसवने चयानितानिसर्वाण्युत्तमस्वरेण। ततउत्थायस्थालीमादायोपयामगृहीतोसांद्रायत्वे
ति। उकथ्यं गृह्णाति। परिमार्जनं। एषतेयोनिरुक्थेभ्यस्त्वेत्यासादनं। ततो ध्रुवस्थालीमादायापरेणोन्नातुन्नहृत्वा मूर्द्धानं
दिव इतिमंत्रेण ध्रुवं गृह्णाति। ततः परिमार्जनं॥ ततस्तथैव प्रतिपर्याहृत्य तस्य स्थानेसादयति॥ एषतेयोनिर्वैश्वानराय
त्वेति। ध्रुवस्याग्निमारुतशस्त्रांते होतृचमसेनिनयनं कृत्वा होमः क्रियते॥ तावत्पर्यंतं यजमानो मूत्रपुरीषेन कुर्यात्॥
इत्थमाहैश्वानरग्रहस्यग्रहणादिविधिंज्ञात्वैश्वानरं गृह्णाति॥ स्थालीग्रहानाग्रयणादीन्पूर्णान्गृह्णीयात्॥ ततः संपा
तसोमेनद्रोणकलशमर्द्धपूर्णं कृत्वा यजमानो होतृचमसस्थं सर्वं सोमं द्रोणकलशे आसिंचति॥ ततोध्वर्युः पाणिप्रक्षा
लनं॥ ततो हविर्द्धानमध्य एव निःक्रमणयोर्त्विजमध्वर्युं प्रतिप्रस्थातान्वारभते॥ प्रतिप्रस्थातारं प्रस्तोता। प्रस्तोतारमुद्गाता॥
उद्गातारं प्रतिहर्ता। प्रतिहर्तारं यजमानः। ब्रह्मा च विकल्पेन प्रतिहर्तारमन्वारभते॥ एवं समन्वारब्धा अध्वर्य्वादयो हविर्द्धाना
न्निःक्रामति॥ ततः प्रचरण्यांमाज्यस्थाल्याः सकृदाज्यं गृहीत्वा समित्पूर्वकं यस्तेद्रप्स इति मंत्रेण सर्वे उक्तक्रमेण जुह्वति॥ यज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मानोपि जुहोति इदं सोमाय॥ अथवा अध्वर्युरेवैको जुहोति नान्ये॥ अथवा होतानंतरमेव सर्वेषामन्वारंभः न पूर्वं॥ अन्वारंभपक्षे वि
हुत्वापि जुहोति॥ ततोध्वर्युर्द्वे वेदितृणे आदत्ते॥ तत आहीताहवो दङ्मुखा — त्वालं प्रतिसर्पंति॥ ततो गृहीतयोस्तृणयोर्मध्ये एकं तृणं
देवानामिति चात्वाले प्रक्षिपति॥ तत उद्गातारश्चात्वालस्य दक्षिणतो वेदिमध्ये यथास्थानमुपविशंति॥ तत उद्गाता तृणं पुरस्ता
द्वितीयं तृणं तूष्णीं प्रक्षिपति॥ तत उद्गातारः पुरस्ताज्जपादिकं कुर्वंति॥ ततो द्वे दर्भतृणे प्रस्तोत्रे समर्पयन् स्तोमः पवत इति मं
त्रेणोपवमानोपाकरणं करोति॥ ॥षष्ठी कंडिका॥ ॥आकुशमुष्टिं प्रयच्छन्॥ तूष्णीं वैनेव वा पवमानोपाकरणं करोति॥ ५७
सर्वेषु पवमानेष्वेते त्रयो विकल्पा इति पितृभूतिः। सवितारेष्वप्येवमेवास्ति। हुत्वापि दक्षिणेन उपविशति॥ प्रस्तोत्रा वुल
तृस्तोषाभिः प्रशास्तारित्युक्ते ब्रह्मा एतं ते देव सवितरिति नेनमामवेत्यंतं पठित्वा स्तुत सवितुः प्रसव इति॥ एवं सर्वे स्तोत्रेषु ज्ञा
तृन्स्तोत्रार्थमनुजानाति सर्वत्र। देव सवितरेतद्बृहस्पते प्रस्तनेन मंत्रेण वा रश्मिनाम सत्यायेत्यादिभिः प्रतिमंत्रं वा क्रमेण प्रसौति॥
अध्वर्युः पवमानसमाप्तिं यावदुद्गातृणां पुरस्तात्प्रत्यङ्मुख उपविशति तस्य दक्षिणतः प्रतिप्रस्थाता प्रत्यङ्मुख एव॥ तयोर्दक्षिण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तो यजमानोपि तथैवोपविशन्ति॥ तत उद्गातारः स्तुवंति॥ तत्र प्रथमप्रस्तावसमये यजमानः शतपथस्त्वेरणास्ततो मासन्नमयतम
सोमाज्योतिर्गमय मृत्योर्मामृतं गमयेत्येतानि त्रीणि यजूंषि सकृज्जपतीति शांकराभाष्ये॥ ॥उन्नेता चमसयमाने पूतभृत उपरि प
वित्रमंतर्द्धायाधवनीयस्थ सोमम् उदंचनेन गृहीत्वा गृहीत्वा आसिंचति॥ पवमानसमाप्तिं यावत्॥ स्तोत्रांते अध्वर्युरुत्तिष्ठन्प्रेष्यति॥
अग्नीदग्नीन्विहर बर्हिः स्तृणीहि पुरोडाशाँ अलंकुर्वित्यग्नीध्रं॥ प्रतिप्रस्थातः पशुनेहीति प्रतिप्रस्थातारं। ततोग्नीदाग्नीध्रीयाग्रे
रंगारमादाय होतृधिष्ण्यादिषु सप्तसु धिष्ण्येषु निर्वापक्रमेणानूहृतीनि वपति॥ ततोंतःपात्यादारभ्य पश्चायाउपर्युत्तरवेदिपर्यंतं प्र
कसंस्थं बर्हिस्तृणीं स्तरणानि। ततः शालायां गत्वा पुरोडाशादिभस्मीकरणं करोति॥ वाजिनपात्रस्थापनं॥ पंचविलपात्राभ्वे॥
वाजिनपात्रेउपस्तारः॥ पंचविलायांमध्ये पुरस्ताद्दक्षिणतश्चात्रिषु स्थानेषूपस्तारः॥ तत्रस्थाभिघारमदत्वा वाजिननिषेकः॥ त
तः पुरोडाशादीनामभिघारः। उद्वासनं। पुरोडाशस्य पंचविलामध्ये स्थापनं पुरस्ताद्धानानां दक्षिणतः करंभस्य। पश्चाद्दध्नः। उत्तरतः प
यस्यायाः। वाजिनस्योत्तरतो भूमौ दधिपयसयोर्हरणास्थयोरेवासादनमिति कर्कः॥ एकपात्रमात्राप्येति वचनान्मानवेप्रत्यक्षवच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प

नाज्ञुपाभ्यां निम्नौ गतौ कारयित्वा तयोर्निनीयासादनमित्यपरे॥ ततः कपालानि संख्योपधाणादानं॥ इंद्र गच्छ पुरोडाशे इंद्र हविर्वं तं गच्छेति धा-
नामु। इंद्र पूषण्वं तं गच्छेति करंभे॥ इंद्र सरस्वतिवं तं गच्छेति दधनि॥ इंद्र मित्रावरुणं वं तं गच्छेति पयस्यायां॥ वाजिनो गच्छेति॥ ततः क-
पालान्यङ्का कर्परं वा त्कोभयमुद्वासयति॥ प्रतिप्रस्थाता वत्सवतीयं पशुमानीयोत्तरवेदिसमीपे तिष्ठति॥ अध्वर्युः पुनर्हविर्धानं प्रवि-
श्याश्विनं पात्रमादाय द्रोणकलशात्स्त नद्ततो वा यजमाने विकल्पेनात्वा रथ्येयावा कश्यामिति मंत्रेण परिप्लवयासो ममादयाश्विनं
ग्रहं गृह्णाति॥ परिमार्जनं॥ एष ते योनिर्माध्वीभ्यां त्वेति सादनं स्वस्थाने॥ ततोध्वर्युर्यजमानस्योपांश्वादीन् ग्रहान् दर्शयन् अवकाशसंज्ञ- ५८
कान् मंत्रान् वाचयति॥ तत्रैवं प्रयोगः अध्वर्युः प्राणाय मे वर्चोदा वर्चसे पवस्वेति॥ ब्रुवन् उपांशुमीक्षस्वेति यजमानं ब्रूयात्॥ ततो यजमान
उपांशुग्रहं विलोकयन् प्राणाय मे इति स्वरेण पठति मंत्रं॥ एवं वक्ष्यमाणे प्रसर्वेषु तेषा॥ ततो व्यानाय मे त्वेति ब्रुवन् उपांशुसवनमीक्षस्वेत्यु-
पांशुसवनं दर्शयति॥ तत उदानाय मे। त्वेति ब्रुवन्नंतर्याममीक्षस्वेत्यंतर्यामं ततो वाचे मे इति ब्रुवन् ऐंद्रवायवमीक्षस्वेत्यैंद्रवायवं। क्रतूद-
क्षाभ्यां मे इति ब्रुवन्मैत्रावरुणमीक्षस्वेति मैत्रावरुणं॥ ततः श्रोत्राय मे इति ब्रुवन्नाश्विनमीक्षस्वेत्याश्विनं॥ ततः चक्षुर्भ्यां मे वर्चोदसौ वितिब्रुव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्शुकामंथितावीक्षस्वेत्याग्युपर्णं ॥ तत – ज्ज्ञेमे । बस्त्वेति ब्रुवन् नुक्ष्यमीक्षस्वेत्युत्यं ॥ ततआयुषेमेत्स्वेति ब्रुवन्ध्रुवमीक्षस्वेध्रुवं ॥
ततोविश्वाभ्योमे० सौ० यवेथामितिब्रुवन्पूतभृदाधवनीयावीक्षस्वेतिपूतभृदाधवनीयौयुगपद्दर्शयति ॥ ततः कौसिकतमोमेनानी
त्यपामेतिब्रुवन्द्रोणकलशमीक्षस्वेति द्रोणकलशं ॥ ततोयजमानोभूर्भुवः स्वरितिजपति । एतद्ग्रहाणां दर्शनं वाचनं ज्ञानस्य वंशपरंप
रया भुक्ततयाह्वानस्य ॥ तथाप्रियस्याध्वर्योरतिवत्सभस्य । तथाअनुवाचनस्यअध्ययनेनस्वयं ग्रहज्ञानवत्त्वएवकारयितव्यं ॥
नसर्वस्य ॥ सप्तमीकंडिका ॥ ततोवस्त्रादिना ध्रुवस्यगोपनं इतिकर्कः ॥ राजपुत्रो ध्रुवं गोपायतीतिमाधवे । तंभ्रमदङ्मुखो रक्षेदितिकठसूत्रे
तंवैगोपायंतीतिशतपथे । तेन ध्रुवगोपं कृत्वा ध्रुवस्यरक्षकंस्थापयित्वेत्ययमर्थोनुक्तः ॥ ततः पाणिप्रक्षालनं । यूपसमीपेगत्वापरिव्य
यणादिकरोतितत्राग्नीषोमीयदिने यथारशनयायूपस्यपरिव्ययणं श्रुतमस्तितां रशनामुद्गृह्ययूपमध्यादूर्ध्वां कृत्वातत्साःस्थाने
पुनः परिव्ययणं कर्तव्यं ॥ परिवीयमाणायेतिप्रैषः ॥ यथोक्तंपरिव्ययणं स्वरुवगूहनं ॥ पशोरुपाकरणं शकलादानादिहोमांतं अ
ग्निमंथनं ॥ उपाकरणमंथनयोरनियमः ॥ ततोद्विगुणरशनयापशुबंधनं ॥ अग्नयेजुष्टंनिप्रनज्मीत्यालंभः ॥ अग्नयेत्वाजुष्टंनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प तिब्रह्मानुज्ञातस्यप्रोक्षणं ॥ आस्तोपग्रहणं ॥ अधस्तादुपोक्षणं प्रोक्षणीनांपत्नेस्थापनं । ततः सदसिहोतृधिष्ण्यस्यपश्चाद्धोतृषदनस्थापनं ।
एहिहोतरित्यादिहोतृवरणं तंयथभुवत् ॥ होतृवरणानंतरं पुनराश्राव्यपुनर्होतारंप्रवृणीते ॥ इंद्रं होचात् । ततोऽग्निनाध्वर्युआध्वर्यवा
दित्यध्वर्युप्रतिप्रस्थात्रोर्वरणंस्वयमेवाध्वर्युणा कर्त्तव्यं ॥ मानवेध्वर्यवे कोः स्वयमेववरणदर्शनात् । ततः पुनराश्राव्यमित्रावरुणोप्र
शास्तारैप्रशास्त्रादित्यनेनैकस्यमैत्रावरुणस्यैववरणं ॥ ननुद्विवचनदर्शनाद्द्वितीयोच्छावाकः ॥ ॥ तथाचमनुः ॥ मित्रावरुणौ
प्रशास्तारावितिप्रशास्तारं ॥ ॥ एवं काठकेपि ॥ ततः पुनराश्राव्यइंद्रोब्रह्माब्राह्मणादितिब्राह्मणाच्छंसिनोवरणं ॥ पुनराश्राव्यमरुतः ५९
पोत्रादितिपोतुर्वरणं ॥ पुनराश्राव्यग्नावोनेष्ट्रादितिनेष्टुर्वरणं ॥ पुनराश्राव्यग्निराग्नीध्रादित्याग्नीध्रस्यवरणं ॥ पुनराश्राव्याग्निर्देवीनांविशांपु
रएतोयंसुचन्यजमानोमनुष्याणांतयोरित्यादिनायजमानस्यवरणं ॥ ततोहोताअध्वर्युराग्नीध्रयोः संमर्शनंकरोति ॥ संमृष्टाउपविश
तः ॥ ततोवरणक्रमेणहोत्रादयः प्रत्येकंप्रहृतहोमौजुहुति ॥ आहवनीये ॥ तत्रपूर्वंहोताजुहोति ॥ ततोध्वर्युः समिधमाधायाज्यस्यात्याः
सकृदाज्यंगृहीत्वाप्रचरणाजुहोत्येव ॥ ॥ इतिजुहोति ॥ इदंवावेदावस्यतयेसरस्वत्यै ॥ ततः पुनः सकृदाज्यंगृहीत्वापावकानइतिद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तीयामाहुतिं जुहोति ॥ इदं सरस्वत्यै ॥ ततः प्रतिप्रस्थाताप्येवमेव द्वे आहुती जुहोति ॥ ततो मैत्रावरुणः ततो ब्राह्मणाच्छंसी ततः पोता
ततो नेष्टा ॥ अध्वर्युवत् ॥ ततोग्नीदध्वर्युवदेव जुहोति ॥ ततो यजमानोप्यध्वर्युवत् ॥ ततः स्रुगादापनादि वपामार्जनं तमग्नी(
षोमीयवत् ॥ अत्र मानवे विशेषः ॥ आग्नीध्रेस्य संमार्गपाणिराग्नीध्रः पश्चादासंदीमारभ्योर्द्ध्वलिप्तन्नसुश्रौषडिति प्रत्याश्रावय
तीति ॥ नवपायामाज्यभागौ । अग्नये छागस्य वपायै मेदस इत्यनुवाचनं हविरभिघारः । अग्नये छागस्य वपां मेदः प्रस्थितं प्रेष्येति प्रे
षः ॥ ॥ इदमग्नये ॥ वपाश्रपण्योः प्रासनं ॥ स्रुचोः सादनं ॥ चात्वाले मार्जनं ॥ वपामार्जनांते सर्वे ऋत्विजो नित्यभोजनं कुर्युः ॥ ॥
तथा च काठके ॥ मार्जयित्वा भुंजते यथदीक्षिता भवंति एतस्यां वेलायां प्राश्नीयुरिति छंदोगसूत्राच्च ॥ ततः सर्वेषां ऋत्विजां यजमानस
हितानां सर्पणं ॥ पूर्वं धिष्ण्यानामुपस्थानं ॥ विभूरसीत्यग्नीध्रीयस्य । वह्निरसीति होतुः । श्वात्रोसीति मैत्रावरुणस्य । तुथोसीति ब्राह्म
णाच्छंसिनः । उशिगसीति पोतुः । अंघारिरसीति नेष्टुः । अवस्युरसीत्यच्छावाकस्य । शुंध्युरसीति मार्जालीयस्य । संम्राडसीत्याहवनीयस्याति प्र
णीतस्य । परिषद्य इति वहिष्पवमानदेशस्य चात्वालस्य । मन्द्रोसीति शामित्रस्य ॥ ऋतधामेत्यौदुंबर्याः । समुद्रोसीति ब्रह्मासनस्य ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प अग्नोसीति शालाद्वार्यस्य । अहिरसीति प्राजहितस्य ॥ सम्राडसि विश्ववेदा इत्युत्करस्य ॥ एवमेतत्क्रमेणोपस्थाय सयजमाना ऋत्वि
जो वागसीति सदोभिमृशंति ॥ ततः कृतस्या द्वारावित्ति प्राग्द्वारस्थूणे अभिमृशंति ॥ ततोध्वनामध्वपत इति सर्वे सूर्यमभिमंत्रयंते ॥
मित्रस्य मेत्यत्विजामभिमंत्रणं । यजमान एव करोतीति कर्कः ॥ सर्वेपीति पितृभूतिः । ततो नमः सदस इति सर्वान् आग्नीध्रादीन्
धिष्ण्यान् अभिमंत्रयंते ॥ ॥अष्टमी कंडिका॥ ॥ततः सवनीयपुरोडाशप्रचारः ॥तत्राग्नीत्सवनीयानुत्तरवेदिसमीपे आन
यति ॥ आसदनमप्याग्नीध्र एव करोतीति हरिस्वामिनः ॥ तस्याप्यलंकरणत्वादित्यभिप्रायः । अध्वर्युरित्यन्वाप्रियेधामभिः ९ ६०
प्रिय८· सद आसीदन्ते स्यूहितेन मंत्रेण यंत्रापि हवी८·ष्येकपात्र्या मासादयति ॥ ततो वाजिनमुत्करोपुरस्येकमालंभो वाजिनस्य च ॥
नाद्वात्मालंभः प्राकृतत्वात् ॥ ततः स्रुचा वा दायय यजप्रैषा वाज्यभागौ । अत्रमानवे अवदायानुवाचनमुक्तं ॥ कठसूत्रे च । पुरोडाशा
दीनां पयस्यांतानां अवद्यन्नुत्रातः प्रातः सवस्येंद्राय पुरोडाशानामनुब्रूहीत्यवदीयमानानामिति लौगाक्षिरपि । संप्रदायपद्धतौ
वावदानुवाचनं ततोवदानमिति ॥ अतो यथा तत्त्वमनुष्ठानं ॥ ततो नुरूपभंतोरूपतारः पुरोडाशेनादीनां पंचानां पूर्वमध्यादवदानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निगृह्णन्प्रातः प्रातःसवस्येंद्राय पुरोडाशानामनुब्रूहीत्यनुवाचयति॥ ततः पुरोडाशादीनां पंचानां मध्यात्पूर्वार्द्धाच्चावदानानि
सहैवावद्यति॥ सकृदभिघारः।क्षताम्र्पंगः उपभृति स्विष्टकृदवदानं द्विरभिघारः॥ अवदायावा अनुवाचनं। अवदीयमानेषु
व। अनयोः पक्षयोरेकैकस्य हविषो मध्यात्पूर्वार्द्धाद्यावदायततो द्वितीयस्यैवं॥ ततस्तृतीयस्येत्यादि॥ ततउत्थायातिक्रम्याश्राव्य
प्रातः प्रातःसवस्येंद्राय पुरोडाशान्प्रस्थितान्प्रेष्येति प्रैषः॥ इदमिंद्राय हरिंवते पूषणवते सरस्वतिवते मित्रावरुणवते वेतित्या
गः॥ इदमिंद्रायेत्येतावानेव वा। ततउपभृतः समानीयाग्नयेनुब्रूहि अग्नये प्रेष्येति। निर्गुणः प्रेष्यप्रैषः स्विष्टकृद्यागः॥ इद
मग्नय इति त्यागः॥ उदकालंभः। नसंचराभ्युक्षणं। स्रुचोः सादनं। प्राशित्रावदानं। ब्रह्मणोसमर्पणं। अपउपस्पृश्येडायाअवदानं॥
द्विरवदानं। पुरोडाशादीनां त्रयाणां षडवत्तावदानं॥ तेषामेव ब्रह्मयजमानभागौ। चतुर्द्धाकरणाभावः। इडापात्र्यां पृथक्एकं
पुरोडाशखंडमच्छावाकाय समर्पणार्थं निधानं॥ पुरोडाशपयस्याधानानामल्पमल्पं खंडं द्विदेवत्यपृक्षेपार्थं तत्रैवनिदधाति।
ततइडापात्रीमादायोत्थाय हविर्द्धानमुत्तरेण तद्दक्षिणं गत्वा होतृधिष्ण्यस्योपरिनिधायसत्वरमागच्छति॥ ॥ततः पाणिप्रक्षालनं॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प यदा सदसऽस्थायोत्तरवेदिं प्रति गम्यते ततो वसदः प्रत्यागम्यते तदा हविर्धानं दक्षिणेन सदो संचरः ॥ यदा च सदसऽस्थाय ग्र
हग्रहणार्थं हव हविर्धानं गम्यते ॥ गृहीत्वोपाकरणार्थं सदस्यागम्यते तदा हविर्धानापरद्वारेणैव प्रवेशनं निष्क्रमणं च ।
अत्रवेडां होतृ धिष्ण्ये निधायोत्तरेण हविर्धानं गत्वा पूर्वद्वारेण हविर्धानं प्रविश्यैन्द्रवायवग्रहमादाय वायव इन्द्रवायुभ्यामनुब्रू
हीति मैत्रावरुणं प्रेष्यति ॥ ततउत्थाय जतिदेशं गत्वाश्राव्य वायव इन्द्रवायुभ्यां प्रेष्येति मैत्रावरुणं प्रेष्यति ॥ अत्रैन्द्रवायव
स्य द्वौ वषट्कारौ ॥ तत्र प्रथमवषट्कारे स्वल्पं जुहोति ॥ इन्द्रवायवे ॥ द्वितीयवषट्कारेपि स्वल्पं जुहोति ॥ इदमिन्द्रवायुभ्या ६१
अत्र प्रतिप्रस्थातानुवाचनकार्यं ल -- दित्यपात्रेण द्रोणकलशादुपयामगृहीतोसीत्येतावता मंत्रेण परिप्लवया सोमं गृही
त्वा अनासादयेवतिक्रम्योत्तरपरिधिसंधिसमीपे तिष्ठन्नेवाग्रेतनार्द्धं द्विदेवत्यानन्तु जुहोति ॥ अत्र द्वितीयवषट्कारमनु जुहो
ति स्विष्टकृते चैतानु होतीति ध्रुवेनेरत्र इदं स्विष्टकृत इति त्याग इति हरिस्वामिनः ॥ शाखान्तरे तु द्विदेवत्यपात्रेभ्यः एव प्रतिप्र
स्थातुरादित्यपात्रे ग्रहणं वषट्कारद्वयेपि प्रतिप्रस्थातुर्होम इति तदा प्रतिप्रस्थातुः कर्तव्यानुहोमानामपि द्विदेवत्ये

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यताम्प्येवमागामयंति॥ ॥मानवे विशेषः॥ स्रुवोपचमनं वायव्यं चादाय वाचंयमः स्थित्वा यजेतिवचनादग्नीध्रे स्थस्य संमार्गपाणि
राग्नीध्रः पश्चाद्दासंदीमालभ्योर्ध्वस्तिष्ठन् स्रुग्भ्यो वषडिति प्रस्थाश्रावयति प्रत्याश्रुते दक्षिणां परिधिसंधिं प्रत्यवस्थाय ऽजुहोत्यध्व
र्युरुत्तरं प्रतिप्रस्थाता नाभ्यग्नेरग्न्यारुतीः पुरोऽग्रारुतीः पश्चाग्नेरप्याभितः सोममारुतिरिति॥ प्रतिप्रस्थाता द्वितीयं वषट्
कारमनु ऋत्वा एवं स्वल्पं कृत्वा हविर्धानमध्ये प्रविश्यादित्यस्थाल्यां वकुलं स्वयमाहिंचत्यादित्येभ्यस्त्वेति॥ अध्वर्युर्ग्रहं कृत्वा त्व
रमाणोऽन्तरेण हविर्धाने गत्वा होत्रे ग्रहं समर्थ हविर्धानमुत्तरेण प्रत्यागत्य पूर्वद्वारेण प्रविश्य मैत्रावरुणग्रहमादाय मित्राव
रुणाभ्यामनुब्रूहीति प्रेष्यति॥ ततः स्थायातिक्रम्याश्राव्य मित्रावरुणाभ्यां प्रेष्येत्याह॥ प्रतिप्रस्थाता च पूर्ववत् गृहीत्वा तथैवा
र्धं कृत्वा शेषमादित्यस्थाल्यामासिंचति इदं मित्रावरुणाभ्यामितिग्रहस्य त्यागः॥ अनुहोमश्च पूर्ववत्॥ ततोऽध्वर्युस्त्वरमाणो
मैत्रावरुणं होत्रे समर्प्य गत्वाश्विनमादायाश्विभ्यामनुब्रूहीत्युक्त्वातिक्रम्याश्राव्य। अश्विभ्यां प्रेष्येत्युक्त्वा वषट्कृते जुहोति॥
इदमश्विभ्यामिति॥ अनुहोमश्च पूर्ववत् प्रतिप्रस्थाता कर्तव्यः द्विदेवत्यानामनुवषट्कारो भावः॥ तदुक्तं॥ शुक्रग्रहादि द्विदेवत्या·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प य श्चपात्नीवतो ग्रहः॥ आदित्यस्य ग्रहस्याविद्यान इति नानुवषट्कृता इति॥ सर्वेषां होष रक्षणं॥ अथ प्रतिप्रस्थाता होमानंतरं प्रविश्य शेषमा
दित्यस्थाल्यामासिच्यते नैवादित्यपात्रेणादित्यस्थालीमपि दधद्यातिविछन्ऽरणायेति मंत्रेण अध्वर्युर्होत्रे आश्विनं समर्प्य तु
नीयमानेभ्योनुब्रूहीति मैत्रावरुणं प्रेष्यति॥ ततउन्नेताच्छावाकचमसवर्जितान्नवचमसान्होतृब्रह्मोद्गातृयजमानप्रशा
स्तृब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीत्संबंधिनः क्रमेणोपरेणोत्तरवेदिं निधाय द्रोणकलशात्परिप्लवया सोममादाय तेन सोमेन परि
प्लवयैव सर्वेषु चमसेषूपस्तृणाति। ततः पूतभृत उदंचनेन सोममादाय सर्वांश्चमसानासरयति॥ पुनर्द्रोणकलशसोमेनो
परिसर्वेष्वभिघारयति। एवमेकैकश्चमसस्त्रिरवन्नः संपद्यते॥ प्रथमं होतृचमसे॥ ततो ब्राह्मणः ततउद्गातुः। ततो यजमान
स्य। ततः प्रशास्तुः। ततो ब्राह्मणाच्छंसिनः। ततः पोतुः। ततो नेष्टुः। ततो ग्नीधः। एकं त्रिरवन्नं कृत्वा द्वितीयस्यावसानं। ततस्तृतीय
स्यैतस्यैवं क्रमेण पदार्थानुसमयेनवकर्त्तव्यं त्रिरवन्नकरणमेकः पदार्थ इति॥ ॥नवमी कंडिका॥ ॥ततोध्वर्युप्रतिप्र
स्थातारौ सहैव शुक्रामंथिभ्यां चरतः॥ तत्र शुक्रेणाध्वर्युः प्रचरति। मंथिना प्रतिप्रस्थाता। तत्र प्रथमं द्वयोर्द्यपशकलयो हृद ६२

केनप्रोक्षणं कर्त्तव्यं ॥ यौपस्य शकलावप्रोक्षितावेवमवतः ॥ ततोध्वर्युरेकं प्रोक्षितं यूपशकलमादत्ते । द्वितीयमप्रोक्षितं च । प्रति
प्रस्थातापरेकं प्रोक्षितं शकलं गृह्णाति । द्वितीयमप्रोक्षितं च । ततोध्वर्युः शुक्रग्रहमादत्ते मंथिनं प्रतिप्रस्थातादत्ते ॥ उभावपि
प्रोक्षितशकलाभ्यां यथास्वं ग्रहयोरपिधानं कुरुतः ॥ अध्वर्युः प्रोक्षितेन शुक्रमंतर्यामवदपमार्ष्टि ॥ प्रतिप्रस्थाताप्यप्रोक्षितेन मंथि
नं अपमृष्टो मर्क इति ॥ अपमृष्टः शंड इत्यध्वर्युः ॥ उभयोरुदकस्पर्शः ॥ अपमृष्टः शंडोपमृष्टो मर्क आभिचारिके इत्युक्तत्वात् ॥ त
तो देवास्त्वा शुक्रपा इत्यध्वर्युर्हविर्धानान्निष्क्रामति ॥ देवास्त्वा मंथिपा इति प्रतिप्रस्थातानिष्क्रामति ॥ ततउत्तरवेदेः पश्चादावपि
दाक्षिणावरत्नी संधत्तः परस्परं संयोजयतः ॥ तूष्णीं । तथा यत्नः कार्यो यथा ग्रहयोः स्कंदनं भवति ॥ ततोध्वर्युरुत्तरवेदेर्दक्षि
णश्रोण्यां शुक्रं हस्तेनाविसृजन्नासादयति ॥ अनाधृष्टासीति ॥ प्रतिप्रस्थातोत्तरवेदिश्रोण्यां मंथिनमासादयति ॥ विमुंचन् अनाधृष्टा
सीति ततोध्वर्युः सुवीरो वीरानिति मंत्रेण दक्षिणं यूपदेशं गच्छति ॥ प्रतिप्रस्थाता सुप्रजाः प्रजा इत्युत्तरं यूपदेशं गच्छति ॥ ततो यूपम
परेण पूर्ववन्मंत्रेण रत्नी संयोजयतः ॥ संजग्मानौ० शुक्रः शुक्रशोचिषेत्यध्वर्युः । संजग्मानौ० मंथी मंथिशोचिषेति प्रतिप्रस्थाता ॥ यद्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गितापमयादपरेण यूपमरत्न्योः संधानं कर्तुं न शक्नुवन्तस्तदा यूपस्य पुरस्तादेवारत्नीसंधत्तः ॥ ततोऽध्वर्युर्निरस्तः शंड इत्यप्रोक्षितं यूपशकलं निरस्यति ·
अ॰प निरस्तो मर्कऽइतीतरेतेनिरस्यति ॥ उभयोहृदकालेभः ॥ ततः प्रोक्षितं यूपशकलमाहवनीयेऽध्वर्युः प्रक्षिपति शुस्याधिष्ठानमसीति ॥ प्रति
प्रस्थाता च मंथिनोधिष्ठानमसीति प्रोक्षितमाहवनीये प्रक्षिपति ॥ ततो यजमानः पुवाछिन्नस्येति जपति ॥ अत्रन व चमसाध्वर्य
वषट्कैकं चमसमादाय होमार्थं प्राङ्मुखस्तिष्ठंति ॥ मनुः प्रांचश्चमसैश्चरंतीति ॥ ॥ काठकेच ॥ अनुप्रछंति चमसानाध्वाहे ६३
ति ॥ ततोऽध्वर्युरभ्याश्राव्य प्रातःप्रातःसावस्य शुक्रवतो मधुश्चुतइन्द्राय सोमान्प्रस्थितान्प्रेष्येति मैत्रावरुणं प्रेष्यति ॥ १० ॥ दशमीकंडि
का ॥ यूपमभितः प्रत्यङ्मुखौ तिष्ठंतो जुहुतः । यूपस्य दक्षिणतोऽध्वर्युः ॥ उत्तरतः प्रतिप्रस्थाता । न त्रहोता वषट्कारे कृते सा प्रथमे
ति प्रथममध्वर्युः शुक्रं जुहोति स्वाहाकारेण । ततोऽनेनैव मंत्रेण प्रतिप्रस्थाताध्वर्युहोमानंतरं मंथिनं जुहोति ॥ प्रतिप्रस्थातृहो
मानंतरं चमसाध्वर्यवोऽपि स्वल्पं स्वल्पं जुह्वति ॥ इदमिंद्रायेति ॥ यजमानस्याध्वर्युहोमकाल एव सर्वेषां सहैव त्यागः ॥ अनुव
षट्कारेऽप्येवमेव सर्वे जुह्वति ॥ अत्र मानवकठसूत्रयोर्विशेषः । होतृब्रह्मोद्गातृयजमानचमसानां वषट्कारानुवषट्कार

योर्होमः। इतरेषां तु सकृदेव वषट्कारे होम इति॥ अनुवषट्कारे सर्वत्रोन्नरार्द्ध एव होमः। इदमग्नय इति त्यागश्च॥ उदकस्पर्शः॥ त
तोऽध्वर्युस्तत्रैव स्थितश्चमसाध्वर्यून् प्रेष्यति॥ प्रैतु होतुश्चमस इति होतृश्चमसाध्वर्युः। प्र ब्रह्मण इति ब्राह्मणः॥ प्रोद्गातॄणामित्युद्गा
तॄणां। प्र यजमानस्येति तु त्वतः। प्रयंतु सदस्यानामिति पूर्वेषामेवानुवादः। अत्रावसाने कृत्वा होत्राणां चमसाध्वर्यव उपावर्तध्वं भ
क्षस्याध्वर्यवो भवितव्यवशिष्टं पंचचमसाध्वर्यून् प्रति प्रैषोऽयं॥ ततोऽध्वर्युप्रतिप्रस्थातारौ स्वस्वमार्गेण परेणोत्तरवेदिमागच्छतः
आगत्य प्रतिप्रस्थाता मंथिशेषं सर्वं शुक्रपात्रेण नयति॥ ततोऽध्वर्युर्मंथिशेषसहितं शुक्रशेषं सर्वमपि होतृचमसे वनयं
ति॥ ततश्चत्वारो होत्रादिचमसाध्वर्यवः स्वस्वचमसान् सदोमध्ये नयंति। प्रशास्त्रादिचमसाध्वर्यवश्चोत्तरवेदेः पश्चात् स्वं स्वं
चमसं निधाय द्रोणकलशात्परिप्लवया सोममादाय कृतावशिष्टसोममध्य एव स्वस्वचमसक्रमेण पुनरभ्युन्नयंति। त
तोऽध्वर्युः प्रशास्त्रचमसमादायाश्राव्य प्रशास्तर्यजेति प्रेष्यति वषट्कारानुवषट्कारयोर्जुहोति॥ इदं मित्रावरुणाभ्यां इदम
ग्नय इति त्यागौ। अत्राध्वर्योरुपांशुवितिजपः। अंतिमस्याग्नीध्रचमसस्य होमानंतरं वा॥ तत उपस्थप्रचमसाध्वर्यवे चमसं स

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प

मर्पयेत्॥ततोब्राह्मणाछंसिचमसमादायाश्राव्यब्राह्मणपजेतिप्रैषः॥वषट्कारानुवषट्कारयोर्होमः॥शेषरक्षणंइदमिंद्राय।इ
दमग्नये।चमसप्रदानं।ततःपोतृचमसमादायाश्राव्यपोतर्यज॥वषट्कारानुवषट्कारयोःसशेषहोमः।इदंमरुद्भ्यः॥इ
दमग्नये॥चमसप्रस्थापनं।ततोनेष्टचमसमादायाश्राव्यनेष्टर्यजेतिप्रैषः।वषट्कारानुवषट्कारयोर्होमः।इदंत्वष्ट्रे।इद
मग्नये॥चमसप्रस्थापनं॥ततआग्नीध्रचमसमादायाश्राव्याग्नीध्रयजेतिप्रैषः॥वषट्कारानुवषट्कारयोर्होमः॥इदमग्नयइ
न्द्रवोभयत्राप्यागः।अत्रवांतपंक्तिनिजपः।ततोग्नीध्रचमसहस्तएवाध्वर्युःसदोगत्वाअपाङ्ग्नीद्ध्रितिब्रुवन्होतुरग्रेप्रत्यङ्मुखउप ६४
विशति॥ततोद्विदेवत्यानैंद्रवादीन्भक्षयति॥अत्रभक्षणेद्वौपक्षौ॥वषट्कर्तुःपूर्वंभक्षः।ततोहोमकर्तुरितिमिमांसकाः॥
होमकर्तुःप्रथमंभक्षस्ततोवषट्कर्तुरितिकर्कसंप्रदायकारयाज्ञिकादयःसर्वे॥तेनात्रहोमकर्तुःप्रथमभक्षपक्षःप्रदर्श्यते।
तत्रपूर्वंहोत्रासमर्पितमैंद्रवायवंमुखस्यठोकयित्वावाग्देवीजुषाणेतिमंत्रेणाह्वलंभक्षयति॥होतृवदित्यतिदेशात्ओ
ष्ठलेपनमात्रमवघ्राणंवा।तथाचशांखायनः।लिंपेदेववावजिघ्रेदत्रद्विदेवत्येषुचेति॥अत्रअनुयाजेष्वद्विदेवत्येषुचभक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्त्तृभिरेष्ठलेपनं वाकार्यमव घ्राणं वेत्यर्थः॥ ततो हित्वमे गात्राणि मुखवादीने निपादपर्यन्तानि सर्वाणाम्या लभते॥ ततो होतृत्वमसेत्व
त्सं शेषमवनयति। ततो होत्राशेषावनयनान्ते सकृद्भक्षिते पुनरुपहवादिशेषावनयनान्तं पूर्ववत्करोति॥ ततः पुनर्होत्रा तथैव
नयनान्ते ततो ध्वर्युः पुरोडाशमात्रां सूक्ष्मं पुरोडाशखण्डमैडवायवपात्रे प्रास्यति॥ ततो भूमौ पात्रनिधानं केचिद्देवं क्रममाहुः॥ ग्रहप्र
तिग्रहः उपहवः ढौकनं॥ भक्षणं॥ गात्रालंभनं॥ ततो होतुर्भक्षः। पुनरुपहूयाध्वर्योः पूर्ववद्भक्षः ततो होत्रा भक्षिते उभयोर्द्विर्द्विः शे
षावनयनं॥ ततः पुरोडाशखण्डप्रक्षेपस्ततो निधानमिति॥ सर्वसंमतश्चायं क्रमः॥ ततो होत्रा समर्पितस्य मैत्रावरुणस्येनु व
सुर्विदद्वसुरित्यादानं॥ उपहवप्रार्थनं॥ मैत्रावरुणं चक्षुषो ढौकयित्वा वाग्देवीति भक्षः। हित्वम इति गात्रालंभः॥ होतृत्वमसे
शेषावनयनं॥ ततो होतुर्भक्षणं शेषावनयनान्तं॥ ततः पयस्या मात्रां मैत्रावरुणपात्रे प्रक्षिपेत्॥ ततो निधानं॥ ततो ध्वर्युर्हो
त्रा समर्पितमाश्विनमेवं वसुः संपद्वसुरिति प्रतिगृह्योपहूयाश्विनं शिरः पर्याहृत्यावेक्ष्य भक्षणगात्रालंभने करोति। ततो होत्रा
शेषावनयस्योत्तरे वर्त्मनि निदधाति प्रस्तमक संस्थान्। ततस्त्रिंशं होत्रे प्रदायेत्यादि मपीद्मनि ति ज पांनं चमसि न इहोपहवकाले

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प स्वस्वचमसमनुप्रयच्छति॥उपहूतेद्यावापृथिवी इत्यनुमन्त्रमानेनाग्नीध्रे षडवत्तसमर्पणं॥ चतुर्द्धाकरणाभावः होतुरवान्तरेडाभक्षणं॥यज
जमानस्य सवनप्रार्थनाच्छंदोगोक्ता॥ ११ ॥ एकादशी कंडिका॥ ॥ ततश्चमसानां भक्षणं॥ ततो होतृचमसे अध्वर्युः प्रतिप्र
स्थातारं होतारं होतारं च पृष्ट्वाभ्युक ग्रहशेषं भक्षयति॥ सर्वत्र सोमभक्षे वाग्देवीति भक्षणं॥ ततो हि त्वमेणाचाणिणाचालं भनीत
तः प्रतिप्रस्थाताध्वर्युर्होतारं च पृष्ट्वा होतृचमसस्थं मंथिग्रहशेषं भक्षयति॥ ततो होताध्वर्युप्रतिप्रस्थातारं च पृष्ट्वाभ्युक्तं
मंथि स्वचमसानां त्रयाणां वषट्कारनिमित्तं तेन भक्षयति॥ ततः स्वचमसं निधाय ब्रह्मचमसे ब्रह्माणं पृष्ट्वा वषट्कार ६५
निमित्तं भक्षयतीति सर्वत्र योज्यं। ब्रह्मा च होतारं पृष्ट्वा समाख्यानिमित्तं भक्षयति॥ उद्गाता स्वं स्वं चमसमन्यो न्यं पृष्ट्वा भक्षयं
ति॥ तेषां चमसे वषट्कर्तृभक्षो न भवति तस्मादुद्गातृचमसं नान्यो भक्षयेदिति निषेधवचनात्॥ ततो होता यजमानचम
से मुत्वं नु पह्वयत्वेति पृष्ट्वा वषट्कारनिमित्तं सर्वत्र भक्षयतीति योज्यं॥ ततो यजमानो होतारं पृष्ट्वा होतुः सर्वत्र वषट्कार
निमित्तः॥ इतरेषां तु समाख्यानिमित्त इति ज्ञेयं॥ ततो मैत्रावरुणचमसे होता प्रशास्तारमध्वर्युं पृष्ट्वा प्रशास्ता होतारमध्वर्युं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोर्ब्रह्मणाछंसिचमसे होता ब्राह्मणाछंसिनं अध्वर्युं पश्चा ब्राह्मणाछंसी होतारमध्वर्युं च पश्चा॥ अग्नीध्रो होतारमध्वर्युं च पश्चा
ततो होता स्वकीयचमसे ध्वर्युं प्रतिप्रस्थातारं च पश्चा समाख्यानिमित्तं भक्षयति॥ एवं सर्वेषां चमसानां भुक्तामंथिग्रहहोमनिमि
त्तं भक्षणं समाप्तं॥ ॥अथ प्रशास्त्रादिपंचचमसानां पुनरभ्युन्नीतहोमनिमित्तं भक्षणमुच्यते॥ तत्र प्रशास्त्रादीनां वषट्का
रसमाख्यानिमित्तं तत्रैणभक्षणं क्रमेण वा होत्रध्वर्युं पश्चा॥ तत्रैवं॥ प्रशास्तृचमसे ध्वर्युं होतारं प्रशास्तारं च पश्चा भक्षयतीति
सर्वत्र ज्ञेयं॥ प्रशास्ता होतारं अध्वर्युं च पश्चा॥ ब्राह्मणाछंसिचमसे ध्वर्युं होतारं ब्राह्मणाछंसिनं च पश्चा॥ ब्राह्मणाछंसी च होता
रमध्वर्युं च पश्चा॥ पोतृचमसे ध्वर्युं होतारं पोतारं च पश्चा॥ पोता च होत्रध्वर्यू पश्चा नेष्टृचमसे ध्वर्यु होतारमध्वर्युं च पश्चा। नेष्टा हो
त्रध्वर्यू पश्चा। अग्नीध्रचमसे ध्वर्यु होतारमग्नीध्रं च पश्चा॥ आग्नीध्रो होत्रध्वर्यू पश्चा। सर्वैश्चमसा अस्यैव भक्षाः कार्याः। ततउ
न्नेतापूतभृतः सकाशाद् दुदंचनेन सोममादाय सदोमध्ये आगच्छति॥ होत्रादयो न वचमसिनश्च तेन सोमेनाप्यायस्व समेतु ते॥
सं ते पयांसीति द्वाभ्यां स्वस्वचमसानाप्याययंति॥ सोमवितनयनेन चमसस्थं सोमं वर्द्धयतीत्यर्थः। ततश्च मसाध्वर्य्यवस्तान् सर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

ध्वमसां सदसोनिर्हृत्य दक्षिणाहविर्धानाक्षस्य पश्चात् भूमौ क्रमेणोदकसंस्थान् हविर्धानमध्ये दक्षिणाक्षशकटपश्चाद्भागस्य दक्षा
न्निदधाति ॥ तेषां चमसानां नाराशंसा इति संज्ञा वैश्वदेवग्रहहोमं तं यावत् ॥ तदुक्तं ॥ महत्त्वात्तीये माहेंद्रऐंद्राग्ने वैश्वदेवयोः । ना
राशंसाः प्रकंप्यं ते ग्रहे षे ते षु पंचस्विति ॥ ततोध्वर्यु रिडापात्रीमध्ये पृथक्स्थापितं पुरोडाशशकलं हस्तेनादाय समुपहूताः
स्मइत्युक्त्वा प्राश्य उक्तप्रायसदसो हविःप्रविष्टस्याच्छावाकस्य समीपे आगत्य अच्छावाकाय पुरोडाशशकलं समर्पयन्नच्छावा
कवदस्व यत्ते वाद्यमित्यच्छावाकं प्रत्याह ॥ ततोच्छावाकोच्छावोअग्निमवसइत्यादि पठति ॥ ततउपोअस्मान्ब्राह्मणानित्येवं पठ
ति ॥ अध्वर्युर्होतारं प्रतिवक्ति ॥ उपहवमयं ब्राह्मण इच्छते त ९ होतरुपह्वयस्वेति होता उपहूत इत्युक्ते अध्वर्युस्तृतीयमाता या ६६
तुब्रूहीत्यच्छावाकं प्रेष्यति ॥ ततोच्छावाकस्य चमसमध्वर्युरच्छावाकचमसमपरेणोत्तरवेदिं निधाय ॥ पुनरभ्युन्नयनवद्रोणक
लशात्परिप्लवयासकृदेवोन्नयति ॥ उभयतः शुक्रमच्छावाकचमसमुन्नयतीति मानवसूत्रे विशेषः ॥ ततः पश्चाद्भ्ययणो द्रोण
कलशादुपस्तारमभिवारणेमध्या वदानं प्रत्नभ्नत इत्येवं भवति ॥ अनुवचनांते ध्वर्युस्तं चमसमादायातिक्रम्याच्छावाकप

जेत्याह ॥ वषट्कारानुवषट्कारयोर्होमः शेषरक्षणं ॥ इदमिंद्राग्निभ्यां इदमगन्मयइति त्यागौ ॥ नंपंत्विति जपः ॥ ततोच्छावाक
समीपेउपविष्टनिमित्तं तं त्रेणभक्षयति । अलर्वभक्षः ॥ ॥आप्यायनं वाकः करोति ॥ ततश्चमसाध्वर्युर्लत्तं चमसं हविर्द्धाने ने
दृत्वमसाग्नीध्रुचमसयोर्मध्येति दधाति ॥ अतदुर्ध्वं अस्य चमसस्यैन देवसर्वत्रस्थापनं ॥ ततो ब्रह्महोत्रध्वर्याग्नीध्रमैत्रावरु
णं आग्नीध्रगृहमध्ये इडाप्राश्नंति ॥ अग्नीत्वडवत्तं च ॥ तत्रयजमानो पि पुरोडाशादिपंचहविःशेषं यथावदविनभक्षयति ॥ पत्
नीचशालामध्ये स्मार्ताग्निपक्वमोदनादूपादि हविष्यान्नमस्मिन्काले एवाश्नाति ॥ ततउत्तरवेदेः पश्चात्स्तवनस्य मार्जनीनप
वित्रप्रतिपत्तिः ॥ भागपरिहारः । ततो वाजिनयागो भक्षांतः । ततो दक्षिणाग्नौ केवलापिष्टलेपाकृतिः ॥ प्रणीताविमोकः ॥ रक्षस॰
भागः । भागावेक्षणं । भागप्राशनं । नात्रपश्चाबर्हिषोहोमः । अविहितत्वादपूर्वत्वाच्च तस्याप्राकृतकार्यस्तनद्धर्मलाभाभावात् ॥ ॥
द्वादशीकंडिका ॥ ॥ततोच्छावाके सदस्युपविष्टे सत्यध्वर्युप्रतिप्रस्थातारौ अनुग्रहैः प्रचरतः ॥ तत्राध्वर्युर्मैत्रपात्रमादाय द्रोण॰
कलशसमीपेउपविशति ॥ प्रतिप्रस्थाता पि द्वितीयमृतुपात्रमादायाध्वर्यौरुत्तरतउपविशति ॥ तत्र प्रथमो ग्रहोस्सहेवद्रोण॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प कलशात्सोमं अनुपात्रयोर्गृह्णीतः॥ उपयामगृहीतोसि मधवे त्वेत्यध्वर्युर्गृह्णाति॥ उपयामगृहीतोसि माधवाय त्वेति प्रतिप्रस्थाता गृह्णा
ति॥ प्रतिप्रस्थाता तच्चैव तिष्ठति॥ उभयोः परिमार्जनं॥ नसादनं॥ ततोध्वर्युरुत्थाय यजति देशं गत्वाश्राव्य अनुदाना प्रेष्येति मैत्रावरु
णं प्रेष्यति॥ आद्याद्दर्तुग्रहाः सर्वं कृतार्का यो असर्वं कृता वा तत्रासर्वं कृतपक्षे पूर्वपूर्वशेषमध्यहवोत्तरोत्तराणां॥ ॥तथा च मनुः॥
शेषे पूर्वस्योत्तरं गृह्णीतेति॥ अनुग्रहेष्वनुवषट्काराभावः। इदमिंद्रायेति प्रथमस्य त्यागः॥ ततोध्वर्युर्यदा हविर्द्धानं प्रविशति तदै
व प्रतिप्रस्थातानिःक्रामति॥ यदा च प्रतिप्रस्थाता कृत्वागत्य हविर्द्धानं प्रविशति॥ तदाध्वर्युर्निःक्रामति॥ तथा प्रतिप्रस्थाताध्वर्युर्निःक्रा ९७
मं तं प्रविशंतं च अनुपात्रेणापरिगृह्णाति। अनुपात्रमध्वर्योर्दक्षिणतोनयति॥ स्वयमध्वर्योरुत्तरतोग्रहतीत्यर्थः॥ सर्वे प्रद्रोणकल
शात् गृहणपरिमार्जनं। सादनाभावश्च। अन्यासेन गृहप्रवेशानिःक्रमणहोमाश्च॥ एवं प्रतिप्रस्थातानिःक्रम्याश्राव्य अनुदाना प्रेष्येत्याह।
पोतायजति। इदं मरुद्भ्यः। अध्वर्युः प्रविश्योपयामगृहीतो० अग्न्यायत्वेति द्रोणकलशाद् अनुपात्रे गृहीत्वा परिमृज्य निःक्रम्याश्राव्य अनुना
प्रेष्येत्याह॥ नेष्टायजति इदं त्वष्ट्रे॥ प्रतिप्रस्थाता प्रविश्योप० अग्न्ये वयेत्वेति गृहीत्वा॥ अनुनाप्रेष्येति वक्ति। अग्नीध्रयजति। इदमग्नये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्वर्युः प्रविश्य नभसे त्वेति गृहीत्वा ॥ आश्राव्य ऋतुना प्रेष्येत्याह ॥ ब्राह्मणाच्छंसि यजति ॥ इदमिंद्राय ॥ प्रतिप्रस्थाता नभस्याय त्वेति गृही
त्वा । ऋतुना प्रेष्येत्याह । प्रशास्ता यजति । इदं मित्रावरुणाभ्यां । एवं यस्मात् ग्रहणं पात्रयो रग्रेण होमः । अथाग्रं हस्तेन गृहीत्वा चतु॰
र्णां मूलेन ग्रहणां होमश्च ॥ ततोध्वर्युरिषे त्वेति गृहीत्वा निःक्रम्याश्राव्य ऋतुभिः प्रेष्येत्याह ॥ होता पुनर्यजीत । इदं देवाय द्रविणो
दसे प्रतिप्रस्थातोर्ज्जे त्वेति गृहीत्वा श्राव्य ऋतुभिः प्रेष्येत्याह ॥ पुनर्नेष्टा यजति । इदं देवाय द्रविणोदसे । प्रतिप्रस्थाता सहस्या
य त्वेति गृहीत्वाश्राव्य ऋतुभिः प्रेष्येत्याह ॥ अछावाको यजति इदं देवाय द्रविणोदसे ॥ एवं चतुर्षु ऋतुभिरिति प्रैषो मूलेन हो
मश्च ॥ ततोध्वर्युप्रतिप्रस्थातारौ पात्रमुखे विपर्यस्य सहैवोन्नमौ ग्रहौ प्रथमवज्जुह्वतः ॥ पपसे त्वेत्यध्वर्युः तपस्याय त्वे॰
ति प्रतिप्रस्थाता ततोध्वर्युर्निःक्रम्याश्राव्य ऋतुना प्रेष्येत्याह ॥ अत्र प्रशास्ता अध्वर्यो यजतमित्याह ॥ ततोध्वर्युप्रतिप्रस्थाता
रौ होतरेतद्यजेति होतारं प्रेष्यतः ॥ ततो होतुस्तद्याज्यापाठः ॥ अग्रेण होमः द्वौ बरक्षणं नियमेन ॥ इदमश्विभ्यां । ततः प्रति
प्रस्थाता निःक्रम्याश्राव्य ऋतुना प्रेष्येत्याह ॥ अत्र प्रशास्ता गृहपते यजेत्याह ॥ यजमाने पिहोतरेतद्यजेत्याह ॥ ततो होता यजति॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

अग्रेणसर्वहुतं जुहोति। इदमग्नये गृहपतये अध्वर्युक्तछुयानुनुपयामगृहीतोस्य॰ हरस्पतये त्वेति वयो दशमं च ग्रहं गृहीत्वा परिमृज्य प्रति
प्रस्थातारमनुजुहोति॥ त्वा गमुवा दश वयोर्दशयोरेकैव वा। या ज्याया हवत्वात्। ततोध्वर्युः प्रतिप्रस्थातुः पात्रे संस्रवमवनयति। प्रति
प्रस्थात। वा अध्वर्युपात्रे॥ ततोध्वर्युः संस्रवयुक्तं पात्रमपादाय सदसि गच्छति॥ प्रतिप्रस्थातारिक्तं स्वनुपात्रमादाय हविर्धानं
प्रविश्य द्रोणकलशात् स्वनम्नतो वायंद्राग्नीआगत मितिमंत्रेण स्वनुपात्रे ऐंद्राग्नं ग्रहं गृह्णाति॥ परिमार्जनं प्रदक्षिणावृ
त्तीतरथावृत्ती॥ तत ऐन्द्राग्नस्य ग्रहणस्यालयाः पुरस्तान्नखरे सादनं॥ एषते योनिरिन्द्राग्निभ्यां त्वेति मंत्रेण॥ ततः प्रतिप्रस्थाता ६८
पिपूर्ववारेण हविर्धानान्निष्क्रम्य भक्षार्थं सदस्यागच्छति॥ ततोध्वर्युर्होतारं प्रतिप्रस्थातारं च पृष्ट्वा भक्षयति॥ होता चाध्वर्युप्र
तिप्रस्थातारं च पृष्ट्वा॥ एतच्च पूर्वेषां दशानां सर्वहुतत्व पक्षे॥ सर्वेषामसर्वहुतत्व पक्षे विशेष उच्यते॥ ॥तत्र पूर्वमध्व
र्युः सर्वान्होत्रादीन् निमित्रोत्पत्तिक्रमेण पृष्ट्वा तैरनुज्ञातो मभक्षयति॥ होता चाध्वर्य्यादीन्सर्वान्निमित्रोत्पत्तिक्रमेण पृष्ट्वा
भक्षयति॥ निमित्रोत्पत्तिक्रमश्च पूर्वपूर्वहोमकर्त्तुः॥ पश्चाद्वषट्कर्त्तुः॥ इत्यसाधारणपात्रप्रतिभक्षं सर्वैरप्युपह्वप्रार्थनं॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्षणं च यस्मिन्नृत्युयाजे येनकृतं येन वा वषट्कृतं तत्कृतहोमनिमित्तं तयोरेव ॥ तत्र प्रथमं होत्रा सहाध्वर्युः । ततः पोत्रा स
ह प्रतिप्रस्थाता ॥ ततो नेष्ट्रा सहाध्वर्युः ॥ आग्नीध्रेण सह प्रतिप्रस्थाता ॥ ततो ब्राह्मणाच्छंसिना सहाध्वर्युः ॥ ततः प्रशास्त्रा सह
प्रतिप्रस्थाता ॥ ततः पात्रमुखं विपर्यस्य होत्रा सहाध्वर्युः ॥ होत्रा सह प्रतिप्रस्थाता ॥ ततो नेष्ट्रा सहाध्वर्युः । ततोऽच्छावाकेन सह प्रति
प्रस्थाता पुनः पात्रमुखं विपर्यस्य होत्रा सहाध्वर्युः ॥ पुनर्होत्रा सह प्रतिप्रस्थाता ॥ तत्रोपहवे अयं क्रमः ॥ अध्वर्युः प्रथमं पात्रं
गृहीत्वा होतारं प्रतिप्रस्थातारं पोतारं नेष्टारं प्रतिप्रस्थातारं आग्नीध्रं ब्राह्मणाच्छंसिनं प्रतिप्रस्थातारं प्रशास्तारं होतारं २ प्रति
प्रस्थातारं पोतारं नेष्टारं प्रतिप्रस्थातारमच्छावाकं होतारं प्रतिप्रस्थातारं होतारं चेत्येवमष्टादश पृष्ट्वा भक्षयति ॥ ॥ एवं
होतापि अध्वर्युं प्रतिप्रस्थातारं पोतारमध्वर्युं नेष्टारं प्रतिप्रस्थातारं आग्नीध्रमध्वर्युं ब्राह्मणाच्छंसिनं प्रतिप्रस्थातारं प्रशास्ता
रमध्वर्युं प्रतिप्रस्थातारं पोतारमध्वर्युं नेष्टारं प्रतिप्रस्थातारमच्छावाकमध्वर्युं प्रतिप्रस्थातारं चेत्येवं विंशति संख्यया पृष्ट्वा भ
क्षयति ॥ एवमनेनैव क्रमेण सर्वेषां स्वनामपरित्यागेनोपहवप्रार्थनमूहनीयं ॥ अत्र द्वादशर्त्तुग्रहाः ॥ तत्र द्वादशहोमकर्त्तारः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प

द्वादशावषट्कर्त्तारश्च ॥ एवं चतुर्विंशतिः । तेषां क्रमेण नामानि । अध्वर्युः होता प्रतिप्रस्थाता पोता ध्वर्युः । अग्नीत् । अध्वर्युः ब्राह्
मणाच्छंसी प्रतिप्रस्थाता प्रशास्ता । अध्वर्युः होता प्रतिप्रस्थाता पोता अध्वर्युः नेष्टा प्रतिप्रस्थाता अच्छावाक । अध्वर्युः होता
प्रतिप्रस्थाता होतेति । तत्रयो भक्षयति तेन त्वनामवर्जमन्येभ्य उपहूवप्रार्थनं कर्त्तव्यं । तेनाध्वर्युप्रतिप्रस्थात्रोरष्टादशैवोप
हूताः यतश्चतुर्विंशतिमध्ये तयोः षट् त्वनामानि । एवमेव होतुर्विंशतिः । द्वाविंशतिः । अग्नीद्ब्राह्मणाच्छंसि प्रशास्तृच्छावाका
नां त्रयोविंशतिः ॥ ॥ तथा च श्लोकः ॥ होतुर्विंशतिरेवात्र पोतुर्नेष्टुर्विंशतिरेव ॥ त्रिंशत्त्रिंशच्चतुर्णां तु शेषे त्वष्टादश स्मृताः इति ॥ द्वि ६८
त्त्वेकविंशतिः ॥ चतुर्णां अग्नीद्ब्राह्मणाच्छंसिप्रशास्तृच्छावाकानां शेषे अध्वर्युप्रतिप्रस्थात्रो रहाने ॥ अस्मत्सुगमं ॥ यदा च द्वादशा
हे पक्षस्य षष्ठेहनि स्वयमन्तयाजे ज्येति वचनात् यदा अध्वर्योर्यजमानस्य च स्वयं याज्यापाठस्तदा होतुस्त्रयोविंशतिरुपहूताः
एकादशो ग्रहे होतुः स्थाने अध्वर्युप्रतिप्रस्थात्रोर्द्वयोर्वषट्कर्त्रोः प्रार्थनं । अध्वर्योः स्थाने उन्नेतुस्तस्य तदा होमकर्तृत्वात् ॥ ॥
तथा च काठके ॥ यद्यध्वर्युर्यजेन्नेता गृह्णीयाच्चरेदिति ॥ द्वादशे व होतुः स्थाने यजमानस्येति विशेषः । यदा चाध्वर्युः प्रतिप्रस्थातो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रमेतरस्यैव यास्यापाठो नो भयो स्तदा होतुर्द्वाविंशत्युपहवाः होमाभिषवकर्तुः प्रथमभक्षपक्षे ऽयं क्रम उक्तः॥ यदा वषट्कर्तुः प्र
थमभक्षस्तदा प्रथमं प्रथमं वषट्कर्तृनाम॥ पश्चात्पश्चाद्धोमकर्तुरिति विशेषः। उपहवसंख्यो नु समाना। एवमनुगृह्णीतां भ
क्षणानंतरमध्वर्युस्तदृतुपात्रं स्वयं सदसो निःकाश्य मार्जालीये प्रक्षाल्य खरे निदधाति॥ ततो होतुः पुरस्तात्पूर्वाभिमुख उपवि
शति॥ ततो होता शंसावे स्या कृतः प्रदक्षिणमावृत्य शस्यमाने शस्त्रे प्रणवे अवसाने चोथा मो दैवेति प्रतिगृणाति। अथवा ॐ ३
मित्येनावानेव सर्वत्र प्रतिगरः॥ शस्त्रसमाप्ते तु सर्वपक्षे ॐ ३ मित्येव नित्यप्रतिगरः॥ ॥अथ। वा ॐ थामो दैववागित्येवं प्र
तिगरो भवति। अस्मिन्नपि पक्षे शस्त्रसमाप्ते ॐ ३ मित्येव॥ ॥ततः शस्त्रान्ते ॐ मिति प्रतिगीर्य प्रदक्षिणमावृत्य -- स्थामावृत्यैव
कृत्वोत्थाय पोत्रेरेण हविर्धानं गत्वा ऋतुपात्रे प्रतिप्रस्थात्रा गृहीतमैन्द्राग्नं गृह्णाति॥ ॥चमसाध्वर्यवश्च हविर्धानमध्य
एव दशापि चमसान् हुतो कृत्वा तिष्ठति। ततो ध्वर्युर्निष्क्रम्यातिक्रम्याश्राव्योक्त्वा शायजसोमस्येति होतारं प्रेष्य। वषट्कृते
ऋत्वो त्रयो ऽर्धेनु वषट्कृते च कृत्वा॥ प्रदक्षिणमावृत्तीत्तरया वृत्तीचकरोति॥ इदमिंद्राग्निभ्यां॥ इदमग्नये वृत्तित्यागो॥ वृक्षस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प जमानौ चमसर्दत्रहोमकालेआगत्याहवनीयं दक्षिणेन वहिर्वेद्युपविशतः। होमानंतरं वभक्षणार्थं सदसिगत्वा स्वस्थाने ऽपविशतः।
प्रशास्तृधिष्ण्यं दक्षिणेनैव सदो व्रुह्मणोगमनागमनो हविर्द्धानमार्जालीयांतरालेनच॥ गृहे हृदमातेच समाध्वर्यवः स्वहस्तस्था
नेव च मसान् वषट्कारे नुवषट्कारे च प्राक्प्रेरणेन कंपयंति॥ ॥तथा च मनुः॥ समाप्रेशस्त्वे गृहमादन्नेध्वर्युः चमसाध्वर्यवश्च
चमसान्॥आश्राव्याहोतृकृशाययजसोमस्येति प्रेष्यति। वषट्कानुवषट्कारयोर्जुहोति॥ चमसाध्वर्यवो द्विश्चमसान्ननुप्राद्गुयंतो
ति। ततोध्वर्युः सपात्रएवोत्तरेण हविर्द्धानं सदसिगत्वा होतारं पृष्ठाध्वर्युर्भक्षयति॥ होता चाध्वर्युपद्धा भक्षयति॥ चमसाध्वर्यवश्च हविर्द्धा ७०
नाच्चमसानादायसदसि यथास्वं चमसिभ्यो होत्रादिभ्यः समर्पयंति॥ होत्रादयश्चासाधारणापादनुपहूयैवात्सर्वभक्षान्भक्षयित्वा पूर्व
वच्चमसानाप्यायपंति॥ ततश्चमसाध्वर्यवस्ता – जर्हविर्द्धानमध्ये तस्मिन्नेव स्थानेस्थापयति॥ ततोध्वर्युस्तदनुपात्रं निर्हृत्यमार्जाली
येपुक्षाल्यखरेनिदधाति॥ १३ ॥त्रयोदशीकंडिका॥ ॥ततोध्वर्युः भुक्तपात्रेणद्रोणकलशात्परिप्लवया सोमं मंदायोमासश्चर्षणी
धृतइतिमंत्रेणवैश्वदेवंग्रहं गृह्णाति॥ यजमानोविकल्पेनग्रहं गृह्णंतमध्वर्युमन्वारभते॥ परिमार्जनं॥ पुदक्षिणान् हुत्नीतरथाह

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्री। ततः शुक्रस्थानेसादनं। सोमे सत्स्तोत्रशास्त्रक ग्रहग्रहणानंतरं स्तोत्रोपाकरणं यावद्गृहीनानापव्याहरेत्॥ उपावर्त्तध्वमित्येवंत
ध्वतिरिक्तं किमपि नोच्चरेदित्यर्थः॥ उपाकरणानंतरं उन्नातारेनापव्याहरे एषोत्रमेति प्रस्तोत्रकत्रकर्तृक प्रैषयावत् एवेति प्रैषं
श्रुत्वा शस्त्रकर्त्रा नापव्याहरेत् वषट्कारपर्यंतं अपव्याहरणे च सर्वेषां व्याहृतिजपः प्रायश्चित्तं॥ ग्रहासादनानंतरं द्रोणकलश
स्य सोमं पूतभृत्यासिच्य द्रोणकलशपवित्रयोः प्रातः सवनवद्योजनं कर्त्तव्यं अधोधोक्षं प्रत्यंचं द्रोणकलशमन्वृत्तोपर्युपर्य
क्षं पवित्रमस्मिन्करोति इत्येवं तस्य णाम्यां वैश्वदेवं ग्रहम्पस्थस्य पुरस्तात्प्रत्ये समाप्ते॥ सदः प्रविश्य प्रस्तोत्रे तृणे समर्पयन् उपा
वर्तध्वमिति मंत्रेण स्तोत्रमुपाकरोति। प्रस्तावस्तोत्र शास्त्रकाले प्रशास्तृदक्षिणेन आस्ते। यजमानश्च स्तोत्रे स्तूयमाने उन्नातृणां
पुरस्तात्प्रत्यङ्मुख उपविशति॥ शस्त्रकाले च शस्त्रकर्तुः पुरस्तात्॥ सोतेस्तोत्रस्य भवसंते शस्त्रस्येति श्रुतेः। ततउन्नातारं स्तुवंति॥
तदंतेहोताशस्त्रं शंसति॥ तत्राध्वर्युर्होतुः पुरस्तात्प्राङ्मुखः उपविशति। शोंसावे त्याहूतः सवनवदेव निर्वपति॥ पयस्या याअभावइ
ति विशेषः। तत्र चतुरासनं। प्रस्तोपवेशनं। पुरीतापुरणयनं पात्रासादनं। श्रूर्पे। पभ्रपुरोडाशस्याष्टौ कपालानि। ऐंद्रस्यैकाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प ण। एवमेकोनविंशतिः कपालानि। कर्परं च। कृष्णाजिनं। उलूखलमुसलं। पात्रीधान्यं। पुरोडाशद्वयार्थं व्रीहयो यवाश्च॥ धाना
करंभार्थं यवाः। संयवनोदकं॥ दधिचरुस्थालोपवेषं च स्रुवस्रुचौ। अवदानं॥ एकः पुरोडाशपात्री। पंचबिलाश्च। स्फ्योपहितपा
त्रीकरणं॥ दर्शाग्निहोत्रहवण्योरादानादि। ग्रहणे। अग्नये जुष्टं इति प्रथमं पञ्चपुरोडाशस्य। ततः इंद्राय जुष्टं इंद्राय हरिवते जु
ष्टं॥ इंद्राय पूषण्वते जुष्टमित्यादि प्रातः॥ सवनवत्सर्वं पयस्यावर्जं। एककर्तृपक्षे करणं तेषां विभज्यालंभः इदमग्नये इ
न्द्रस्य च॥ इदमिंद्रस्य हरिवते इंद्रस्य पूषण्वत इत्येवेति। आसां तेषु सर्वस्थापितेः संमार्जनैः अवदानपुरोडाशपात्रीपंचबिला ७१
नां च संमार्गप्रतपने॥ संमार्जनानां यत्नेन रक्षणं। ततोऽध्वर्युः पशुविशसनादि नु रवायामवदानप्रक्षेपांतं॥ ॥ततः त्रिः प्र
स्नावयता त्रिः प्रच्युतस्य हृदयमुत्तमं कुह्नादिस्वेतावान्त्वंडः प्रैषः। वैश्वदेवशस्त्रांते अध्वर्युरोमिति प्रागीर्थं स्थापयप्रदक्षि
णा हविर्धानरथा हविः कृत्वा वैश्वदेवं ग्रहमादत्ते॥ चमसाध्वर्यवश्चमसान् हस्ते कृत्वा तिष्ठंति॥ अध्वर्युरतिक्रम्याश्राव्या
ह स्थश्वा यज सोमस्येति होतारं प्रेष्य वषट्कारानुवषट्कारयोर्हुत्वा प्रदक्षिणा हविर्धानरथा हविः करोति॥ इदं विश्वेभ्यो दे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेभ्यः इदमग्न यजति स्वाग्नौ ॥ गृहे हूयमाने चमसाध्वर्यवः पूर्ववद्बहुमलान्स्वहस्तस्थान्प्रा ऽ.नयनेन द्विः प्रकंपयंति ॥ ततोध्व
र्युर्ग्रहं सदसि नीत्वा होतारं पृष्ट्वा भक्षयति ॥ होता चाध्वर्युं पृष्ट्वा। चमसाध्वर्यवश्च समानहविर्धानादानीय सदसि यथा
स्वं समर्पयंति ॥ चमसिनश्चानुपहूयै वसर्वे स्वस्वचमसस्थं सोमं भक्षयंति ॥ ततश्चमसाध्वर्यवश्चमसान्मार्जालीयधि
ष्ण्यसमीपे जलेन प्रक्षाल्य भ्रुद्धान्कृत्वा ऽत्तरवेदिमपरेणोदकसंस्थान्निदधति ॥ अध्वर्युश्च ग्रहपात्रं स्वयमेव मार्जाली
ये प्रक्षाल्य खरे स्वस्थाने स्थापयति ॥ ॥ ततस्त्वयऽस्थाविग्रहाः ॥ तद्यथा ॥ प्रथमे अध्वर्युः कर्त्तोद्वियोः प्रतिप्रस्थाता।
तत्र प्रथमे अध्वर्यूस्थपात्रमादायोस्थस्थालीमुखाग्रमित्रावरुणाभ्यां त्वेति मंत्रेणोस्थपात्रे तृतीयं भागं गंति नयति ॥ त
तस्तूर्लीं ऽस्थस्थाल्यां ऽत्तरतः सादनं। ततऽन्येनामेत्रावरुणचमसं प्रथममुत्तरवेदिमपरेणस्थापयित्वा ॥ ततो होत्रादी
नामग्नीत्पर्यंतानां क्रमेणस्थापयित्वा ॥ ततः पूतभृतः सकाशाद्दुदंचनेन सोममादाय तेषु क्रमेणोन्नयति ॥ सकृत्सकृदेव
नोपस्ताराभिघारौ ततोध्वर्युस्तत्राणाभ्यामुस्थपात्रस्थं सोमं स्पृष्ट्वा पुरस्तात्प्रत्यंते सदसि गत्वा तेदर्भतृणोप्रस्तोत्रे समर्पयन्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ॰प पावर्त्तध्वमिति स्तोत्रोपाकरणं करोतीति ॥ एवं सर्वेष्वन्यविग्रहेषु विधिज्ञापः ॥ ततउद्गातारः स्तुवंति ॥ तदंते मैत्रावरुणः शंसति ॥ तत्रा
ध्वर्युः पूर्वं पुरस्तात्प्रत्यङ्ङुपविश्य शोंसावेत्याह्वानः पर्यावृत्य पूर्ववत्प्रतिगृणाति ॥ शस्त्रांते उक्थं वाचीति प्रतिगरः ॥ प्रदक्षिणावृत्तिर्विपरीता
वृत्तिश्च ॥ ततः पूर्वद्वारेण हविर्धानं प्रविश्योत्थ्य पात्रमादत्ते चमसाध्वर्यवश्च समानं गृहीत्वोत्तरवेदिमपरेण प्राङ्मुखोत्तिष्ठंति ।
अध्वर्युरतिक्रम्याश्राव्याहोत्थ्यशायजसोमानामिति मैत्रावरुणं प्रेष्यवषट्कारेणानुवषट्कारयोर्जुहोति । चमसाध्वर्यवश्चाध्वर्यु
मनुवषट्कारे ऽनुवषट्कारेव हुत्वा भक्षार्थं परिशेषयंति । इदंमित्रावरुणाभ्यामिदमग्नय इति त्यागो सर्वेषां होमानां सहैव ॥ प्रद ७२
क्षिणावृत्तो तथावृत्ती ॥ ततोध्वर्युर्ग्रहशेषं मैत्रावरुणचमसे आसिच्य ग्रहपात्रमध्वर्ताविधाय मैत्रावरुणचमसादायसदसि
गच्छति ॥ चमसाध्वर्यवोपि सर्वांश्चमसान्शालामुखीये स्थापयंति ॥ ततो ध्वर्युः प्रशास्तृचमसे प्रशास्तारं प्रेष्याभक्षयति ग्रहहोम
निमित्तं प्रशास्ता ऽध्वर्युं प्रेष्यास चमसे ग्रहचमसो वषट्कारनिमित्तं तेन भक्षयति ॥ ततः स्वचमसं निधायाध्वर्युर्होत्रा
दिचमसेषु होत्रादीन्प्रेष्य वषट्कारनिमित्तं भक्षयति ॥ ततो होतादय एकं प्रशास्तारं प्रेष्य स्वस्वचमसेषु समाख्यानिमित्तं

निःशेषं भक्षयंति ॥ प्रशास्तापि स्वचमसे ध्वर्युप्रश्चात्समाप्यो निमित्तं भक्षयति ॥ ततश्चमसाध्वर्यवश्चमसान्मार्जालीये प्र
क्षाल्योत्तरवेदेः पश्चाद्ब्राह्मणाच्छंसिचमसपूर्वकं स्थापयंति ॥ एवमेकऽकल्पविग्रहऽक्तः ॥ ॥ अथ द्वितीयऽच्यते ॥ ॥
ततः प्रतिप्रस्थातोन्यपात्रमादायोन्यस्थालीं हस्तेनादाय तत्र तमदुग्धसोमं तत्पैवोन्यपात्रे निनयति ॥ रंजापत्वादेवाप्रमि
निमंत्रेण ॥ ततः स्थालीतूष्णीं स्वस्थाने निधाय ग्रहं परिमार्ष्टि ॥ ततः प्रदक्षिणावृत्तीन रथावृत्तिश्च ॥ तूष्णीं ग्रहस्योन्यस्थालस्था
उत्तरतः सादनं ॥ उन्नेतृ ब्राह्मणाच्छंसिचमसपूर्वकं पूतभृतश्चमसोन्नयनं ॥ ततः प्रतिप्रस्थाता दर्भतरुणाभ्यामन्यपात्रग
हीतं सोममन्यच्छ्वा पुरस्तात्रपेक्षते प्रस्तोत्रेन्तरेण प्रयच्छन्नुपावर्तध्वमिति स्तोत्रमुपाकरोति ॥ ततऽद्गातारः स्तुवंति ॥ ततो ब्रा
ह्मणाच्छंसी शंसति । ततः प्रतिप्रस्थाताऽध्वर्युवत्प्रतिगरः ॥ शस्त्रांते ॐ३ मिति प्रतिगीर्यो क्ष्याय प्रदक्षिणेन रथावृत्ती कृत्वोत्तरेण
हविर्धानमागत्य पूर्वेण प्रविश्योन्यपात्रमादत्ते ॥ चमसाध्वर्यवश्चमसान्हस्ते कुर्वंति । ततः प्रतिप्रस्थाताऽतिक्रम्याश्राव्याहोन्यशायज
सोमानामिति ब्राह्मणाच्छंसिनं प्रेष्य वषट्कारानुवषट्कारयोर्जुहोति ॥ तमनु चमसाध्वर्यवोपि चमसान्द्विर्जुह्वति ॥ इदमिंडाये

अ.प दमग्नयइतित्यागो सर्वेषां गृहहोतुः प्रदक्षिणं हुत्वा तथा हुत्वा । ग्रहशेषमस्य ब्राह्मणच्छंसि चमसे आसेकः ॥ उत्थाप्य पात्रस्य स्वरे निधानं ॥
ब्राह्मणच्छंसि चमसं गृहीत्वा तत्समीपे आगच्छति ॥ चमसाध्वर्युर्वापि अष्टौ चमसान् तस्याग्रे स्थापयंति ॥ ततः प्रतिप्रस्थाता ब्राह्म-
णाच्छंसिनं पृष्ट्वा तच्चमसे गृहचमसयोर्वषट्कारनिमित्तं तं तेन भक्षयति ॥ ततो ब्राह्मणाच्छंसी होत्रादिचमसे ग्रहे होत्रादीन् पृष्ट्वा वषट्कार
निमित्तं भक्षयति ॥ ते च होत्रादयो ब्राह्मणाच्छंसिनं पृष्ट्वा स्वस्व चमसे समाख्यानिमित्तं निःशेषं भक्षयति ॥ ततो ब्राह्मणाच्छंसी स्वचम
से प्रतिप्रस्थातारं पृष्ट्वा समाख्यानिमित्तं भक्षयति ॥ सर्वभक्षाश्चमसाश्चमसाध्वर्यवो मार्जालीये प्रक्षाल्योत्तरवेदेः पश्चादछु- ७३
वाकचमसपूर्वकमुदकसंस्थान् स्थापयंति ॥ ॥ इति द्वितीयपउत्थ्य विग्रहः ॥ २ ॥ ततोध्वर्युरच्छावाकार्थं ग्रहं गृहणात्पूर्वं पंच
ग्रावाणोधिषवणस्योपरि संमुखान्निधाय सोमोपनहनेनैव दक्षिणहविर्धानेषां तरालेन ग्राव्णामुपरि सोमं प्रक्षिपति ॥ उपाव
हरति । अवतारयतीत्यर्थः ततो वसतीवरीणामर्धं आधवनीये निनयति ॥ विश्वेदेवाम हत इति मंत्रेण ॥ सर्वेषामेकधनाना
मर्द्धमर्द्धमुदकमाधवनीयेवनयति ॥ अप अयमेव मंत्रः प्रत्येकं सर्वेषां ॥ ॥ अथ तृतीयपउत्थ्य विग्रह उच्यते ॥ ॥ ततः प्रति

प्रस्थातोऽस्य पात्रमादायोऽस्य स्थालीमुख्याग्रतस्थं सर्वं सोममस्य पात्रेऽवनयति ॥ इंद्राग्नीभ्यां त्वेति ॥ ततऽस्य स्थालीं तूष्णीं खरे
निधाय ग्रहस्य परिमार्ज्जनं ॥ प्रदक्षिणेन रथा हृत्वा । तूष्णींसादनं अच्छावाकचमसपूर्वकमुन्नेतुः ॥ पूतभृतः सर्वस्य सोमस्य वि
भज्य दशमुचमसेषून्नयनं ॥ अथवा देवेभ्यस्त्वा देवाव्यमित्येव त्रयाणामप्युऽस्य विग्रहाणां ग्रहणामंत्रः ॥ पूर्ववदुपाकरणादिम
च्छावाकः शंसति ॥ पूर्ववत्प्रतिप्रस्थातुः प्रतिगरादि । शस्त्रांते ॐमिति प्रतिगरः ॥ प्रदक्षिणेन रथा हृत्वा ग्रहादानं । चमसानां
चऽस्य शायजसोमानामिति प्रैषः ॥ सर्वेषां प्रति वषट्कारं होमः ॥ इदमिंद्राग्निभ्यामिदमग्नय इति त्यागौ ॥ प्रदक्षिणेन रथा
हृत्वा । ग्रहशेषस्याच्छावाकचमसे आसेकः ॥ अच्छावाकचमसहस्तः सदो गत्वाऽच्छावाकं पृष्ट्वा होमाभिषवनिमित्तं ग्रहशेषं भक्ष
यति ॥ अच्छावाकः प्रतिप्रस्थातारं पृष्ट्वा स्वचमसे ग्रहचमसयोर्वषट्कारनिमित्तं तन्त्रेण भक्षयति ॥ ततोऽच्छावाको होत्रादिच
मसेषु होत्रादीन् पृष्ट्वा वषट्कारनिमित्तं भक्षयति ॥ होत्रादयऽच्छावाकं पृष्ट्वा समाख्यानिमित्तं स्वस्वचमसे निःशेषं भक्षयं
ति ॥ पुनरच्छावाकः स्वचमसे प्रतिप्रस्थातारं पृष्ट्वा समाख्यानिमित्तं भक्षयति सर्वभक्षाश्च मासाः कार्याः ॥ मार्ज्जालीये तेप्रक्षा

अ॰प लनं॥ हविर्द्धानमध्ये उत्तरस्य हविर्द्धानस्यावस्तात्पूर्ववन्निधानं॥ इतित्रयोपस्थविग्रहाः समाप्ताः॥ ॥ततोध्वर्युः स्फ्यमादाय प्रशास्तः प्रब्रु
हीति प्रशास्तारमाह॥ ततः प्रशास्ता सर्पतेति सर्वान् ऋत्विजोनुजानाति। तेच सदसो निष्क्रम्यावश्यकमूत्रपुरीषार्थं चात्वालोत्करावंतरेण वि
दूरदेशं गत्वा॥ आवश्यकं कृत्वा पुनस्तेनैव मार्गेण प्रत्यागच्छंति॥ तथा च छंदोगसूत्रं॥ सवनसंस्थानु प्रशास्त्रोक्ता यथेसमपरद्वारेणनि
ष्क्रम्य पश्चिमेनाग्नीध्रीयं गत्वा बहिर्वेदि मूत्रं कुर्युरिति॥ अतः सवनांतानदन्यस्मिन्काले मूत्रपुरीषे ऋत्विग्भिर्न कार्ये॥ अंतराले॥ यजमानस्य
तु निषेधः प्रागुप्रागुक्त एवहोमपर्यंतं॥ ॥इति प्रातःसवनं समाप्तं॥ ॥चतुर्द्दशी कंडिका॥ ॥इति याज्ञिकदेवकृतायां कात्यायनसू ७४
त्रपद्धतौ नवमोध्यायः॥ ८ ॥अथ माध्यंदिनसवनमुच्यते॥ तत्र पूर्वं आग्नीध्रीयस्य पश्चादुदङ्मुखोपविष्टस्य यजमानस्य लोकवारी
यसाम गानं होमश्च॥ ततः सर्वे ऋत्विजः सयजमानाः प्रातःसवनवद्बहिष्पवमानादिधिष्ण्याभिमंत्रणांतं सर्पणं कुर्वंति॥ सदोभिमर्शनादि वाधि॰
ष्ण्याभिमंत्रणांतं॥ ततोध्वर्युर्यजमानप्रतिप्रस्थातृनेष्टुन्नेतारः प्रातःसवनवद्धविर्द्धानं प्रविशंति॥ तत्र पूर्वं अभिषवोपयोगि वस्तूना
मीषांतरेणाहरंति हिरण्यस्वं स्वं ग्रावाणं चमसं वेद्याः इषांतरेणाहरंति॥ निग्राभ्यासंभरणीदशापवित्राण्यध्वर्युरीषांतरेणाहरति॥ ततोध्वर्योः पाणि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रक्षालनं।हिरण्यबंधनं॥अग्न्यादानं।वाग्यमनं।सोमस्योपरिनिग्राभ्यासेकः।सोमं चतुर्द्धा विभज्य माभेरिति प्रहृत्य तृणं मनसा ध्यायंतः इ
हा १ इहा ३ इत्येवं त्रिमात्रेण प्रतिप्रहारमावृत्तेन मंत्रेण सर्वे निष्पुणंति॥ एवं प्रथमं पर्यायं कृत्वा विरम्य सोमममुत्सृज्य पुनरिहा २ इति द्वि
मात्रेण द्वितीये पर्याये प्रतिप्रहारमभिषुण्वंति॥ एवं द्वितीयं पर्यायं कृत्वा विरम्य सोममुत्सृज्य पुनरिहा इत्येकमात्रेण तृतीयपर्यायं
प्रतिप्रहारमभिषुण्वंति॥ एवं त्रिपर्यायमभिषवं कृत्वा सर्वेषां सोमाप्यायनं। निग्राभ्यावाचनं सरसानं भूत्संभरणाधवनीये वधायावृ
पाहरति॥ एवमेकोभिषवस्त्रिपर्यायउक्तः॥ एवमेव द्वितीयो निग्राभ्यासेवनाद्यापाहरणांतः॥ एवमेव तृतीयोभिषवः॥ तत्र विशे
षः॥ अस्य तृतीयाभिषवस्य मध्यमे पर्याये इह इह इहेति मंत्रेण प्रतिप्रतिहारमभिषवः॥ उत्तमे पर्याये पूर्ववदिहा इत्यनेनैव॥ ततआ
प्यायनं॥ प्रागपावाचनं च॥ अध्वर्यो रद्रिंहोतृचमसे वधाय चतुर्थं॥ प्रागपावाचनं॥ ततः सर्वान् सरसान् सोमान् भूत्संभरणा चवनीये व
धाय तदुदकेन सह निष्पीड्य हुत्वाधिषवणे निदधाति॥ ततउन्नातारो द्रोणकलशद्रोहणमन्त्रीबमुखे घडिभुनिधानं। तदुपरि पवित्रवि
ततनं कुर्वंति॥ अकुर्वंत्सु तेषु स्वयमेवाध्वर्युः करोति॥ ततउन्नेतोदंचनेनाधवनीयात्सोममादाय यजमानहस्ते होतृचमसस्यापुनिग्राभ्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ॰प प्सु आसिंचति॥ यजमानो निग्राभ्याः पवित्रे आसिंचति॥ ततोध्वर्युरस्याद्धारा सोमांस्तं च पृथमान्गृहान्गृह्णाति॥ तत्र पूर्वं प्रातःसवनवदे
व शुक्रग्रहणं। नोदकालंभः परिमार्जनं सादनं। ततः पूर्ववद्देवमंथिनो ग्रहणं नाग्राः स्पर्शः सक्तुभिः श्रयणं सादनं॥ ततस्तिस्रभ्यो धारा
भ्य आग्रयणग्रहणं॥ तत्र एकां यजमानो निग्राभ्याणां धारामासिंचति। द्वितीयामुन्नेता आधवनीयात्पुदंचनेनासिंचति॥ प्रातःसवनगृहीत
माग्रयणं पात्रांतरे कृत्वा पूतिप्रस्थाता आसिंचति सा तृतीया धारा॥ एवं तिस्रो धारा इति कर्काचार्याणां याज्ञिकाश्चाहुः॥ उपांशुपात्रस्थमुपां
शुग्रहशेषं पात्रांतरे कृत्वा नेष्टा आसिंचति सा एका धारा द्वितीया प्रस्नुता संतता धारा॥ तृतीया आग्रयणस्येति जीर्णाः संप्रदायो युक्तः॥ क ७५
ठस्त्रेत्तथा दर्शनात्॥ ततो वाग्विसर्गः। दशापवित्रेणाग्रयणमुपगृह्य हिकारादि परिमार्जनं॥ मध्ये सादनं॥ ततस्तृपात्रेण – मरुत्व
इति मंत्रेण मरुत्वतीयस्य ग्रहणं परिमार्जनं॥ एष ते इति सादनं॥ तत उक्थ्यस्थाल्या मुक्थ्यग्रहणं। उक्थ्यपुत्र र्वा मरुत्वतीयग्रहणं॥
ततो द्रोणपूर्णं द्रोणकलशं संततधारया कृत्वा यजमानो होतृचमसस्थं सर्वं सोममासिंचति॥ पाणिप्रक्षालनं॥ समन्वारब्धानां निष्क्रम
णं॥ विप्रुहोमः॥ कृत्वा वा समन्वारंभः सर्वेषां॥ अध्वर्योस्तत्तया एव वेदेस्तरणदयादानं॥ प्रह्वाणामुद्गामनं। चात्वाले तृणप्रासनं। ततउ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रेण हविर्द्धानं सदसि गमनं ॥ ततो ग्रावस्तुतः स्वस्थाने उपवेशनं । ततो द्वितीयस्य स्तुतस्य तेषां पुरस्तात्प्रक्षेपः ॥ अध्वर्युप्रतिप्रतिप्रस्था
तृयजमानानां प्रत्यङ्मुखानामुपवेशनं ॥ ततः उद्गातृभिः पुरस्तात्र्युपेक्षितेभ्यामेव दर्भतृणाभ्यां कुशमुष्टि वा तृणं विनेव वा सोमः प
वत इति पवमानोपाकरणं ॥ स्तूयमाने उन्नेतुः प्रातःसवने वदेव सोमपावनं प्रथम प्रस्तावसमये सकृदेवासतोमासद्गमयेत्या
दियजमानस्य जपः । स्तोत्रान्ते अध्वर्युः हनिष्ठन्प्रेष्यति । तत्राग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशां ३ अलंकुर्विति अग्नीधं प्रतिप्रे
षः ॥ प्रतिप्रस्थातर्दक्षिणा उपावर्त्तयेति प्रतिप्रस्थातारं प्रतिप्रैषः ॥ सप्रवर्ग्यश्चेत्प्रतिप्रस्थातर्दधिघर्म्मायदध्याहरदक्षिणा उपा
वर्त्तयेति प्रैषे विशेषः ॥ ततः आग्नीध्रस्याग्नीध्रादंगारानादाय होत्रादिधिष्ण्येष्वग्निविहरणं ॥ पश्चात्पां बर्हिस्तरणं प्रा — संस्थं तृणीं
पुरोडाशविभक्तीकरणादिकपालोद्वासनान्तं ॥ सप्रवर्ग्ये दधिघर्म्मपूर्वकं प्राणदानं ॥ इंडं गच्छेति दधिघर्मस्य । ततोऽग्निं गच्छेति ॥ प्रति
प्रस्थाता सदसो ग्रे दधिघर्मं ता नयति ॥ केचिद्दधिघर्मस्याध्वर्योरेव प्राणदानमिच्छन्ति । ततः उत्तरवेदिमुपरोणासादनं । आलंभः ततः
सदसः पुरस्तादानीय शाखापवित्रसहितायामग्निहोत्रहवण्यां यावती द्यावापृथिवी इति मंत्रेण स्थाल्यो तो निनयति ॥ निनयनं कुर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

त्रेव होतर्वदस्व पत्नेवा यमिति होतारं प्रत्याह ॥ ततो होतुर्वाग्यंतिअध्वर्युः हविष्कृत्यासन्न हविरित्यभिवदति। ततउन्नेता हविर्धानं प्र
ज्ञति देशं गत्वाश्रावयिषधर्मस्य पजेति होतारं प्रेष्यति वषट्कारानुवषट्कारयोर्जुहोति इदमिंद्राय इदमग्नय इति त्यागो ॥ ततोग्निहोत्र
हवणीस्थं शेषं यजमानसहिता धर्मर्त्विजः तदुपहवपूर्वकमपिस्वदिति मंत्रेण क्रमेण भक्षयंति ॥ घ्राणभक्षं वा कुर्वंति दीक्षि
तिव्यतिरिक्ता ॥ ततश्चात्वाले सर्वेपि मार्जनं कुर्युः सुमित्रिया न इति ॥ ततोध्वर्युः पशुपुरोडाशप्रचारः । तत्र पशुपुरोडाशस्या
सादनं ॥ आलंभः स्रुवाघारादाययजप्रैषावाजभागो पशुपुरोडाशस्यागेअवद्यतोनुवाचनं ॥ अग्नये पुरोडाशस्यानुब्रूहीति ॥ उप ७६
भृतिवत्स्विष्टकृद्द्विरवदानं ॥ अग्नये पुरोडाशं प्रेष्येति प्रैषः ॥ इदमग्नये ॥ निर्गुणः स्विष्टकृद्यागः । इदमग्नये ॥ नात्रतत्वराभक्ष
णं ॥ प्राशित्रेडावदुवत्रवुसयजमानभागचतुर्द्धाकरणंनिभवति ॥ अत्र यजमानस्यापीडाभक्षः ॥ मैत्रावरुणस्य च ॥ एकेनह
ष्टिकपवित्रेणमार्जनं ॥ नपवित्रपत्निः भागसमर्पणं ॥ ततः सवनीयानामासादनं । आलंभः स्रुचोग्रहीत्वा पुनर्यजप्रैषावा
ज्यभागौ ॥ ततः सवनीयानां यागः ॥ जुह्वामुपभृति चोपस्तारः ॥ माध्यंदिनस्य सवनस्येंद्राय पुरोडाशानामनुब्रूहीत्यनुवाचनं ॥

अघन्वा अवदीयमाने षुवा॥ अवदायवा॥ चतुर्णां द्विर्द्विरवदानं॥ अभिघारः स्रुताभ्यंगः॥ नुपभृति स्विष्टकृद्‌र्थं द्विरवदानं॥ द्विरभि
घारः॥ आध्वर्यमाध्यंदिनस्य सवनस्येडा यष्टपुरोडाशान्प्रस्थितान्प्रेष्येति प्रैषः। इदमिंद्राय हरिवते पृषद्‌एवते सरस्वतीवत इ
ति त्यागः॥ इदमिंद्रायेति वा॥ ततः समानीयनिर्गुणस्विष्टकृद्यागः। इदमग्नये प्राशित्रावदानं। ब्रह्मणे समर्पणं॥ अपउप
स्थापेडावदानं। षडवत्तं ब्रह्मभागयजमानभागानां च सदो गत्वा इडा पाहोतृ(षि)प्वेति धानं॥ १ ॥ दशमस्य प्रथमा कंडिका॥
॥ ॥ पाणिप्रक्षालनं॥ उन्नीयमाने सोमेभ्योनुब्रूहीति मैत्रावरुणं प्रति प्रैषः। ततउन्नेता होत्रादिदश चमसान्पर्यायेण वेदिनिधा
यद्रोणकलशादुपस्तृणाति॥ पूतभृतो मध्ये उन्नयति॥ पुनः भक्तादुपर्यभिघारयति॥ ततो ध्वर्यु प्रतिप्रस्थातारौ॥ प्रातः
सवनवदेव प्रोक्षिताप्रोक्षितशकलादानादि भक्ष्यमंथिशुक्रावकुरुतः॥ ॥ तत्राश्विनस्येति जपांते आध्वर्यमाध्यंदिनस्य सव
नस्य निष्केवल्यस्य भागस्य शुक्रवतो मंथीवत इंद्रायसोमान्प्रस्थितान्प्रेष्येति प्रैषविशेषः॥ मंथीवत इत्यस्य स्थाने मधुश्चुत इति
वा प्रयोगः॥ एवं मध्वर्योः सप्रथमेति होमः। तमनु प्रतिप्रस्थाता। तमनु चमसाध्वर्यो ध्ववः॥ इदमिंद्रायेति त्यागः। ततोनुवष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ.प ट्कारेपि होमः॥ होत्रादिचतुर्णां चमसानामनुवषट्कारहोमः। नप्तृणां स्वादीनां बर्हिषां॥ इदमग्नये॥ तत्रैव पूर्वेनु होतुश्चमस इति प्रै
षः। आगत्य प्रतिप्रस्थाता तु शुक्रपात्रे मंथिशेषावनयनं॥ अध्वर्योः शुक्रपात्रस्योभयशेषस्य होतृचमसे वनयनं॥ ततश्च
तुर्णां चमसानां प्रस्थापनं। मैत्रावरुणचमसादीनां बर्हिषां चमसाध्वर्यूणामेव द्रोणकलशादभ्युन्नयनं। ततो ध्वर्युमैत्रावरु
णचमसमादाय प्रशास्तर्यजेत्युक्त्वा वषट्कारानुवषट्कारेण जुहोति॥ सर्वहोमेषु शेषं परिशेषयति॥ इदमिंद्रायेति॥ इदम
ग्नय इति चमसयागानां त्यागः॥ चमसः प्रस्थापनं एवं सर्वेषु ज्ञेयं। ब्रह्मन्यज पोतर्यज। नेष्टर्यज। अच्छावाकयज॥ अग्नीध्रजे ७८
ति विशेषः॥ मैत्रावरुणचमसहोमानंतरमग्नीध्रचमसहोमानंतरं वाऽपविश्य तत्पर्वं त्विति जपः॥ अथाऽग्नीदिति ब्रुवतो होतु
रग्नेऽपवेशनं॥ ततो होत्रे इडासमर्पणादिमध्ये दक्षिणेति जपांतं॥ चतुर्थाकरणमाव। उप हूते द्यावापृथिवी इति पठ्यमाने षडवत्त
समर्पणं॥ होतुरवांतरेडाभक्षः॥ ततो यजमानस्य प्रार्थनासवनस्य छंदोगोक्ता॥ ततो होतृचमसे प्रातःसवनदेवाध्वर्यु प्रति
प्रस्थातोः शुक्रामंथिशेषभक्षः। ततो ध्वर्युपृष्टो होतुः शुक्रामंथिचमसवषट्कारनिमित्तलौत्रेण॥ ततो ब्रह्माद्यष्टचमसेषु प्रना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्विष्टावषट्कारनिमित्तः॥ पुनरभ्युन्नीतेषु होतुः पश्चादध्वर्युर्वषट्कृत्वा॥ ततो होतुः स्वचमसे समाख्यानिमित्ते॥ भक्षोध्वर्युप्रति प्र
स्थानारोपष्ठा॥ एवं प्रस्थितयागनिमित्तोभक्षः समाप्तः॥ ॥अथ पुनरभ्युन्नीतेषु पूर्वहोतृचमसे पष्ठा अध्वर्योर्भक्ष॥ ततः पु
रोडाशादीनां होत्रध्वर्युर्वषट्कृत्वा वषट्कारसमाख्या निमित्तस्तेनैव भक्षः पृथग्वा॥ सर्वे चमसा असर्कभक्षाः कार्याः॥ यथास्वं
चमसे आप्यायनं॥ दक्षिणहविर्धानाक्षस्य पश्चाद्भूमौ दशानाम पिनिधानं॥ ततः आग्नीध्रे पुरोडाशसहितानां ब्रह्मादीनामिडा
भक्षणं॥ यजमानस्य हविःशेषभक्षणं तेनैव भक्षः॥ ततः सम्यस्य मार्जनं। नयवित्रप्रतिपत्तिः। भागपरिहारः। ततः पिष्ट
लेपाहुतिः। पुरोडाशविमोकः एष भागः। सदनीयस्यावेक्षणं। तत्प्राशनं च। पश्चुपुरोडाशभागप्राशनं त्वत्रूर्ध्वं ध्यांते मय
स्यां तेवा भविष्यति। तावत्सर्वेतं यत्नेन रक्षणं कार्यं॥ ॥अथ दक्षिणादानं॥ तत्र शालायां गत्वा ब्रह्मयजमानौ शालाद्वा
र्ये दक्षिणेनोपविशतः॥ ततोध्वर्युराज्यस्थाल्याश्चतुर्गृहीतं प्रुवरण्यां गृहीत्वा क्रतुदक्षिणात्वेनदातुमुपक्लृप्ते वस्त्रे
तथाविधमेवहिरण्यं बध्वा चतुर्गृहीतमध्ये कृत्वा वधायशालाद्वार्ये समित्सर्वं कं रुद्रुत्समितिमंत्रेण चतुर्गृहीतमाज्यं जु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

होति ॥ इदं सूर्याय ॥ पुनश्चतुर्गृहीतं गृहीत्वा तद्देवचिन्हं देवानामिति द्वितीयामाहुतिं जुहोति ॥ इदं सूर्याय ॥ ततः सर्वे आग्नीध्रीयं गच्छन्ति ॥ तत्राध्वर्युः
सकृद्गृहीतं गृहीत्वा वासः प्रवद्धः हिरण्यमवधाय अग्ने नयेति ममित्यर्थकमाग्नीध्रीये जुहोति ॥ इदमग्नये ॥ एवमेवायन्न इति द्वितीयाहु
तिहोमः ॥ इदमग्नये इत्येतावानेव त्यागः ॥ चतुर्थ्यपि होमेष्वासः प्रवद्धं हिरण्यं हुत्वा मवधायेत्येतद्भवतीति हरिस्वामिनः ॥ ततो यज
मानस्तद्धिरण्यमादाय शालायाः पुरस्तान्निष्क्रम्य वेदेर्दक्षिणतो बहिर्वेदि स्थिता दक्षिणा अभिमन्त्रयते । रूपेण वो रूपमभ्यागामिति मं
त्रेण ॥ ततो गवां शालातस्य शालासद्दसो रन्तरालेन यतनं ॥ मन्थोदनानि लमाषाणां च ॥ उत्तरेण सदो नीत्वा दक्षिणेनाग्नीध्रं वनीत्वा वा त्वा लो
त्वा एवं तरेण चनीत्वा आग्नीध्रीयस्याग्रे स्थापनं ॥ अस्मिन्नवसरे बुबुल्लापाप्रैषो वा ॥ यजमानस्त्वाग्नीध्रपर्यन्तमेव दक्षिणा अनुगच्छ
ति ॥ इतः प्रभृतिमहत्वतीयस्यानुवाचनान्ताक् सर्वं यजमाने कर्म ॥ ततो विस्त्वः पशुप्रयमिति सदः प्रतिगच्छति ॥ यत्र स्वसदस्यै दिति
सदसि स्थिता स्तुतृषा स्त्रेक्षते ॥ ततो ब्राह्मणमध्येत्याग्नीध्रं प्रतिगच्छेत् ॥ आग्नीध्रे उपविश्य दक्षिणा संकल्पं करोति ॥ तत्र अस्मात्ति ष्टोम
संस्थस्य ज्योतिष्टोमस्य सम्बद्धस्य हिरण्यं शतं गाः वासोश्ववं दक्षिणाः ब्रुह्मादिभिऋत्विग्भ्यो यथाशास्त्रविभागेनाहं संप्रददे ॥ इति संक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्यन्ततोस्मद्गातेति पठित्वा। गोद्दस्तोहिरण्यादिदक्षिणाश्चतुष्टयविभागस्य समर्पणं कुर्यात्॥ अग्नौ दक्षिणानां तेयो विभागः स प्रति
गृह्णतां। मंथौदनतिलमाषाश्च॥ अग्नीध्राग्नये त्वेति हिरण्यप्रतिगृह्णाति हृद्रायत्वेति गाः। बृहस्पतये त्वेति वस्त्रं। यमाय त्वे त्यश्वं॥
मंथौदनतिलमाषाणां चकोदादिति प्रतिगृह्णंत्र्चः॥ सर्वेषामृत्विजामेतदेव विकल्पेन प्रतिगृह्णंत्राः॥ विकल्पे ननु स्तीमे व प्रति
गृह्णां सर्वेषां। पत्नीश्च मयापि दत्ते। स्येवं यजमानदानानंतरं सहैवानुमतिं करोति। मंथौदनतिलमाषाणां च दक्षिणात्वेन दानं॥ पुरुषा
र्थत्वेनेति मतद्वयं॥ तत्र पुरुषार्थत्वपक्षे दानप्रकारउक्तः॥ दक्षिणात्वेन दानपक्षे॥ अभ्योतं संकल्पमथौदनतिलमाषाश्च दक्षिणा
बुद्धादिभ्य इति विशेषः॥ तदाच दानकाले मथौदनतिलमाषाश्चेति पृथक्नवक्तव्यं॥ दक्षिणानाम ध्येनेनव यो विभाग इत्येतावानें
वसिद्धः। हरित्वामिमतेनु समुदितसंकल्पो न भवति॥ किंतु प्रत्येकमेव यथाविभागं संकल्पः॥ शाखांतरीयदक्षिणादानं च॥ गौश्चाश्व
श्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्चेति॥ तद्यथा अमुकयज्ञसमृध्यर्थं हिरण्यविभागं त्रिस्रो
गाः वासो श्वमंथौदनतिलमाषाश्चाश्वतरादि विभागं चाग्नीत्रुभ्यमहं संप्रददइति॥ एवं द्वादशगाः षट्गाः॥ चतस्रो गाः तिस्रो गाः द्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त्रिवृयो गोविशेष॥ अग्नीधे दानानंतरं॥ यजमानो ब्रह्मणमग्रेत्यनेन मंत्रेण सदसः पुरस्तादुपविष्टस्याग्नेयस्य समीपे आगत्योपवि
श्यक आत्रेय इति षट्कृत्व उच्चार्य अहाले यमित्याद्यगोपवनमित्यंतं सकृत्पठित्वा दक्षिणासंबंधि हिरण्यव्यतिरिक्तं हिरण्यम
स्मद्रातारित्यनेन मंत्रेण त्रेयाय दद्यात्॥ आत्रेयहिरण्यं तुभ्यमहं संप्रददइति॥ ततः सदसि गत्वा ब्रह्मणः समीपे उपविश्य समु
दित संकल्पपक्षे ब्रह्मन् दक्षिणानां नेयो विभागः स प्रतिगृह्यतां इति॥ प्रत्येकं विभागसंकल्पपक्षे तु अस्य यज्ञस्य समृद्ध्य
र्थं हिरण्यपरिविभागं चादशगाः वासो श्वमंथौदनतिलमखोश्व श्वन रगर्दभाजविद्वी हि यवतिलमाषविभागं च दक्षिणाः ब्रह्मन्
तुभ्यमहं संप्रददे॥ मयापि दत्ता इति पत्नीवक्ति॥ एवं सर्वत्रोह्य॥ ततउद्गात्रे द्वादशगाः॥ अस्मद्रातारित्ययं मंत्र, सर्वेभ्य ऋत्विग्भ्यो दा ७२
नेज्ञेयः॥ हिरण्यमात्रदाने॥ बहुवचनांतत्वान्मंत्रलिंगाच्च॥ शाखांतरे पि दक्षिणादानमात्रे विहितत्वाच्च॥ ततो होत्रे द्वादशगाः॥ ततो ह
विर्धाने गत्वा तत्रोपविष्टाभ्यां अध्वर्यु प्रतिप्रस्थातृभ्यां दद्यात्॥ तत्र समुदितसंकल्पपक्षे॥ अध्वर्यू दक्षिणानां वां योविभागस्तौ प्रतिगृ
ह्येतां॥ प्रत्येकपक्षे अध्वर्यवे द्वादशगाः प्रतिप्रस्थात्रे षट्गाः इति॥ ततः पुनः सदसि प्रशास्त्रे दानं॥ षट्गाः॥ ततोमैत्रावरुणाय षट्गाः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो ब्राह्मणाछंसिने षष्ठाः। ततः पोत्रे चतस्रो गाः। ततो नेष्ट्रे चतस्रो गाः। ततो ऽछावाकाय चतस्रो गाः। ततऽग्नीध्रे तिस्रो गाः। ततो या
वस्तुते तिस्रो गाः। ततः सुब्रह्मण्यायै तिस्रो गाः। ततः प्रासर्पकोपगातृचमसाध्वर्युभ्यो न्येभ्यो पि देवयजनं ह्यागतेभ्यो दक्षिणादस्यऽ
व्यदानं॥ ततः सर्वेभ्यो दानानंतरं प्रतिस्रो गाः। हिरण्यादि दक्षिणादानं चोक्तेभ्यो पि भवति॥ तत्र हिरण्यस्य परिमाणं हिरण्यपरिमान
मेकत्रापीत्युक्तत्वात्कृतमानं रक्तिकाज्ञानमित्यर्थः॥ तस्य गो विभागवद्विभागः॥ अग्रेभ्यो द्वादश रक्तिकाः। द्वितीयेभ्यः षट्षट्॥ तृती
येभ्यश्चतस्रश्चतस्रः॥ तिस्रस्तिस्र इतरेभ्य इति॥ वस्त्राश्वादिकस्यापि मूल्यं कृत्वा तत्र धा विभज्य वा द्वादश द्वादश भागा नाद्येभ्यष
ट्षट् द्वितीयेभ्य इत्यादि प्रकारेण विभागः समुदितसंकल्पपक्षेनुसृगमं॥ उज्जातर्दक्षिणानां ते योहोतर्दक्षिणानां ते योह विद्धांतं ग
त्वा अध्वर्यदक्षिणानां वां यो विभागो तौ प्रतिगृह्णीतां॥ पुनः सदस्यागस्त्य प्रस्तोतर्दक्षिणानां ते॥ मैत्रावरुण दक्षिणानां ते॥ ब्राह्मणा
छंसिन् दक्षिणानां ते। पोतर्दक्षि०। नेष्ट द०। अछावाकदक्षि०। नुन्नेतर्द०। ग्रावस्तुद०। सुब्रह्मण्यद०। सुब्रह्मण्ये इति वा। ततः अ
स्यपतस्य समक्ष अर्थं यथा संपन्नं हिरण्यं उपगातृभ्यः प्रासर्पकेभ्यश्चमसाध्वर्युभ्यो न्येभ्यो पि देवयजनमागतेभ्यो ब्राह्मणेभ्यो हं सं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प प्रददे॥ यो विभाग इत्यादि॥ ततः प्रतिहर्त्रे दक्षिणां नामिति॥ दक्षिणाग्रहणार्थं देवयजमानभागतानां मध्ये काणवकरूपपगोत्रे
ण्योऽस्मभ्यं देहीत्येवं प्रार्थयमानेभ्यः किमपि देयं। मुख्ये दक्षिणालाभे प्रतिनिधित्वेनापि रजतं न देयं॥ २ ॥ द्वितीया कंडिका॥
॥ ॥ प्रतिहर्त्रे दानानंतरमेवाध्वर्युर्हविर्धानं प्रविश्य शुक्रपात्रं गृहीत मरुत्वतीयं गृहमादायेंद्राय मरुत्वतेनुब्रूहीति प्र
शास्तारं प्रेष्यति॥ ततआश्राव्येंद्राय मरुत्वते प्रेष्येत्युक्त्वा वषट्कारानुवषट्कारयोर्जुहोति॥ इदमिंद्राय मरुत्वते। इदम
न्तय इति त्यागौ। नात्र चमसानां कंपनं॥ अशास्त्रग्रहत्वात्। नापि भक्षणं। ततोऽध्वर्युः पात्रं प्रतिप्रस्थातृहस्ते समर्प्य हविर्धा ८०
नं प्रविश्य रिक्ते शुक्रपात्रे द्रोणकलशान्नभृतो वा परिप्लवया मरुत्वंतमिति महामरुत्वतीयं गृहीत्वा परिमृज्य प्रदक्षि
णेन रथावृत्तीकृत्वा एष ते योनिरिति खरे आग्रयणस्य पुरस्तात्सादयति॥ ततः पूर्वद्वारेण निष्क्रम्य प्रतिप्रस्थातृहस्ता
द्गृह पात्रमादाय सदसि होतारं पृष्ट्वा अध्वर्युर्भक्षयति॥ होता वाऽध्वर्युं पृष्ट्वा भक्षयति॥ ततः पात्रं सदसो निष्क्रम्य मार्जाली
ये प्रक्षाल्य खरे स्थापयति स्वयमेव॥ ततो होतुः पुरस्तात्प्राङ्मुख उपविशति॥ ततो होत्राऽध्वर्यो शोंसावेत्याहूतः॥ पर्या

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृत्य प्रतिगृणाति ॥ प्रतिप्रस्थाता च हविर्द्धानं गत्वा रिक्तेन ग्रुपात्रेण द्रोणकलशात् पूतभृतो वा महतां त्योजस सृतिमं चेण
तृतीयं कुंठमहत्वतीयं गृहीत्वा परिमृज्यैव तेयो निरिति खरे सादयति ॥ हरिस्वामिमते स्य दादनमंत्रस्य नाम्नानाता दनाभावः । ते नहोमका
ल एव गृहीत्वा असादयित्वैव होतव्यः ॥ अत्र शस्त्रे जनिष्ठा उग्र इत्येतस्यां मध्ये मदामो देवेति तत्कृतस्तुतिगरः । अवसाने प्रणवे । वा विकृतं वपि
एतस्यां ऋचः स्थाने या अस्या शस्यते तस्यामपि सकृत्सप्तदामोदैवेति प्रतिगरो भवति । शस्त्रांते ध्वर्युः रोमिति प्रतिगीर्याथ त्वा स प्रदक्षि
णेन तथा हृत्वी कृत्वा सगृहीतं महत्वतीयमादत्ते ॥ प्रतिप्रस्थातापि स्व गृहीतमादत्ते । चमसाध्वर्यवो हविर्द्धानमध्यस्था एव चम
सान् हस्ते धारयंति । निष्क्रम्याश्राव्यो स्थ शाय जसो मस्येति प्रैषः ॥ वषट्कारद्वये होमद्वयमभयोः । इदमिंद्राय मरुत्वते ॥ इदमग्नय
इति त्यागो । चमसाध्वर्यवोपि दिश्चमसानां प्राङ्पनेन कंपनं कुर्वंति । सदसि गत्वा होत्रध्वर्यो परस्परमुपहूय भक्षणं । प्रतिप्र
स्थातान्वनुपहूयैवैकाकी भक्षयतीति संप्रदायः ॥ तस्यापि होत्रा सह भक्षणं युक्तं । अनुपहूतचमसानामिव ॥ ततः पात्रयोर्नि
हृत्य प्रक्षाल्य खरे स्थापनं ॥ चमसिनश्चानुपहूयैव स्वं स्वं चमसं भक्षयित्वा सशेषेणाप्यायनं कुर्युः । ततः श्चमसानां हविर्धान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प मध्येनिधानं॥ ततोध्वर्युः शुक्रपात्रे द्रोणकलशात्परिप्लवया सोममादायमाहेंद्रंगृह्णं गृह्णातिमहां॥ २ इंद्रोनववदितियजमानस्यात्रविकल्पेनाध्व
र्योर्गृह्णतोन्वारंभः॥ ततः परिमार्जनं॥ पुरदक्षिणोत्तरथोहृत्वी एवंतेयोनिरिति शुक्रस्थाने सादनं॥ ततो द्रोणकलशस्य पूतभृत्यासेकः॥ ततस्त
णाम्यंमाहेंद्रं ग्रहमुपस्थस्थपुरस्तात्तूपेकृत्वे पुस्तोत्रेनतो समर्पयन् पत्रष्टमंत्रं स्तोत्रमुपाकरोतिउपावर्तध्वमिति॥ ततः प्रैष्य अभिषोतारोति
षुणतेति प्रतिप्रस्थाता नेष्टुनेतृन्ततीयसवनाभिषवार्थं॥ ततउलूखलानुवादयतेत्यग्नीद्रूलयजमानान्सवनीयनिर्वापार्थं प्रैष्यति॥
अग्निदाग्निरंविनयसौम्यस्यविन्तादित्यग्नीध्रुवेव्यति॥ ततः प्रतिप्रस्थाताग्रयोधिषवणं परितउपविशंति॥ उन्नेतः प्रतिप्रस्थाता॥ इत ८१
रैदक्षिणतः॥ तत्रहिरण्यप्रावाणामीषांतरेणाहरणं॥ ग्रावाणां पाणिप्रक्षालनं॥ हिरण्यबंधनं ग्रावाणामयादानं। वाग्यमनं। कुंडलिका
विसृस्यजीवेणमिश्रितांकृत्वामाभेरितिप्रहरणं॥ मन्त्वाप्रहाराः। उत्सृज्यपुनरभिषवः। पुनरुत्सृज्य। पुनरभिषवः॥ आप्यायनं॥
एवंत्रिपर्यायएकोभिषवः॥ एवमेवापरंवारद्वयंकुर्युः॥ आधवनीयेसर्वमृजीषमवदधाति। प्रतिप्रस्थाता। अग्नीधः पय
स्यावर्जितान्सवनीयान्निर्वपति॥ सौम्यश्चरुर्वात्दराश्वैककपालोधिके॥ तत्रचतुरासनं॥ पुणीताप्रणयनं॥ पात्रासादनं भू

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाग्निहोत्रहवणि। कपालानि द्वादश। कर्परं। वरुणस्यालेका। कृष्णाजिनं। उलूखलमुसलं॥ पात्रीधान्यं॥ संयवनार्थमुदकं। दधि च। भूता
वदानं। प्रेक्षणं च॥ पुरोडाशपात्रेका॥ पंचबिलाचेत्याप्राद्य। स्फ्यो पहित पात्रीकरणादित्यग्रहणांसादनांतं॥ तत्र इंद्राय जुष्टं इंद्राय हरिव
ते जुष्टं। इंद्राय पूषण्वते जुष्टं। सोम। यजुष्टं। वरुणाय जुष्टमिति विशेष॥ हविर्ग्रहणामपः कृत्वा पूर्वाभ्यामेव पवित्राभ्यामुत्पवनं॥ सव्य
हस्तकरणादि। प्रोक्षणं। इंद्राय त्वा जुष्टं। इंद्राय हरिवते त्वा। इंद्राय पूषण्वते त्वा सोमाय त्वा॥ वरुणाय त्वेति च व्रीहिमयपुरोडाशपक्षे
कणांते विभज्यालंभः॥ इदमिंद्रस्य वरुणस्य च॥ इदं सोमस्य। यवमयपक्षे सौम्यः पथग्धूमतए वविभज्य धानामंथनातां यव
तंडुलानामालंभनं॥ इदमिंद्रस्य हरिवतः। इंद्रस्य पूषण्वतश्चेति॥ पुरोडाशयोः पूर्ववत्॥ इंद्रस्यैकादशकपालानि। वरुणस्यैकं।
तस्मात्तप्तस्वेत्यभ्यूहनं॥ उपसर्जन्यधिश्रयणाद्याप्रांतं सर्वं प्रातः सवनवत्॥ धानावदानमेक्षणापं च बिलापुरोडाशपात्रीसंमार्गः
संमार्जनानामवोक्षरोपासनं॥ तत आग्नीध्रीयस्य पश्चादाशिरं विनयमंथीत्यर्थः॥ तदुक्तं मानवे॥ पश्चादाग्नीध्रस्याशिरं मंथती
ति॥ माहेंद्रस्तोत्रानंतरं होतुः शस्त्रं॥ तत्र पूर्ववत्प्राङुपविश्याह्वनस्याह्वनप्रतिगरः॥ शस्त्रांते ॐ मिति प्रतिगरः। उक्थायप्रदक्षिणेन रथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

हृत्नी।।माहेंद्रमादाय प्रज्ञति देशं गत्वाश्राव्यो त्थ श्रापय न सोमस्येति प्रेष:।प्रतिवषट्कारं होम:।चमसानां पूर्ववत्कंपनं।इदं महेंद्राय ~~अस्मानुपसो~~
इदम न्नय इति त्यागो।प्रदक्षिणा हृत्नी न रथा हृन्न।अध्वर्यु होतृभ्यां माहेंद्रभक्षणं चमसिनश्चानुपहूयैव सर्वभक्षांश्चमसानभक्षयंति·
ततो मार्जालीये चमसानां प्रक्षालनं।उत्तरवेदिमपरेण प्रशास्तृचमसपूर्वकं निधानं।।ततः प्रातः सवनत्र्यवउत्थविग्रहः।।ततअ
ध्वर्युहृत्थ पात्रं सव्यहस्ते कृत्वो त्थ स्थालीं तूलीं स्वस्थाने निदधाति।।परिमार्जनं।।प्रदक्षिणे न रथा हृत्नी।।तूलीसादनं प्रशास्तृ
चमसपूर्वकं सोमोन्नयनं चमसेषु।तृणाभ्यां ग्रहमुपस्तरणं पस्तोत्रे पाकरणं।स्तोत्रान्ते प्रशास्ता शस्त्रं शंसति।।तत्राध्वर्यो: प्रति
गर:।शस्त्रान्ते ग्रहादानं।चमसाध्वर्यूणां चमसादानं।।आश्राव्यो त्थ श्रापय न सोमानामिति प्रेष: प्रतिवषट्कारं ग्रहचमसहोम:
इदमिंद्रायेदमग्नय इति त्यागो प्रदक्षिणेन रथाहृन्नीश्च।।ग्रहशेषस्य प्रशास्तृचमसे आसेक:।पात्रस्य हविर्धानमध्ये निधानं
ग्रहशेषस्याध्वर्यु: प्रशास्तृभ्यां भक्षणं।प्रशास्तृ: सर्वचमसेषु वषट्कारनिमित्तो भक्ष:।चमसिनां स्वचमसे समाख्यानिमित्त:
प्रशास्तुरपि स्वचमसे समाख्यानिमित्तश्च।।सर्वभक्षाश्चमसा: कार्या: तेषां मार्जालीये प्रक्षालनं।।ब्राह्मणाछंसि चमसपूर्व

८२

कं ऽन्तरवेदेः पश्चान्निधानं॥ एवं प्रथमोध्वर्युकर्त्तकऽस्थविग्रहः॥ ॥अथद्वितीयः प्रतिप्रस्थातृकर्त्तकऽच्यते॥ तत्र प्रतिप्र
स्थातोऽप्यपात्रेऽस्यस्यास्यालाअर्द्धसोममिंद्रायत्वेति गृहीत्वास्थालीनिधायपरिमार्ष्टि॥ ततः प्रदक्षिणीहृत्यरित्तरथाच्च॥ तूष्णीं
सादनं। ब्राह्मणाछंसिचमसपूर्वकं पूतभृत्तश्च्चमसोन्नयनं॥ स्तोत्रोपाकरणं। स्तोत्रांते ब्राह्मणाछंसीशंस्त्रशति॥ तत्र प्रतिप्रस्था
तुः प्रतिगरः शस्त्रांते प्रदक्षिणोतरथाहृत्वाग्रहचमसानामासादनं॥ आश्राव्योऽस्थश्रायजसोमानामिति प्रैषः॥ प्रतिवषट्
ट्कारं ग्रहचमसहोमः॥ इदमिंद्रायेदमत्त्वय इति त्यागौ॥ प्रदक्षिणोतरथाहृत्वा। ग्रहशेषस्य ब्राह्मणाछंसिचमसे आ
सेकः॥ तत्र प्रतिप्रस्थातृवषट्कर्त्रोर्भक्षणं॥ सर्वचमसेषु वषट्कर्त्रे वषट्कारनिमित्तोभक्षः॥ स्वचमसे समाख्यानि
मित्तश्च॥ चमसिनांस्वस्वचमसे समाख्यानिमित्तः॥ सर्वभक्षान्त्वमसामार्जालीयेपात्रप्रक्षालनं॥ अच्छावाकचमसपूर्व
कं ऽन्तरवेदेः पश्चान्निधानं॥ इति द्वितीयस्थविग्रहः॥ ॥ततोध्वर्युराधवनीयेवसतीवरीरासिंचति॥ इदं तृतीय
९ सवनमितिमंत्रेण। सर्वेषांमेकधनानांशेषं चानेनैवमंत्रेण धवनीये॥ आसिंचसितिप्रत्येकं मंत्रः॥ ॥अथतृतीय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प ऽथ विगृह्य वऽच्यते ॥ तत्र प्रतिप्रस्थातोऽथ पात्रेऽथ स्थाली तः सर्वं सोमं गृह्णाति ॥ इंद्राय त्वा देवा व्यमिति ॥ परिमार्जनं
प्रदक्षिणो तथा होत्री ॥ तूष्णीं सादनं ऽन्येनाच्छावाक चमस पूर्वकं चमसेषु पूतभृतः सर्वं सोमं विभज्यो न्नयति ॥ तणाम्पां
ग्रहमुपस्थ्यस्य स्तोत्रोपाकरणं ॥ स्तोत्रान्ते च्छावाकः शंसति ॥ तत्र प्रतिप्रस्थातृः प्रतिगरः शस्त्रान्ते प्रदक्षिणे तथा होत्री ग्रह
चमसादनं ॥ आग्नेयो च्छावाक ग्रहोस्तीमानामितिप्रैषः प्रतिचवषट्कारं ग्रहचमसहोमः ॥ इदमिंद्रायेदमग्नयइतित्यागौ ॥
प्रदक्षिणे तथा होत्री ग्रहशेषस्याच्छावाकचमसे आसेकः ॥ तस्मिन्नुपतिप्रतिप्रस्थाच्छावाकयोर्भक्षणं ॥ सर्वचमसे ८३
षच्छावाकस्य वषट्कारनिमित्तो भक्षः ॥ स्वचमसेसमाख्यानिमित्तोभक्षः ॥ सर्वभक्षाः मसकार्याः ॥ तेषां मार्जालीये
प्रक्षालनं ॥ हविर्धानमध्ये निधानं ॥ इति तृतीयऽथ विगृह्यः ॥ ततो ध्वर्युः प्राणस्तः प्रभूहीतिमैत्रावरुणं प्रत्याह ॥ ततः
सर्पतेतिप्रशास्त्रानुज्ञाताः सर्वे ऋत्विजः सदसो निष्क्रम्य चात्वालोत्कराव्यंतरेण गत्वा बहिर्वेदि मूत्रपुरीषादि कृत्वा प्रत्याग
च्छंति ॥ ॥ इति माध्यंदिनं सवनं ॥ ३ ॥ तृतीया कण्डिका ॥ ॥ अथ तृतीयसवनं ॥ तत्र पूर्ववदध्वर्युरेहि यजमानेतिप

जमानप्रस्माह॥ ततोऽध्वर्युर्यजमानप्रतिप्रस्थात्रग्नीदुन्नेतारः पूर्वद्वारेण हविर्द्धानं प्रविशन्ति॥ पत्नी चापरेण द्वारेण हविर्द्धा
नं प्रविशति॥ ततउभयोर्हविर्द्धानद्वारयोरपिधानं॥ ततोऽध्वर्युरादित्यस्थालीमादित्यपात्रं चादाय पूतभृत उपरि सम्प्रह
स्तेनादित्यपात्रं गृहीत्वा दक्षिणहस्तेनादित्यस्थाल्याः संस्रवतो मादित्यपात्रेणि नयति। कदाचन स्तरीरसीति॥ तत आदित्य
पात्रमपगृह्य धारान्तो विच्छिद्य पुनर्गृह्णाति॥ कदाचन प्रयुच्छसीति॥ ततस्थाली प्रतिप्रस्थात्रे समर्थ्यादित्यग्रहस्य परिहि
दर्भं तरुणं कृत्वा यज्ञो देवानामिति मन्त्रेणादित्यग्रहमुलूषलमध्येवापश्रिमंतेवा लौकिकेन दध्ना श्रीणाति॥ ततउपांशुस
वनेन सोमं दधिनीपरस्परं मिश्रयति। विवस्वन्नादित्येति मन्त्रेण॥ ततउन्नेत्रे उपांशुसवनं समर्पयन्नात्सजग्रात्॥ इतितं
प्रस्माह॥ ततउन्नेतापंपिग्रावाणौ यत्नेनाधवनीयमध्ये अवधाय ततः पुनर्निष्क्रास्य शाधिषवणचर्मणि निदधाति॥ अथवा
आधवनीयायात्रमहे सोमपुन्नीयतस्मिन् ग्रावाणोनिधायाधिषवणेनिदधाति॥ ततो गृहस्य परिमार्जनं॥ नसादनं असन्नो
ह्यन इति मनुवचनात्॥ पाणिनाआदित्यस्थाल्या वाग्रहस्यापिधानं। द्वारयोरुद्घाटनं यजमानाध्वर्युमन्वारभते॥ हविर्द्धा

नाग्निः क्रमणप्रभृत्योः। आदित्येभ्योनुब्रूहीत्यनुवाचनं॥ आथर्वी आदित्येभ्योनुब्रूहि प्रियेभ्यः प्रियधामभ्यः ध्यक्षेभ्यः इति प्रैषः॥
आश्राव्यादित्येभ्यः प्रेष्येति प्रैषः॥ अत्र वा प्रियेभ्यः प्रियधामभ्य इति वक्तव्यं। नानुवाचने। वषट्कृते सशेषस्य होमः। नानुवषट्
कारः। इदमादित्येभ्यः। कृत्वा ग्रहशेषस्थालीशेषौ प्रतिप्रस्थात्रे समर्पयति॥ तत्र तृतीयसवनादौ पत्नसर्पणं तत्कर्त्तव्यं॥
ततोपि पूर्व आहवनीयपश्चादुत्तरेणपि मुखेउपविष्टो यजमानो लोकद्वारीयं साम गायति जुहोति॥ ततः सयजमाना ऋत्वि
जो धिष्ण्योपस्थानादि वासदोभिमर्शनादारभ्य वासर्पणं कुर्वंति॥ प्रतिप्रस्थातापि कस्य विद्रस्ते शेषौ समर्प्य सर्प(
णं करोति॥ ॥चतुर्थी कंडिका॥ ४ ॥ ततः प्रतिहर्त्ता पूतभृतं पवित्रेण संमार्ष्टि तत उन्नेता उपरि पवित्रं वित(
न्वंति॥ ततो ध्वर्युर्माध्यंदिनसवनग्रहीतमाग्रयणस्थालीस्थं सोमं पात्रांतरे कृत्वा तं स्वयमेवासिंचति सर्वेन॥
पुरस्कंदयन्नध्वर्युराग्रयणस्येति श्रुतेः॥ प्रतिप्रस्थाता चाध्वर्युसमर्पितावादित्यस्थाल्योः शेषौ पृथक् पूतभृत्यासिंचति। उ
न्नेता चाधवनीयादुदंचनेन पुनश्च ससोममासिंचति॥ एवं चतसृभ्यो धाराभ्यो ध्वर्युर्ये देवास इत्याग्रयणस्थालीं दक्षि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षिणा हस्त धृतायामाग्रयणं गृह्णाति ॥ ततो दशापवित्रेणाग्रयणस्थालीमपगृह्य हिंकारादि। प्रतिप्रस्थात्रादीनां वाग्विसर्गः परि
मार्जनं ॥ आग्रयणस्य सादनं ततोध्वर्युराशीर्मंत्रं जपित्वा नेनपतम्भलाशिरमाभिषिंचति ॥ ततः पत्नीनदस्येनूरद्रयेन शाखिरं पूतभृ
तमवेक्षते मध्ये ॥ ततः पाणिप्रक्षालनं समन्वारब्धानामनिष्क्रमणं । यत्तद्रति विप्रुट्ठोमः ॥ कृत्वा वा समन्वारंभः । अध्वर्योर्वेदित
ण द्वयादानं उत्थितानां त्यपर्णां ॥ गृहीत तृणयोरेकस्य चात्वाले प्रक्षेपादेवानामिति ॥ ततः सदोगमनं ॥ उद्गातृणां यथास्थानं
मुपवेशनं ॥ उपविष्टेषु विसर्गः । उद्गातृणां पुरस्तात्स्थलीं द्वितीय तृण प्रक्षेपः ॥ ततः पुरस्ताज्जपे कृते प्रस्तोत्रे द्वे दर्भतृणे वा
कुशामुष्टिं वा प्रयच्छन् तृणे वा सोमः पवत इति पवमानमुपाकरोति ॥ अध्वर्युप्रतिप्रस्थातृयजमान उद्गातृणां प्रपुरस्तात्सुत्स
ङ् मुखा उपविशन्ति ॥ ब्रह्मापि प्रशास्तुर्दक्षिणत उपविशन्ति ॥ प्रथम प्रस्तावकाले यजमानो सतोमास समयेत्यादियजूंषि
शनपथस्वरेण सकृज्जपति । स्तूयमाने पवमाने उन्नेता पूतभृतो मुखे पवित्रमंतर्द्धाय वा धवनीयं सोममाभिषिंचति ॥ स्रजीबंव
वसतीवरीणां कुंभे प्रक्षिपति स्तोत्रांते ध्वर्युर्हत्निष्ठन प्रेष्यति। अग्नीदग्नीन्विहर बर्हिस्तृणीहि पुरोडाशां २ अलंकुरु हस्य गतीं द्यं ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ॰प प्रतिप्रस्थातः पशौ संवदस्वेति प्रस्थारं। ततोग्नीदाग्नीध्रीयहोतृधिष्ण्यादिषु सर्वेष्वङ्गारान् विहरति॥ ततोन्तः पादात्यादारभ्योत्तरवेदिं या
वत्पश्चात्पाडुपरिवर्हिल्लक्षींल्लणाति॥ ततआज्यस्थालीं वेदं स्रुचं चादाय शालायां गत्वा पुरोडाशाभिमर्शीकरणादि। प्राणदानं॥ कपालो
द्वासनं कर्परोद्वासनं च करोति॥ इंद्रं गच्छ॥ इंद्रं हरिवंतं गच्छ। इंद्रं पूषण्वंतं गच्छ। इंद्रं सरस्वतीवंतं गच्छ॥ वहृण्णं गच्छेति विशेषः प्रति
प्रस्थाता स्वयमादापयत्वा परुद्गिदिति द्वितीयं ३। मित्रनुशासनं करोति॥ ततः शमिता हृदयं शूलाग्नि श्रावयसर्वावदानानामुपर्युखा
मांनिदधाति॥ शूलं वाध्वर्यवे प्रयच्छति॥ अध्वर्युः शूलं मंडपस्योपरि निदधाति॥ न भूमौ नाप्सुदके॥ ततः प्रतिप्रस्थाता जुह्वापृष ८५
दाज्यस्थाल्याः पृषदाज्यस्थाल्याः पृषदाज्यमादाय चात्वालोत्करावंतरेणाति क्रम्य शमितारं प्रत्यागच्छन् — तं हविः शमिता ३ इत्यादि
पृच्छति॥ ततोध्वर्यो रेवहृदयाभिघारणं॥ तद्व्यतिरिक्तमांसान्याज्येन पृषदाज्येन वाऽभिघारयति॥ ततउदग्द्वासनं॥ अग्निं गच्छेति
अंजनं॥ चात्वालोत्करावंतरेणाहरणं॥ दक्षिणतआसादनं। आलंभः जुह्वादिष्वपस्तारः॥ हिरण्यावधानं॥ ततोमनोतापैषः जोहवानीं जुह्वा
मवदानं। ॐ पश्रृतानामुपभृति॥ पुनर्हिरण्यावधानं। उभयत्र सकृदभिघारः। वसाग्रहणं। द्विरभिघारः। ततोवसाशेषस्येडापात्र्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासेकः। कोऽस्यानस्थिमतांचप्राशनं। श्रोणिवर्जं। द्विरभिघारः जाघनीं गुदयोर्निधानं। पक्षेपशुसंमर्शनं॥ अग्नयेछागस्यहवि
षोनुब्रूहीत्युक्त्वा॥ आश्राव्याग्नयेछागस्यहविः प्रस्थितंप्रेष्येत्याह॥ अर्द्धर्चान्तरेप्रतिप्रस्थातुर्वसाहोमः। वषट्कृतेप्रधानावदान
होमः। इदमग्नये॥ ततः प्रदक्षिणावर्तनादि। वनस्पतिस्विष्टकृद्यागोदिग्व्याघारणं॥ स्रुचोः सादनं। नत्रासंचरात्प्रक्षणं॥ प्रा
शित्रसमर्पणं॥ अपऽपस्थस्येणमंतरायूपाग्नीप्रत्याहृत्यसदसिहोत्रेसमर्पयति॥ प्रतिगृह्यपर्वाजनादिमपीदंजपांतं॥ क्रो
मादीनांनियमेनसमर्पणं॥ मैत्रावरुणप्रतिप्रस्थातसहितानांहविर्यत्तत्विंजाभिडाभक्षणं। यजमानस्यचमार्जनं। ततः सव
नीयासादनं। आलंभः स्रुचावाचायपजप्रेषावाज्यभागौ॥ ततोजुह्वामुपभृतिचोपस्तारः। पुरोडाशेडादीनांद्विर्द्विरवदानं। अ
वयतोवाअवदीयमानेषुवाऽवदायवाऽनुवाचनं॥ तृतीयस्यसवनस्येंद्रायपुरोडाशानामनुब्रूहीति॥ उपरिसकृदभिघारः
प्रत्यवदानं। क्षताभ्यंगः उपभृतिस्विष्टकृदवदानं॥ द्विरभिघारः। अतिक्रम्याश्राव्यतृतीयस्यसवनस्येंद्रायपुरोडाशान्प्रति
तान्प्रेतिमैत्रावरुणंप्रतिप्रेषः। वषट्कृतेहोमः। इदमिंद्रायहरिवतेपूषण्वतेसरस्वतिवतइतित्यागः। इदमिंद्रायेतिवा। सवनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ·प

येष्टुतिर्गृह्णः स्विष्टकृद्यागः । इदमग्नये । स्रुवेणोर्निधानं अन्वसंचराभ्युक्षणं ॥ प्राशित्रावदानं ॥ समर्पणं ॥ अपडपस्थ्रूपेडावदानं·
षडवत्तवुल्लयजमानभागानां च ॥ इडायाहोतृ धिहस्तेनिधानं ॥ पाणिप्रक्षालनं ॥ उन्नीयमानेभ्योनुब्रूहीति मैत्रावरुणं प्रति प्रै·
षः ॥ ततउन्नेता दशचमसानुत्तरवेदिमपरेणनिधाय प्रतभृत्तम्भनएवोन्नयनं करोति ॥ भुक्ताभावाद्रुपस्ताराघभावः । ततो
नुवाचनांते अच्छिन्नस्येतियजमानजपः । ततोध्वर्युर्होतृचमसं गृहीत्वातिचमसाध्वर्यवश्चेतरान् चमसान् गृह्णंति ॥ अध्व
र्युराश्राव्यतृतीयस्यसवनस्यऋभुमतो विभुमतोवाजवतो बृहस्पतिमतो विश्वदेव्यावतश्लौबु २ आशीर्वत इंद्राय सो· ८६
मान्प्रस्थितान्प्रेष्येति मैत्रावरुणं प्रेष्यति ॥ वषट्कारानुवषट्कारयोर्जुहोमेवहोमः ॥ चमसाध्वर्यूणां वा । बुह्लोज्रा
तृयजमानचमसानां द्विर्होमः । इतरेषां चमसानां सकृत् । इदमिंद्राय ॥ इदमग्नय इतित्यागो ॥ प्रैतुहोतुश्चमसः इत्यत्र भृत्कसा
भृन्नयच्चमितस्यस्थाने आशीर्वतोभुन्नयध्वमिति प्रैषः ॥ ततोहोत्रादिचमसानां चतुर्णां सदसि नयनं ॥ प्रशास्त्रादिच
मसेष्वाशीर्वतः पूतभृत एवसकाशाच्चमसाध्वर्यवएवोन्नयकुर्वंति ॥ ततोध्वर्योः प्रशास्त्रचमसं गृहीत्वा प्रशास्तर्यज । इति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वषट्कारं होमः। इदमित्रावरुणाभ्यां। इदमग्नये। चमसप्रस्थापनं॥ ब्रह्मचमसं गृहीत्वा ब्रह्मन् यज प्रतिवषट्कारं होमः। इ
दमिंद्राय। इदमग्नये॥ चमसप्रस्थापनं। पोत्रचमसमादाय पोतर्यज। प्रतिवषट्कारं होमः। इदमरुद्भ्यः इदमग्नये। चमस
प्रस्थापनं नेष्टृचमसमादाय ग्नावनेष्टर्यज॥ प्रतिवषट्कारं होमः। इदं त्वष्ट्रे। इदमग्नये। चमसप्रस्थापनं। अच्छावाकच
मसमादाय अच्छावाकयज प्रतिवषट्कारं होमः इदमिंद्राविष्णुभ्यां। इदमग्नये। चमसस्थापनं॥ ततोग्नीध्रचमसमादायाग्ना
ग्नीयज। प्रतिवषट्कारं होमः। इदं त्वष्ट्रे इदमग्नये। चमसप्रस्थापनं॥ मैत्रावरुणचमसहोमानंतरमग्नीध्रचमसहोमानं
तरं वाऽपविष्णुप तपैत्विति जपः॥ ऽसदोगत्वाऽपाङग्नीदिति ब्रुवन् होतुरग्रेण प्रत्यङ् मुखेऽपविशति॥ ततो होतुरिडासम
र्पणं। पर्वांजनं॥ अवांतरेडावदानं। इडोपहवः। षडवत्तसमर्पणं चतुर्धाकरणाभावः मधीदमिति जपः। होतुरेवांतरे
डाप्राशनं॥ यजमानस्य सवनप्रार्थना॥ ततः प्रस्थितयागसंबंधिचमसानां भक्षः॥ तत्र होतृचमसे होत्रध्वर्यो भक्षिः॥ हो
तुः सर्वचमसेषु वषट्कारनिमित्तो भक्षश्च मासिनः पश्चात्॥ पुनरभ्युन्नीतेषु ध्वर्युश्च पश्चात्॥ ब्रह्मादीनां स्वस्वचमसेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प होतारं पृष्ट्वा समाख्यानिमित्तो भक्षः॥ प्रशास्त्रादीनां होतारमध्वर्युं च पृष्ट्वेति विशेषः। होतुश्च स्वचमसे समाख्यानिमित्तो भक्षः। एवं प्र
स्थितयागनिमित्तं भक्षणं समाप्तं॥ ॥अथ प्रशास्त्रादिचमसेषु होतारं प्रशास्त्रादींश्च पृष्ट्वाध्वर्योर्भक्षः॥ ततः प्रशास्त्रादीनां
होतारमध्वर्युं च पृष्ट्वा वषट्कारसमाख्यानिमित्तो भक्षो तं वेणा। पृथग्व॥ ~ सर्वभक्षाश्चमसाः॥ यथा स्वमाप्यायनं प्रातःसवन
वत्॥ चमसानां हविर्धानमध्ये दक्षिणहविर्धानाक्षस्य पश्चान्निधानं॥ ततः सयजमानाः षोडशर्त्विजः पुरोडाशमात्रा आदाय स्वस्वचम
ससन्निधौ हविर्धानमध्ये यजमानपितृपितामहप्रपितामहेभ्यः पिंडपितृयज्ञवत् पिंडदानं कुर्वंति॥ ॥तत्र निर्विकरणं॥ लेपोल्मु ८७
कपृथमावनेजनस्य कृदादिन्नलरणानामभावः॥ नामगोत्राभ्यां पिंडदानं पितृयज्ञवत्॥ अत्र पितर इत्यादि जपः॥ आवृत्योद
ङ्मुसनं॥ पर्यावृत्यामीमदंतेति जपः॥ प्रत्यवनेजनाभावः॥ नीवीविस्रंसनं॥ अंजलयः॥ सूत्रदानं गृहान्न इति जापः॥ येयेषांच
र्त्विजां चमसानं संति ते सन्निहितचमसे पिंडदानं कुर्वंति॥ यथा नेष्टचमसे अध्वर्यादयः॥ होतृचमसे ग्रावस्तुत॥ उन्नातृचमसे सु
ब्रह्मण्यो॥ ततो ब्रह्महोत्रध्वर्य्वग्नीत्प्रशास्तॄणाम् आग्नीध्रे इडाभक्ष॥ यजमानस्य हविः शेषभक्षः। नेडायाः। समस्य मार्जनं। प्रस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेपवित्रकरणं॥भागसमर्पणं॥अवशाखायाआहवनीयेप्रहरणंनप्रातःसवने॥नापिमाध्यंदिने॥अध्वर्योर्देवोपवेषहोमः॥पिष्टले
पाकृतिः।प्रणीताविमोकः।राक्षसभागः।सदनीयभागावेक्षणं॥नागप्राशनंच॥ततोध्वर्योःपाणिप्रक्षालनं।हविर्द्धानंप्रविश्यो
पांशुपात्रेंतर्यामपात्रेवाआग्रयणं॥द्रामममध्येतिमंत्रेणसावित्रग्रहणं॥परिमार्जनं॥सादनाभावः॥ ॥पंचमीकंडिका॥५॥
देवायसवित्रेनुब्रूहीत्यनुवाचनं॥अतिक्रम्याश्राव्यदेवायसवित्रेप्रेष्येतिप्रैषः॥सर्वहोमःनानुवषट्कारः॥हृदंदेवापवि
त्रे॥ततोहविर्द्धानंप्रविश्ययेनपात्रेणसावित्रोगृहीतस्तेनैवपात्रेणपूतभृतःसकरणान्महावैश्वदेवंगृह्णाति॥उपयामगृ
हीतोसिसुशर्मासीतिमंत्रेणपरिमार्जनं।प्रदक्षिणेनरथावृत्ती॥ततएवतेयोनिरितिपात्रस्थानेखरेसादनं॥ततःसद्योग
त्वाहोतुःपुरस्तात्प्राङ्मुखउपवेशनं॥आहूतस्याहूत्यप्रतिगरः॥तवशस्त्रेएकयाचदशभिश्चेतिशस्यमानेप्रतिप्रस्थानाद्विदेव
त्यपात्राणिमार्जालीयेप्रक्षाल्यस्वरेस्वस्थानेनिदधाति॥प्रधावायज्ञेरित्येतावत्शस्यमानायतिसृणामृचामर्द्धर्चेषुमदामोदैवेतिप्रतिग
रोभवतिपुराणवेषुरुपाकृतएव॥शस्त्रांतेर्नुमितिप्रतिगरः।प्रदक्षिणावर्त्तनं।वैश्वदेवग्रहोपादानंचमसाध्वर्यूणांचमसादानं।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प

आश्रावयोत्थश्रावयजनसोमस्येति प्रैषः। वषट्कारानुवषट्कारयोर्होमः॥ प्रदक्षिणोत्तरथाहुतिः॥ प्रातःसवनवद्विश्वमसत्कंपनं॥ इदं
विश्वेभ्योदेवेभ्यः। इदमग्नयइतित्यागो॥ होत्रध्वर्युभ्यां ग्रहशेषभक्षणं॥ चमसितामनुपहूयैवस्वस्वचमसभक्षणं॥ सर्वभक्षाश्चम
साः मार्जालीयेचमसग्रहपात्रप्रक्षालनं॥ ग्रहपात्रस्यखरेस्थापनं॥ चमसानामुत्तरवेदेपश्चात्॥ ततःसौम्यचरुयागः। चरोरासाद
नं॥ आलंभः जुहूंवेदंचगृहीत्वा ध्रुवातश्चतुर्गृहीतं गृहीत्वा ऽ। आश्रावयघृतस्येत्युपांशु॥ यजेत्युच्चैः॥ इदमग्नये॥ ततोजुहूंध्रुवा
तनुपस्तीर्यद्विश्चरोरवदायोपरिष्टादभिघार्या ऽ। श्राव्यसौम्यस्ययजेत्युक्त्वावषट्कृतेजुहोति॥ इदंसोमाय। पुनश्चतुर्गृहीत्वा ऽ। श्रा ८८
वयघृतस्येत्युपांयजेत्युच्चैः। इदंविष्णवे। अथवा एकएवघृतयागः। पूर्वंवापश्चाद्वानतदाच इदमग्नीविष्णुभ्यामितित्यागः॥ ततोध्व
र्युः सौम्यचरुमध्येलौकिकमाज्यमासिंच्यसौम्यंचरुंसदसिनीत्वोद्गात्रेसमर्पयति॥ ततः पूर्वंहोतोद्गात्रेक्रियमाणमध्वर्युहस्तस्थितमे
वावेक्षते। ततोध्वर्युः ध्रुवशेषमाज्यस्थाल्यांचतुर्गृहीतंगृहीत्वाशालाकान् प्रदीप्याग्नीध्रीयादिधिष्ण्येषु विभूरसीति प्रतिमंत्रमेवचतु
र्गृहीतंविभज्याष्टसुस्थानेषुजुहोतीति स्रुग्भिः शारनडवीरणादिशालाकाभिरेकः। एवंविधास्त्रयःशालाकाः प्रतिधिष्ण्यमादीप्यंतेतेष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्निषु ॥ तेषूपशांतेषु स्वयोनेराग्नीध्रीयात् ज्वालाकानादीप्य धिष्ण्येष्वाग्नीध्रवन्निदधाति ॥ ततस्तेषु जुहोति । तत्र क्रमः प्रथमं पूर्वद्वारे
णाग्नीध्रं प्रविश्य धिष्ण्यपुरस्तात्प्रत्यङ् उपविश्य आग्नीध्रीये विभूरसीति जुहोति ॥ इदं विभवे प्रवाहणाय ॥ ततः पूर्वद्वारेणाग्नीध्रीया
न्निष्क्रम्य पूर्वद्वारेण सदः प्रविश्य प्रत्यङ्मुखो होतृधिष्ण्ये वह्निरसीति जुहोति ॥ इदं वह्नये हव्यवाहनाय । ततः पूर्वे मैत्रावरुणीं गत्वा प्रत्य
ङ्मुखः प्रशास्तृधिष्ण्ये श्वात्रोसीति जुहोतीति ॥ इदं श्वात्राय प्रचेतसे ॥ तथैव प्रत्यागत्य ब्राह्मणाच्छंसिधिष्ण्ये तुथोसीति ॥ इदं तुथाय विश्व
वेदसे ॥ ततः पोतृधिष्ण्ये उशिगसीति । इदमुशिजे कवये ॥ ततो नेष्टृधिष्ण्ये अंघारिरसीति ॥ इदमंघारये बंभारये ॥ ततोऽच्छावाकधिष्ण्ये
अवस्युरिति ॥ इदमवस्यवे दुवस्वते ॥ सदोमध्येपि सर्वधिष्ण्येषु प्रत्यङ्मुख एव जुहोति । प्रत्यङ्ङासिनः सर्वान्धिष्ण्यान्धारयतीति
क मैत्रसूत्रयोर्दर्शनात् ॥ ततः पूर्वद्वारेण सदसो निःक्रम्य मार्जालीयं गत्वा प्रत्यङ्मुख एव शुंध्युरसीति जुहोति ॥ इदं शुंध्यवे मार्जाली
याय ॥ ततो यथागतं प्रत्यागत्य पश्चिमेन हविर्धानमाग्नीध्रीयं दक्षिणेन गत्वोत्तरवेदिं प्रतिगच्छति ॥ केचिदाग्नीध्रीये पुनरत्र स्रुतं जु
हुति ॥ यदा अध्वर्युः धिष्ण्यानां व्याघारणं करोति ॥ तदैव प्रतिप्रस्थाता हविर्धानं प्रविश्योपांश्वन्तर्यामपात्रयोर्मध्ये पूर्वयेतपात्रेण

अ.प सावित्रेण न गृहीतोस्ति तेन पात्रेणोपयामगृहीतोसि बृहस्पतिसुतस्य देव सोम त इति मंत्रेण पात्नीवतं ग्रहं गृह्णाति एवं गृहीत्वा हविर्धा
नस्य पूर्वद्वारे ग्रहपात्रमादायोपविशति ॥ अध्वर्युर्धिष्ण्यव्याघारणानंतरं तत्र आगत्य नेष्टा नर्व्यां यजुर्वरणीशेषेण पात्नीवतं ग्रहं म
हं परस्तादिति मंत्रेण श्रीणाति ॥ ततो यजति स्थानं गत्वाऽश्रावय ऽग्नीत्पात्नीवतस्य यजेत्याह । ततोग्ना ३ इ पत्नीवन्निति मंत्रेणाग्नेष्ट्
त्राद्धिं यजति स्थाने तिष्ठन्नेव वषट्कृते जुहोति ॥ इदमग्नये पात्नीवते ॥ नानुवषट्कारः ॥ सशेषं पात्रमादायाग्नीध्रं गत्वोपविश्
स्याध्वर्युरग्नीदुपहवयस्वेति पृच्छति ॥ उपहत इत्युक्त आग्नीध्रोध्वर्युउपमाह्वयस्वेत्यध्वर्युं प्रत्याह ॥ ततोध्वर्युर्हुपहूत इत्युक्ता ८९
आग्नीध्र एवोपविष्टः प्रेष्यति ॥ अग्नीन्नेष्टुरुपस्थमासीद नेष्टः पत्नीमुदानयोद्गात्रा संख्यापयेति नेष्टारं । उन्ने
तर्होतुर्होतुश्चमसमनून्नय सोमं मातिरीरिच इत्युन्नेतारं ॥ ततोग्नीत्पात्नीवतपात्रसहित एव सदो गत्वा नेष्टुरुत्संगे उपविशति । ततः
सदस्येवाध्वर्याग्नीध्रोपात्नीवतशेषं भक्षयतः ॥ ततोग्नीदुत्संगादुत्थाय मार्जालीये पात्नीवतपात्रं प्रक्षाल्य खरे स्थापयति ॥ ततउन्ने
ता अपरेणोत्तरवेदिं होतृचमसादीन्द्राचमसान्निधाय पूतभृतोभिः शेषं सोमं विभज्य चमसे पूरयति ॥ होतृचमसे स्वल्पं न सिंच्

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शस्त्रांते ध्रुवावनयनविधानात्॥ ६ ॥षष्ठीकंडिका॥ ॥ततोध्वर्युस्तृणाभ्यां होतृचमसस्थं सोमस्य ध्रुवा अकर्णग्राहृतः आकर्ण
ग्राहृतो वायुपुरस्ताज्जपे कृते प्रस्तोत्रे तृणे समर्पयन्नुपावर्तध्वमिति मंत्रेण यजमानस्तद्यं स्तोत्रमुपाकरोति॥ततो नेष्टा अपरेण द्वारे
ण पत्नीवाकृगृहीतास्तदोमभ्ये प्रवेश्योद्गातॄणां पुत्रस्तेनउपविष्टां पत्नीमुद्गात्रा सह समीक्षणं कारयति॥पत्युद्गातारमीक्षस्वेत्यध्येष
णया तद्धिंकारवेलायां प्रजापतिर्हृषासीतिमंत्रेणोद्गातारमवेक्षते॥ततो निधनवेलायां पत्नी स्वं दक्षिणप्रतिनिधनं चोर्वासेकस्तो
त्रसमाप्तिंपर्यंतं करोति॥उद्गातानुज्ञाता सती तं उत्थाय शालायां गच्छति॥अथवोद्गात्राविवीरमीक्षिता सती गच्छति।अस्मिन्पक्षे वा
रत्रयं प्रेक्षितयोद्गात्रवीक्षणं वारत्रयमूर्वासेवश्च भवति॥स्तोत्रांते होता अग्निमारुतं शस्त्रं शंसति॥अत्राध्वर्युः पूर्वं होतुः पुर
स्तात्प्राङ्मुखस्तेशोंसीवेति होत्राहूतः प्रदक्षिणमावृत्य संमुखो भूत्वा प्रतिगृणाति॥अस्मिन्शस्त्रेध्वर्युः किलीयमित्याद्यामृतिस्तष
अर्धर्चेषु मदामोदैवेति गर इच्छया॥प्रणवेषु शाकृत एव॥एवा न इंद्रो मघवेत्यस्यां शस्त्रस्यांत्यायामृचि शस्यमानायां विरोधा
त्प्रतिप्रस्थाता ध्रुवं ग्रहं ध्रुवं ध्रुवेणेति मंत्रेण सर्वहोतृचमसेवनयति॥शस्त्रांत ओ३मिति प्रतिगरः।नात्र प्रदक्षिणा शस्त्रय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ·प हुत्वात्॥ अध्वर्युर्होतृचमसमादत्ते॥ चमसाध्वर्यवश्चमसान्॥ अतिक्रम्याश्राव्योत्थयाय यज सोमानामिति प्रैषः। प्रतिवषट्का
रं सर्वेषां होमः॥ इदमग्नी महद्भ्य इदमग्नय इति त्यागो नात्र पुनः क्षिप्राहुतिरग्रहत्वा तु एव॥ ततः सदसि गत्वा होत्वध्वर्यो होर्
तृचमसे भक्षः॥ होतुरिडादिचमसेषु नात्र षट्वषट्कारनिमित्तो भक्षः॥ ब्रह्मादीनां च स्व स्वचमसे होतारं पृष्ट्वा समाख्यानि
मित्तो भक्षः॥ ततः स्वचमसे होतुः समाख्यानिमित्त॥ सर्वभक्षांश्चमसांश्चमसाध्वर्यवो मार्जालीये पृथक् स्वचात्वालस्य पश्चाद्वो ग्रा
दिक्रमेणोदक् संस्थं स्थापयित्वोदकेन पूर्णान् कुर्वन्ति॥ ततऽल्पुकसमासादिधारानुयाजान्तं पशुवत्॥ पयस्यापक्षे त्वत्र हो ९०
मः। ततः स्रुचौ सादयित्वा पयूहनं॥ अग्नेर्वनस्पतेरिंद्रस्य वसुमत इति जुह्वाः अग्निर्वनस्पतिरिंद्रो वसुमानित्युपभृतः॥ ततः स्रु
चौरभ्युक्षणं॥ परिध्यंजनादि॥ शालायां ध्रुतीयसवनमासो पुक्षिप्य त्वात्॥ केवलस्य पुत्तरस्य होमः। पुत्तरहोमे॥ इदमग्नये
वनस्पतय इंद्राय वसुमते तद्वत आदित्यवत ऋभुमते विभुमते वाजवते बृहस्पतिमते विश्वदेव्यावते देवेभ्य आज्यपेभ्यो ग्न
ये होत्रापवाजिभ्य इति त्यागः॥ ॥सप्तमी कंडिका॥ ॥ स्रुग्विमोकानंतरं प्राकृतं च विकृतावितिन्यायेन वैशालं भे कृते अध्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्थः पाणी प्रक्षाल्य हविर्द्धानं प्रविश्य द्रोणकलशमाग्रयणाद्रुपयामगृहीतोसि हरिरसि हारियोजन इति हारियोजनं गृह्णाति॥
आग्रयणस्थाल्येव सर्वसोमं द्रोणकलशे निनयतीत्यर्थः। ततो दक्षिणे दर्भस्तरणे प्रागग्रे उदग्रे वा द्रोणकलशस्योपरि निधाय हर्यो
र्धानास्येति लौकिकधा॥ ताभिः श्रपणं कार्यं॥ परिमार्जनं सादनाभावः॥ ततस्त्वेताम्र्दभिति द्रोणकलशं निधाय धानासोमे
भ्योनुब्रूहीति प्रशास्तारं प्रेष्यति॥ तत आश्राव्य धानासोमान्प्रस्थितान्प्रेष्येति वक्ति॥ वषट्कृत्य द्रोणकलशेनैव प्रतिवष
षट्कारं धानामिश्रं सोमं जुहोति॥ सोमं सर्वहुतं धानाश्च सर्वहुताः करोति॥ इदमिन्द्राय हरिवते। इदमग्नये। पक्षे सर्वहोमः
अस्मिन्पक्षे द्रोणकलशं सदसि नीत्वा नेतुर्होतुश्चोपहवं भक्षणं॥ सर्वहोमपक्षे द्रोणकलशमुत्तरवेदौ निदधाति॥ सद
सि वा नयति॥ ततः सयजमानाः षोडशर्त्विजो द्रोणकलशान्निःस्रवात्तिस्रो धाना गृहीत्वा सदस्येव यस्ते अश्व सनिर्भक्ष इति धाना
स्त्ववघ्रायोत्तरवेदौ प्रक्षिपति॥ ततः सर्वे पिदेवकृतस्यैनस इति प्रतिमंत्रयति यज्ञस्य षट्षट् शकलान्याहवनीये आद
धति। एकैकेन मंत्रेणैकैकं। ततश्चात्वालस्य पश्चान्न्यायिनां तांश्च मसान्मृदकेन प्रपूरयित्वाश्वयं तेषामुपरि हरितदर्भान्प्रागग्रा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ॰प

उप ह्वायमानं सं वदन्ते मद्वमदंशंति हवमानमाना: सर्वे ऋत्विज: । अनत्न लीं सर्वे स्वमुखे स्वालभंते ॥ येषांमृत्विजां चमसा नसंसितेस न्निकृष्टानां चमसानवमदंशंति ॥ तद्यथा अध्वर्युप्रतिप्रस्थातनेष्टु उन्नातृनेष्टृचमसं । मैत्रावरुणउद्गात्चमसं ग्रावस्तुद्ध्रोतचमसमिति ॥ ततः सर्वे सयजमाना आग्नीध्रे दधिभक्षणं कुर्वंति ॥ ततोना घनीमंतरापूपाग्नीहुत्वाग्नीध्री पमुत्तरेण पत्नीशाला यामपरेण शालाद्वार्यं नीत्वा प ध्रुवत्पत्नीसंयाजा: कर्त्तव्या: ॥ ततो दक्षिणाग्नावाहुतिद्वयहोम: । वेद्यो क्रविमोक: । ततो बर्हिषो मुष्टिं सम्येगृहीत्वोर्ध्वस्तिष्ठन् ध्रुवयेवनवत्समिष्टयजू ९ षि जुहोति । समिंद्राणोमनसा नेस्या द्विभि: तत्रप्रथमेइदं विश्वेभ्यो देवेभ्य: । द्वितीयेसवर्चसा इदं त्वष्ट्रे २ धाताराति: इदं धात्रे सविते प्रजापतये देवाग्रमये त्वष्ट्रे विष्णवेच ॥ ३ सुगावो देवा: इदं देवेभ्य: ४ । याः २ आवहः इदमग्नये ॥ ५ वयं ८ हित्वा ६ इदमग्नये ६ । देवागातु इदं वातोय, यज्ञं यज्ञं । इदं यज्ञाय । एष ते । इदं यज्ञपतये । तत आसंघो ईदं यैर्वात्वा लप्रतिनपति । प्रत्यक्त दाधवनीम गृहस्पालीव मत्नो उखलनोणा कलश ग्राव पवित्र द्वयसंभरणी परिहृत्वा दिधि षवण चर्मादीनि सर्वाणि सोमलिप्तानि वमवाचा त्वा

लं प्रतिहरति। ततो ऽध्वर्युर्यजमानसकाशात् कृष्णविषाणामेखले आदाय यथाहिर्भूरिति मंत्रेण चात्वाले प्रास्यति। एतच्चोपन्यायोक्तेण
दीक्षापक्षे। मेखलापक्षे तु मेखलाया एव प्रासनं॥ ततो ऽध्वर्युश्चात्वालसमीप एव यजमानमुरु॰ हीति वाचयति॥ वि[illegible]च्छिदि
ति ब्रूहीत्येवं। ततः साम गायेति प्रस्तोतारं प्रेष्यति॥ साम ब्रूहीति वा। ततः प्रस्तोता साम गायति॥ तत्र सर्वे ऋत्विजो यजमानस
हितानि धनमुपयंति॥ ततः श्चात्वालसमीपे आहृतमाहंघारुंवरीं सोमलिप्तादिकं सर्वमादाय ऋजीषकुंभवाहृणपुरो
गाशासमिद्दर्भमुष्टिजुहूस्रुववष्कृतावदानसमाज्यस्थालीपरिधानार्थवस्त्रा(णि) चादायनग्रादिषु वर्हंतीतामपां मध्ये य
नस्या वरोभवंति॥ तं प्रत्यवभृथं कर्तुं सयजमानाः सर्वऋत्विजो गच्छंति। एवं विधानामपां सन्निकृष्टानामभावे यथालाभ
मपो गच्छंति ततो देवयजमानावभृथस्यानयोरर्द्धमार्गे प्रुनः प्रेषः। साम गायेति॥ साम ब्रूहीति वा॥ ततस्तत्स्थानं। निध॰
नं च सर्वे पठंति॥ ततः सर्वमाहृतमादायोदकसमीपे मुक्त्वा पुनः सोमप्रैषः। गाननिधने च पूर्ववत्॥ ततो ऽध्वर्युर्वा हृदही
तं यजमानमुदकमध्ये प्रवेशयेन् नमो वरुणायेति वाचयति॥ ततो यावदुक्ता अवभृथेष्टिः। ब्रुह्म यजमानो जलमध्ये द॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प क्षिप्तमिष्टत। आज्यपुरोडाशादि नवैर्वहन्ते धारणीयं॥ सर्वे यथास्थानं जलस्थिताग्निष्ठं सर्वे कुर्वन्ति॥ ततो ध्वर्युरथः। परिस्तीर्य हस्तध
तायां एवं स्थाल्यां आश्चतुर्गृहीतं जुह्वां गृहीत्वा सन्निधमाधाय तस्याऽपर्यग्ने रनीक्रमिति मंत्रेणाऽनुजुहोति। इदमग्नये। वषमाणाः स
र्वा आहुतयोऽ।स्मिन्नेवोदकप्रदेशे होतव्याः ततः पुनराज्यस्थाल्याः स्त्रुचीमेव चतुर्गृहीतं गृहीत्वा स्त्रुगादापने पठितेऽआध्याय सं
मिधो यजेत्यादि वर्हिर्वर्जिताश्चत्वारः प्रयाजास्तेनैव चतुर्गृहीतेन होतव्याः पंचमे इदं वरुणाय देवेभ्य आज्यपेभ्य इति त्यागः॥ त
तआज्यस्थाल्या वोपस्तीर्य पुरोडाशस्य मध्याद वघत्त्व वरुणायानुब्रूहीत्याह॥ ततः पूर्वार्द्धात् द्वितीयं॥ जमदग्निनां पश्चात् तृतीयं ६२
वाऽत्रजीवस्याव दानं पुरोडाशवदिध्यायऽपरिस्तरूदभिघारः॥ कृताभ्यंगः आश्राव्य वरुणं यज॥ अथ होमः॥ इदं वरु
णाय॥ पुनर्जुह्वामुपस्तीर्य सकृत्समपि पुरोडाशं जुह्वा मध्ये मुच्चन् अग्नीवरुणाभ्यामनुब्रूहीत्याह॥ यदि वरुणयागे ऋजीषस्य
द्विरवदानं कृतं भवति तदा त्रापि सकृदजीषस्याव दानं। द्विरभि ~ रः॥ आश्राव्याग्नीवरुणौ यज॥ ऽत्तरार्द्धे स्विष्टकृद्धोमः॥ इदम
ग्नीवरुणाभ्यां॥ अयं षडाहुतिपक्षऽत्र॥ वाजसनेयिभिरयमेव पक्षोऽनुष्ठेय इति हरिस्वामिनः॥ ॥अथ दशाहुतिपक्षऽच्यते॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदियजमानस्यदर्शाकृतिपक्षेछातदाममयक्षांतरंकुर्विस्येवमर्ध्वर्युंप्रतियजमानोवदति॥एवमुक्तोध्वर्युर्दर्शाकृतिपक्षंकरोति॥त
त्रबर्हिर्वर्जिताश्चत्वारः प्रयाजाः इत्थमेवचानुर्गृहीतेन। ततोद्वावाज्यभागौप्रकृतिवत्॥ध्रौवेण॥ ततोवहणाग्नीवरुणायागौयथो
क्तौ। ततोवर्हिर्वर्जितौद्वावनुयाजौप्रकृतिवदौपभृतेन। एवंदर्शाकृतयः। अस्मिन्पक्षेहरिस्वामिभिर्विशेषउक्तः॥ अत्रापिपूर्ववत्
प्रकृतेरेवाज्यपुरोडाशैरपोगत्वाचतुर्गृहीतंगृहीत्वाकृत्वा॥ जुहामुपभृतिध्रुवायांचक्रमेणप्रकृतिवद्ग्रीणि चतुर्गृहीतानिगृही
त्वातिष्ठंतएवांगप्रधानसाधारणानग्निसंस्कारान्परिधिपरिधानोपवाजनसंमार्गादीनप्यनुकुर्वंति॥हस्तभृतेरेवाज्यहविर्भि
श्चरेयुः॥नचापिचैतमेतयाचसमिधैतयाचाकृत्यासमिधंदेवेभ्योजुहवानीध्यसामिधेन्यर्थस्यान्यथास्यात्वथासिद्धत्वादिति॥ते
नास्मिन्पक्षेप्रकृतिवद्ध्रौवेणाज्यभागौ॥औपभृतेनानुयाजाःप्रयाजप्रधानयागादिकंतुषडाकृत्युक्तप्रकारेणैवेति॥अंगरसांति
रसः पुत्रपौत्रादीनां॥अयंपक्षः॥ ॥अष्टमीकण्डिका॥ ८ ॥एवमन्यतरंपक्षमनुष्ठायायाध्वर्युसमुडेतेहृदयमितिमंत्रेण
प्रुक्मजीषकुंभंतारयति॥ततोप्युतीर्णत्कुंभाद्धस्तंविसृज्यदेवीरापएषवइतितंकुंभमुपतिष्ठतेमंत्रलिंगात् ततोवभृथेति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं कुंभं मज्जयति॥ अध्वर्युः प्रेरयतीत्यर्थः॥ ततो मामैंद्रियमिति स्वकृष्णाजिनस्यान्तमप्सु प्रवेशयति॥ ततः कृष्णाजिनं पुच्छादपकृष्य पत्नीयजमा
नौ मज्जनं कुर्वन्तौ स्नानं कुरुतः॥ तत्र यजमानः पत्न्याः पृष्ठं क्षालयति पत्नी च यजमानस्य अध्वर्युः सर्वसोमलिप्तमुलूखलादिकमुद
कमध्ये प्रक्षेपयति॥ ततः सर्वे ऋत्विजः स्नान्ति ऽन्येता पत्नीयजमानौ ऽद्वयमिति मन्त्रेण वारुणगृहीतौ जलमध्याद्बहिर्निःसारयति।
प्रत्येकं मन्त्रः॥ अनेनैव मन्त्रेण सर्वानृत्विजो निष्कासयति॥ ऽन्येनैव॥ ततः सयजमानाः सर्वे ऋत्विजः आ महीयसं ज्ञामपाम सोम(
मित्येतामृचं जपन्तो देवयजनं प्रत्यागच्छन्ति॥ ततश्चात्वालोत्करावन्तरेण देवयजनं प्रविशन्ति॥ ततो यजमानो देवाना८सदसी
त्याहु[illegible]वतीये समिधमादधाति। पत्नी च गार्हपत्ये तूष्णीं॥ गार्हपत्यो ऽत्र शालाद्वार्य एव॥ ततो बुल यजमाना वति प्रणीतदक्षिणांत
उपविशतः॥ एकहदर्हिर्हिर्मः। यजमानः पत्नी शालायां गत्वा शालाद्वार्यस्य पश्चात्कृष्णाजिनमुत्संगकृत्वा उपविशति॥ ततोऽध्व
र्युः शालाद्वार्यं आज्यं संस्कृत्यातिप्रणीते ऽग्नौ स्रुवेणाहुतिं जुहोति॥ मैं द्वियं स्मेक्ष ८॰ इध्ममग्निर्दधानुस्वाहेति मन्त्रेण॥ परिस्तर
णसमिदाधाने कृत्वा॥ इदमग्नये॥ ततो यजमानः कृष्णाजिनं कवितु गुह्नेभ्य प्रदेशे निदधाति॥ ततऽदयनीयेष्टिः॥ प्रायणीया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वत्॥ शालाद्वार्ये त्वाहवनीयः। प्राज्ञहितो गार्हपत्यः शालामुखेऽदयनीयस्याचरंतीति शाखांतरेऽभ्युक्ते॥ मानवे च॥ निष्काये
प्रायणीयस्योदयनीयमनुनिर्वपति॥ शालामुखीये प्रचरंतीति॥ तत्र चतुरासनोपकल्पनं तुष्णोपवेशने। प्रणीताप्रणयनं
आहवनीयस्यैव परिस्तरणं। पात्रासादनं॥ प्रायणीयावत्॥ प्रायणीयायां यस्यां स्थाल्यां चरुः कृतः सैवात्र चरुस्थाली पक्षे
मेक्षणबर्हिषि अपि तदीये भवतः॥ अत्र पथ्यास्वस्तिराज्ययागानां चतुर्थी कर्त्तव्य॥ उत्तमप्रयाजे इदमग्नये सोमाग्नये सो
मायसवित्रे पथ्यायै स्वस्तये दित्यै देवेभ्य इत्यादि॥ अत्रोपांशुत्वमपि प्रायणीयावदेवेति यागमात्रस्य॥ अत्र प्रधानया
गव्यतिरिक्ता सकलेष्टिः सर्वमुपांशु वेति। आज्यभागानंतरं चत्वार आज्ययागः। इदमग्नये सोमाय सवित्रे॥ ततः पथ्यायै
स्वस्तये॥ एते कुर्वायाश्चतुरवदायावदायकर्त्तव्या॥ ततः चरुणादितियागः। ततः स्विष्टकृदादि ऊह ते अग्नेः सोमस्य सवि
तुः पथ्यास्वस्तेरदित्या नुजिति। अग्निसोमः सविता पथ्या स्वस्तिरदितिस्तमयनुदंत्विति। प्रस्तरहोमे। इदमग्नये सोमायस
वित्रे पथ्यायै स्वस्तये देवेभ्य इत्यादि। संयोर्वाकांता। संस्रवहोमः। धुरिस्फ्ये वास्तु चोर्निधानं। विद्यारंभः वेदयोक्तविमोकः। प्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निधन्निपक्षेध्रुवस्य समिधं यजुर्होमः। बर्हिर्होमः॥ प्रणीताविमोकः राक्षसभागः भागावेक्षणं। भागप्राशनं॥ ॥इत्युदयनीयास
अ.प माप्ताः॥ ॥अथानूबंधोच्यते॥ सा च वशा अगर्भिणी मित्रावरुणदेवत्या भवति॥ तस्याश्च कलौ लोकद्विष्टत्वात्तस्याः स्थाने
ऽजामालभंते॥ तत्र द्वितासनं ब्रह्मोपवेशनं॥ आहवनीयशालाद्वार्यदक्षिणाग्निर्नापरिस्तरणं॥ दक्षिणापूर्वपात्रवर्जं पाभृ
कंपात्रासादनं॥ अग्निहोत्रहवनीवर्जः॥ शम्यादृषदुपलं॥ पवित्रच्छेदनानि पवित्रे॥ स्थाली आज्यं च। वेदश्च इध्मचतुष्टयं। बर्हि
श्चयं॥ प्राशित्रेडापात्रीषडवत्तं च॥ पोक्ष्यूतकुशाश्च। पीठं कुशास्तीर्णं॥ ततः प्रोक्षणीसंस्कारः। पात्रप्रोक्षणं॥ असंचरे निधानं २४
कुक्कुटाहननं॥ आज्यनिर्वापो वेदवेधः॥ आग्नीध्रएव ऽस्यवनं॥ पश्चाद्दाज्यग्रहणं॥ ततआज्यस्थापयेध्मबर्हिषी चादाय आ
ज्यवर्जमाहवनीयस्योत्तरतो निदधाति॥ तत इध्मप्रोक्षणाद्येकहृदर्हिस्तरणांतं सवनीयवत्॥ समिन्मुक्तरादनाद्यात्मालं
भोदकालंभांतं च॥ यूपोस्त्येव॥ यूपसमीपेगत्वादिवः सनुरिति स्ववदगूहनं॥ ततउपाकरणमंथनेन नियोजनेमित्राव
रुणाभ्यां जुष्टं। प्रोक्षणे त्वा जुष्टं॥ अधस्तादुपोक्षणं॥ नेह हिहोतरित्यादिवपामार्जनांते विशेषः॥ स्पेनानुगृह्णीतिस्याभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः॥ तत्नेष्टः पत्नीमुदानयेति प्रैषः॥ वपायां नाज्यभागौ मित्रावरुणाभ्यामुस्राया वपायै मेदसोऽनुब्रूहीति॥ उपरिष्टादभिघारः॥ मि
त्रावरुणाभ्यामुस्राया वपां मेदः प्रेष्येति विशेषः॥ तत्र प्रस्थितयाज्ञः इदं मित्रावरुणाभ्यां॥ वपामार्जनांते पशुपुरोडाशनिर्वापः॥
तत्र चतुरवत्तं॥ प्रणीताप्रणयनं॥ पात्रासादनं। भूयं। एकादशकपालानि॥ कृष्णाजिनं। उलूखलमुसलं॥ पात्राधानं। उपवे
षः संपवनोदकं घृतावदानं॥ पुरोडाशपात्री॥ पूर्वपात्रं कर्मापवर्गी चेति॥ ततः स्रुचोपहितपात्रीकरणादि मित्रावरुणाभ्यां जुष्टं॥
प्रोक्षणादि सर्वालंभांतं॥ ततः एतत् ॐ होतर्मैत्रावरुणाविति प्रैषः॥ स्रुचावादाय यजप्रैषावाज्यभागौ॥ अवद्यतोऽनुवाचनं॥ मित्रावरु
णाभ्यामुस्राया हविः प्रेष्येति॥ भागावदाननियमः॥ अनुयाज्ञांते स्वरुहोमः। स्रुहते। मित्रावरुणयोर्वनस्पते रुज्ज्ञितिं॥ मित्रावरु
णौ वनस्पतिस्तमपनुदंतु॥ बर्हिर्होमानंतरमेव भूलावभृथः समिदाधानांतः॥ प्रणीताविमोकः॥ राक्षसभागः॥ शाकटवर्हिर्होमः।
पूर्णपात्रनिनयनादिकर्मापवर्गांतं सर्वसाधारणमत्र भवति॥ इत्यनूवंध्यासमाप्ता॥ ॥ तदभावेऽक्षायांडोहवभआलब्धव्यः॥
छंदोगसूत्रे॥ अजे आजिगं। प्रेवेऽर्णीयवमिति सामगायनविधिपरे वाक्ये अजमेषावपि वैकल्पिकौ वशास्थाने कथितौ॥ तेनक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्नौ तत्सक्ता श्रपणादेव युज्यते॥ उभयोरभावे पयस्येष्टिः॥ साहि विधा सकलाखंडेष्टिश्च। तत्र सकले ष्टिपक्षः सुगमः॥ खंडेष्टिप
क्षे आज्यभागप्रभृतीष्टांता॥ तत्र पदार्था लिख्यंते। मंत्रेण शाखाछेदः॥ अनुमार्जनं। तूष्णीं शाखापरिवासनं॥ नोपवेषकरणं पवि
त्रबंधनं। पयस्यार्थ बहूर्गस्यापाकरणं। मित्रावरुणाभ्यां भागमिति विशेषः। उपगूहनं। चतुरासनं। वृक्षोपवेशनं॥ सर्वार्थत्व
पक्षे प्रणीताप्रणयनं॥ नादृष्टार्थत्वसंयवनार्थत्वपक्षयोः॥ अग्निप्रणीतामुत्तरेणनिधानं॥ तस्यैव परिस्तरणं। शालाद्वार्यस्यप
श्चादुत्तरतो वा पात्रासादनं॥ अग्नीहोत्रहवणीस्फ्यः। पवित्रछेदनानि पवित्रे॥ स्थाली आज्यं च। वेदश्च। दोहनचतुष्टयं॥ इध्मो द्वा
दशकाष्ठकः। प्रस्तरमात्रं वर्हिः। स्रुचो जुहूः। उपभृत् ध्रुवा च। भृता वदानं॥ प्राशित्रहरणे वाजिनपात्रं। इडापात्री। योक्त्रं। पूत
कुशाः परिधयः। कुशास्तीर्णहोतृपीठमिति। ततः सर्वसाधारणं पूर्णपात्रं कर्मापवर्गीवेति॥ ततः प्रोक्षणीसंस्कृत्य पात्रप्रोक्षणं। अस्त
वरे निधानं। आज्यनिर्वापो वेदवंधः। ततउपस्तृष्टादिपरिक्षालनांतः शालाद्वार्ये दोहः। शालाद्वार्यस्य वाज्याधिश्रयणं। पयो वर्जं प
र्यग्निकरणं॥ उदकालंभः॥ पयस्यायाः श्रयणं॥ तत्रैव पयसि दधिप्रक्षेपः। आग्नीध्रीये प्रोक्षणी प्रैषा पात्न्यग्रहणांतं। ध्रुवायामेवाज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहणं ॥ आज्यादिकमादायोत्तरवेदिं गत्वा इध्मप्रोक्षणं ॥ नवेदेः बर्हिः प्रोक्षणं । तत्र स्रुवेत्वेति विशेषः ॥ अपच्छेदवान्नलीं प्रस्तरग्रह
णं ॥ ब्रह्मणे समर्पणं ॥ संनहनविस्रंसनं ॥ श्रोणौ निधानं ॥ अन्यैरवच्छादनं ॥ ततः इध्मास्तमिदाधानं ॥ प्रस्तरस्य च ॥ आहवनीयकल्प
नं ॥ नोल्मुकदूहनं । परिधिपरिधानं । स्रुच्पास्त्रुपयोराधानं । सर्पस्त्वेति जपः । आहृत्य हृतायाः ववेदेर्द्वे तृणे गृहीत्वा विधृत्योः स्तर
णं प्रस्तरस्तरणं अभिमर्शनः । स्योपगृहेणाति ज । सुतीर्था । अस्मुपभृदिति स्रुचौ रासादनं । ततो वेदोपगृहेण घृताचीति ध्रुवायाः ततः
शालाद्वार्यसमीपे गत्वा वाजिनपंनपात्रस्थापनं । उपस्तारः । तत्रस्याभिधारमदत्त्वा वाजिननिषेकः ॥ ततः स्तनाभिघारः ॥ उद्वासप्रा
णदानं मित्रावरुणौ गच्छ वाजिनो गच्छेति । तत आज्यस्थाल्याः पयस्यायाश्च वेदौ सादनं ॥ उक्तरेवाजिनस्य । सर्वालंभः आत्मालंभः ॥ हो
तृषदनकरणं । एहि होतरिति प्रैषः ॥ अष्टादशकाष्ठान्यासाद्य षोडशानामत्र सहैव तत्स्नीमाहवनीये प्रक्षेपः इध्मनार्थत्वात् ॥ आह
वनीयोपवाजनं ॥ अग्निसंमार्गप्रैषः ॥ अग्निसंमार्गः न पूर्वाघारांजलिकरणेत्तरघाराः ॥ होतृवरणं समंत्रकं प्रकृतिवत् । ततः स्रुगा
दापानं ॥ नप्रयाजाः ततः स्रुचावादाज्यभागौ । ततः पयस्यायागः । तत्र मित्रावरुणाभ्यामनुब्रूहि । मित्रावरुणौ यजेति । सान्नाय्यविकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ.प

त्वा स्रुवेण वदानं। ततः स्विष्टकृदादि। संवराभ्युक्षणाभावः॥ प्रस्तिरेऽरादिसमस्य मार्जनं। चतुर्धाकरणाभावः। पवित्रप्रतिप
त्तिः॥ अग्निसंमार्गश्चैषः। संमार्गः। ऊहने। मैत्रावरुणयोरुद्धिति। मित्रावरुणोनमयनुदत्तां॥ जुह्वामभ्युक्षणं॥ परिधंजनं।
सक्तवाकप्रैषः प्रस्तरदानादिसहस्राणयामुस्तरानुप्रहरणं॥ इदमग्नये सोमाय मित्रावरुणाभ्यामग्नये होत्राय वाजिभ्यः॥
अनुप्रहर। तृणप्रक्षेपात्मालंभोदकालंभः। वाजिनयागो भक्षांतः। संवदत्वादेरभावः॥ परिधिप्रक्षेपः। संस्त्रवाहुति देशो क्र
वोर्निधानं। अत्रवाजिनयागः। वेद्यालंभाभावः। वेदयोक्त्रविमोकः। आवेदस्तरणं। समिष्टयजुर्होमः। प्रणयनपक्षे प्रणीता ९६
विमोकः। ततः सर्वसाधारणपूर्णपात्रनिनयनादिकर्मापवर्गांतं॥ अत्रवृत्तविसर्गपयष्पुरोडाशभागप्राशनादि सर्वं॥ ॥इति प
यस्या॥ ॥ततः प्राजहितेसमारोपवन्वा त्वात्॥ अपरे सर्वे घ्नाग्नि भुसमारोपमिच्छंति॥ ततउदङुदवसाय॥ मथित्वागार्ह
पत्यस्थापनं॥ ॥ततउदवसानीयेष्टिः॥ ॥आग्नेयः पंचकपालोऽभ्युद्धरणादिकर्मापवर्गांतः पूर्ववदेव॥ अत्राग्न्यन्वा
धाब्रह्मवरणव्रतग्रहणदक्षिणादानादिसर्वं भवति॥ हिरण्यं दक्षिणा अनड्वान्वा॥ इत्युदवसानीया॥ ॥अथवाकेव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लमाहवनीयमुद्धृत्यार्ग्यं संस्कृत्य चतुर्गृहीत्वोत्तरविलावितिपर्णवदाहुति।। तत्र यथाशास्त्रं धर्य्यं वदानं।। ततः सह
स्त्वग्राह्मणभोजनं।। ।।अस्याग्निष्टोमस्य सन्तद्वयेयथासपत्नेनभोजनपर्याप्तेनान्नेन सह संब्राह्मणामर्हं नर्द्ध्यामीति।।
ततोमांगर्त्स्यं तदानीमेव पुनरुद्धृत्यस्त्ययमेवाग्निहोत्रहोमः।। प्रातर्होमस्तु स्वकाल एव।। अत ऊर्ध्वं संध्यातर्पणवैश्वदेवादि
नित्यक्रिया।। नातः प्राक्।। ।।इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां ।। ९७
कात्यायनसूत्रपद्धतावग्निष्टोमः समाप्तः।। ।। ।।शुभमस्तु।। ।। ।।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री ५ को सरकार

देवयाज्ञिककृत

अग्निष्टोम पद्धतिः समाप्ता ।

श्री ५ को सरकार

Nepal Sanskrit Univer

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवाख्याशि ०५ —

कात्यायनश्रौतसूत्रपद्धतिः

श्री ५ को सरकार

श्री ५ को सरकार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दे·प·का·उ श्री· ओं अथ दर्शनरूद्वीयहोमसंस्नौजुहोनिरुच्यते ततजं घामा आदित्यनिमत्त परिस्त्रिन्नुग्न्यन्वाधानं ततत्तूष्णीमेव समिद्द्वयस्य जं घामा आघ्क्षेप कार्यः ततः
व्रताशनं सर्वकर्मतूष्णीं भवति ब्रह्मोपवेशनं परिस्तिर्नां दक्षिणतः ततः पश्चाद्यजमानउपविशति प्रणीताप्रणयनं परिस्तिनमुत्तरतोनिधानं परिस्तिनमेव
परिस्तरणं ततः पात्रासादनं शूर्पाग्निहोत्रहवणी स्फ्यः कपालं शम्याकृष्णाजिनं उलूखलमुशलं दृषदुपले पात्रीधान्यं गवेधुकानतिलाश्च पवित्राणिधृतिः
स्थाली आज्यं च वेदश्च उदकहस्तागमिश्रः इध्मकाष्ठमेकं बर्हिः स्रुवोजुहूः उपभृद्ध्रुवाच अर्कपर्णं अर्ककाष्ठंच शृतावदानं योक्त्रं पुनःकशाध्व परिधयः म
हापात्रीं कर्कमते पूर्णपात्रं कर्मापवर्गे चेति ततः स्फ्योपहितपात्रीकरणं सूर्पाग्निहोत्रहवण्योरादानं प्रतपनं पात्रीप्रतिगमनं पात्रिंविलस्यालंभं गवेधु
कानां जतिलानां वेक्षणं अपड्व्यनिरसनं अपड्व्याभावेऽभिमर्शनं वा गवेधुकानां जतिलानां च मिश्रीकृत्यैवासादनं च पंचविंशत्यधिकानि चत्वारि शतानि
चतुर्मुष्टीकानिष्टं तेनैमिश्रीकृत्य ग्रहणं शेषाभिमर्शनं आहीक्षणं उत्थानं उत्तरतोगमनं शूर्पस्य पश्चाद्भुवि सादनं पवित्रच्छेदनं अग्निहोत्रहवण्यामर्पणं राम
नयनं पवित्राभ्यामुत्पवनं सव्यहस्तेकरणं दक्षिणेनोद्गमनं तासामेवोक्षणं हविषोक्षणं सकृदेवः पात्राणां प्रोक्षणं असंचरे प्रोक्षणीनां निधानं कृष्णाजि १
नादानं अवधूननम् उदकोपस्पर्शनं प्रत्यग्रीवस्यास्तरणं समाप्ने उलूखलनिधानं चालनेन जतिलानां पृथक्करणं गवेधुकानां मुलूखले आवापः मुशलाद

नं उलूखलमध्ये मुशलावधानं कंडनं अधिधः ऊरूहननं कंडनं शूर्पादानं हविरुत्पवनं निष्पवनं विवेकीकरणं पुनः कंडनं तुषनिरसनं उदकाले
भः पात्र्यामोप्याभिमंत्रणं त्रिः फलीकरणं कपालनिधानं कर्पराधिश्रयणं उपर्यंगारनिधानं गवेधुकानां कपरेऽवक्षेपः पर्यग्निकरणं श्रपणं आलंभनं उद्वासनं
कृष्णाजिनादिपेषणं प्रोहणांतं अर्द्धपिष्टेषु आज्यनिर्वापो वेदवंध ततः पोहणं पिष्टानामीक्षणं जर्तिलानांच आज्याधिश्रयणं पर्यग्निकरणं वेदिमा
नादिशंमर्शनांतं कृतं त्वा क्रियते परिग्रितोऽपरेणार्थवेदिखननं उत्तरपरिग्रहः अनुमार्जनं प्रोक्षणीनां धारणं स्फ्यस्योद्यमनं प्रोक्षणपात्रासादनं स्फोद
कपहरणं पाणिपारवनेजनं स्फोध्यावर्हिषां सादनं स्रुक्स्रुववसंमार्जनं जुहूनंतरं अर्कपर्णस्य संमार्ग उपभृद्ध्रुवाभृतावदानमहापात्रीणांच संमार्जनापासनं
पत्नीसंनहनं आज्योद्वासनं पत्न्यावेक्षणं वेद्यामाज्यस्थासादनं तस्योत्पवनं प्रोक्षणीनां उत्पवनं आज्यावेक्षणं ध्रुवायामेव चतुर्गृहीतग्रहणं तेध्मप्रोक्षणं वेदिप्रोक्ष
